संस्कृतविद्यापीठग्रन्थमालायाः पुष्पम्

प्रत्यक्षागमप्रमाणोल्लासः

प्रधानसम्पादकः

प्रो. भवेन्द्रझा

कुलपतिः

सम्पादकः

प्रो. शुद्धानन्दपाठकः

दर्शनसङ्कायाध्यक्षचरः

अद्वैतवेदान्तविभागाध्यक्षचरश्च

सहसम्पादकौ

डॉ. एस्. एन्. रमामणिः

छात्रकल्याणसङ्कायाध्यक्ष

दर्शनसङ्कायाध्यक्षचरा

डॉ. सतीशः के. एस्.

अद्वैतवेदान्तविभागस्थः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-16

संस्कृतविद्यापीठग्रन्थमालाया अष्टाशीतितमं पुष्पम्

प्रत्यक्षागमप्रमाणोल्लासः

प्रधानसम्पादकः

प्रो. भवेन्द्रझा

कुलपतिः

सम्पादकः

प्रो. शुद्धानन्दपाठकः

सहसम्पादकौ

प्रो. एस्. एन्. रमामणिः **डॉ. सतीशः के. एस्.**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-16

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालय:)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-62-6

प्रकाशनवर्ष: - 2013

मूल्यम् : ₹ 250/-

मुद्रक:
अमरप्रिंटिंगप्रैस:
देहली-११०००९
दूरभाष: : 9871699565, 8802451208

श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
कुतुब सांस्थानिक क्षेत्र, नई दिल्ली-110016
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed to be University)
Qutub Institutional Area, New Delhi-110016

दिनाङ्कः 05.02.2012

पुरोवाक्

विदितमेव विपश्चिदपश्चिमानां यत्प्रपञ्चस्यास्य समस्ता अपि व्यवहारा अनुभावाधीनाः, अनुभूतिश्चात्मसत्तानिबन्धना, आत्मसत्तामन्तरेण तदुपलब्धेर्दुरुपपादात्, अनुभूतिप्रक्रियाया अनुभवकर्तुरात्मनः स्वसत्तानुभूतेर-परिहार्यत्वेन भानाच्च। आहुश्च स्वयं भगवत्पादाः–

आत्मा तु प्रमाणादिव्यवहाराश्रयात्प्रागेव प्रमाणादिव्यवहारात् सिद्ध्यति, न चेदृशस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वयम्। न ह्यग्नेरौष्ण्यमग्निना निराक्रियत इति।

वेदान्तिमते चैतन्यं वा ब्रह्मैव प्रत्यक्षप्रमा। सर्वोऽप्याविद्यक-स्तत्रैवाध्यस्यते। मायापि च तदेव विषयीकृत्य तदाश्रिता। भ्रान्तिस्थले रज्ज्ववच्छिन्नचैतन्याज्ञानं रज्ज्ववच्छिन्नचैतन्यं विषयीकृत्य रज्ज्ववच्छिन्नचैन्य-माश्रियते। अज्ञानेन चाहमिदं ममेदमिति लोकव्यवहारः सम्पद्यते। तथापि प्रतिशास्त्रं प्रवर्तमानस्य प्रमाणविचारस्य व्युत्पत्तिवैचित्र्याद् भेदेऽपि प्रायो भारतीयदर्शनानां मिथः समन्वय एव तात्पर्यमवलोक्यते न विरोधे। तथा चाभाणि अभिनवगुप्ताचार्यैः–

तीर्थक्रियाव्यसनिनां स्वमनीषिकाभि-
रुत्प्रेक्ष्य तत्त्वमिति यद्यदमी वदन्ति।
तत्तत्त्वमेव भवतोऽस्ति न किञ्चिदन्यत्
सञ्ज्ञासु केवलमयं विदुषां विवादः॥

विगतसत्रेषु दर्शनसङ्काये विविधप्रमाणमाश्रित्य समायोजितेषु सङ्गोष्ठीकार्यशालादिषु विद्वज्जनसमर्पितानि शोधपत्राणि समाकलय्य प्रमाणस्वरूपं महता शास्त्रसपर्यासमुत्करोऽद्वैतवेदान्तविभागः प्राचीकशत्। शास्त्ररहस्यावबोधनविधौ ग्रन्थग्रन्थिस्फोरणदक्षा आचार्यपारसनाथद्विवेदि-डॉ. मणिद्राविडप्रभृतयो विरला एव भवन्ति, तदानीं सन्निधौ जिज्ञासासमाधानक्रमेण वेदान्तपरिभाषाप्रत्यक्षपरिच्छेदस्य शिखामणिटीकामादाय प्रतिवाक्यं स्वाध्यायस्य विलक्षण एव कश्चिद् बोधोदयः सन्निहितानामभूदिति स्मरामि।

इत्थमयमद्वैतवेदान्तविभागस्यायं सङ्ग्रहमयः सविशेष उपक्रमो गीर्वाणवाणीप्रणयिनां प्रमाणस्वरूपं बुभुत्सूनाञ्च मनःप्रीतये विद्यासम्पत्समृद्धये च प्रपद्येतेति सम्भावयन् प्रकाशनादौ परिश्राम्यतां यत्नसाफल्यं सर्वविधं श्रेयश्च वाग्देवतां समभ्यर्थये।



प्रो. भवेन्द्रझाः
कुलपतिः

सम्पादकीयम्

दर्शनेषु दर्शनीयतमं दर्शनमद्वैतवेदान्तदर्शनं महनीयविषयपौष्कल्यात् सर्वाण्यतिशय्य वरीवर्ति। तस्यास्याध्यापनशोधादिविषयेष्वनवरतं कार्यरतः स्वसमृद्ध्याऽद्वैतवेदान्तविभागः सर्वात्मना चकास्ति। अयं हि विभागः पुण्यश्लोकानां कुलपतिचराणां सम्प्राप्तयशःशरीराणां प्रो. वाचस्पति-उपाध्याय-महोदयानां सारस्वतं सङ्कल्पं निमित्तीकृत्य प्रो. एस्.एन्. रमामणिमहाभागा-नामाध्यक्ष्ये 2010 मार्च्मासस्य 18 तमदिनाङ्कादारभ्य 31 तमदिनाङ्कपर्यन्तं विद्वत्सङ्गोष्ठीं दशदिवसात्मिकां कार्यशालां च समायोज्य स्वोद्देश्यं पूरितवान्। तत्र विमर्शबहुलायां सङ्गोष्ठ्यां वेदान्तपरिभाषायाः प्रत्यक्षप्रमाणं योगदर्शनस्य च धारणाध्यानसमाधीनुपजीव्य महामहोपाध्यायानां डॉ. श्रीकृष्णमूर्तिशास्त्रि-आचार्यसुधाकरदीक्षितमहोदयप्रभृतीनां बहुविधानि शोधपत्राणि प्रास्ताविषत। कार्याशालायाञ्चाद्वैतदर्शनस्यातिमात्रं प्रथिताया वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदस्य शिखामणिटीकामाश्रित्य दार्शनिकजगति विश्रुतनामधेयानां प्रो. पारसनाथद्विवेदी, डॉ. मणिद्राविडप्रभृतीनां शास्त्रस्वारस्यगर्भं प्रतिपङ्क्ति-विश्लेषणं समाकर्ण्य तद्रहस्यं जिज्ञासूनामन्तेवासिनाञ्च भूयानुपकार सम्वृत्तः।

यतोऽनुमानविषयिणी कार्यशाला न्यायविभागेन प्रागेव समायोजितेत्य-द्वैतवैदान्तविभागेन प्रमाणेष्ववशिष्टयोरुपमानशब्दयोरुपमानं स्वल्पविषयं मत्वा तद्विहाय शब्दप्रमाणञ्च बहुप्रमेयसम्भृतं विचिन्त्य तद्विषयिणी राष्ट्रियसङ्गोष्ठी प्रो. शुद्धानन्दपाठकमहोदयानामाध्यक्ष्ये 2012 जनवरीमासस्य 16-17 दिनाङ्कयोः समायोजिता। तत्रापि दार्शनिकविचक्षणैर्विद्याचणैर्विपश्चिद्भिर्यथाविषयं शोधपत्राण्युपस्थापितानि। तदित्थं सम्पादितानां विविधकार्यक्रमाणां पूर्वोक्तानां शास्त्रमन्थनोत्थां सुधां शोधपत्रादिरूपां समाकलय्य प्रत्यक्षागमोल्लासनामकं ग्रन्थं विद्वत्सपर्यायां समर्पयन्नद्वैवेदान्तविभागोऽयं नितान्तं कृतार्थतां मनुते।

प्रत्यक्षपटल-शब्दपटल-विनयपटलेत्याख्यैस्त्रिभिर्भागैः परिपुष्टो ग्रन्थोऽयं पारम्परिकाणामाधुनिकानाञ्च दार्शनिकचिन्तकानां शोधपत्राणि क्रोडीकृत्य विलसति। एवं सङ्कलनात्मिकेयं सारस्वतस्थापना विद्यापीठे विद्यासम्पत्समृद्धये जिज्ञासूनां ज्ञानाभिवृद्धये विदुषाञ्च मनस्तोषाय कल्पेतेति सम्भावयन्नेतत्साकारतायै परिश्राम्यद्भ्यो धन्यवादं वितरन् वर्तमानकुलपति-महोदयानामाचार्यभवेन्द्रझामहाशयानां शोधप्रकाशनविभागाध्यक्षाणां प्रो. रमेशकुमारपाण्डेयमहाभागानां कुलसचिवानां डॉ. बी.के.महापात्राणामुप-वित्ताधिकारिणां श्रीअजयकुमारटण्डन्महोदयानां डॉ. ज्ञानधरपाठकमहोदय-प्रभृतीनाञ्च सर्वविधं साहाय्यं प्रतीक्ष्य तेभ्यः सधन्यवादं कार्तज्ञ्यञ्च वितीर्येमं प्रत्यक्षागमोल्लासनामकं ग्रन्थं सुधीजनानां करकमलेषु सोल्लासमुपहरते।

अद्वैतवेदान्तविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
कुतबसंस्थानिकक्षेत्रम्
नवदेहली - 16

विषयानुक्रमणिका

प्रत्यक्षपटलम्

क्रमः	विषयः	लेखकस्य पत्राचारसङ्केतः	
1.	**अद्वैतरीत्या प्रत्यक्षविमर्शः**	**डॉ. आर्. कृष्णमूर्तिशास्त्री** निवृत्तप्राचार्यः, मद्रपुरीसंस्कृत- महाविद्यालयः, मैलापूर्, चेन्नै - 04	1
2.	**वेदान्तदर्शनानुसारेण योग- दर्शनप्रामाण्यम्**	**डॉ. मणिद्रविडः** मीमांसाप्राध्यापकः, मद्रपुरीसंस्कृतमहाविद्यालयः, मैलापूर्, चेन्नै - 04	6
3.	**अद्वैतवेदान्ते प्रत्यक्ष- लक्षणविचारः**	**प्रो. शुद्धानन्दपाठकः** आचार्यः, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं.विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	11
4.	**विशिष्टाद्वैतवेदान्तानुसारेण प्रत्यक्ष स्वरूपम्**	**प्रो. के.ई. देवनाथन्** आचार्यः, विशिष्टाद्वैतवेदान्तविभागः, रा.सं.विद्यापीठम्, तिरुपतिः	15
5.	**अद्वैतवेदान्ते वृत्तिनिर्गमन- प्रयोजनम्**	**डॉ. सतीशः के एस्** सहायकाचार्यः, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	18
6.	**वेदान्तदर्शने प्रत्यक्षप्रमाणम्**	**डॉ. जवाहरलालः** सहायकाचार्यः, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	21

7.	**प्रत्यक्षप्रमाणम्**	**कू. वेङ्कटेशमूर्तिः** रा.सं.संस्थानम्, जनकपुरी, नवदेहली-16	**26**
8.	**प्रत्यक्षप्रमाणम्**	**डॉ. मञ्जुनाथः एस्. जी** श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्	**31**
9.	**श्रीभाष्ये सविकल्पक-निर्विकल्पकप्रत्यक्षविचारः**	**डॉ. सुदर्शनन्. एस्** सहायकाचार्यः, विशिष्टाद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**35**
10.	**भाट्टसम्मतज्ञाततास्वरूप-निरूपणम्**	**प्रो. के.ई. देवनाथन्** आचार्यः, विशिष्टाद्वैतवेदान्तविभागः, रां.सं.विद्यापीठम्, तिरुपतिः	**39**
11.	**मीमांसकमते प्रत्यक्षप्रमाणम्**	**डॉ. ए.एस्. आरावमुदन्** सहायकाचार्यः, मीमांसाविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**47**
12.	**मीमांसामते प्रत्यक्षस्वरूपम्**	**डॉ. वृन्दावनदाशः** सहायकाचार्यः, वेदविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**51**
13.	**मानमेयोदयसम्मतप्रत्यक्ष-प्रमाणविमर्शः**	**डॉ. प्रभाकरप्रसादः** सहायकाचार्यः, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**54**
14.	**भाट्टमते प्रत्यक्षप्रमाण-स्वरूपम्**	**डॉ. रामानुज उपाध्यायः** सहायकाचार्यः, वेदविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**58**

15.	**मीमांसाश्लोकवार्तिके प्रत्यक्षप्रमाणस्य स्वरूपम्**	**डॉ. गोपालप्रसादशर्मा** सहायकाचार्यः, वेदविभागः श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	60
16.	**मीमांसाशास्त्रदिशा-प्रत्यक्षमप्रमाणम्**	**डॉ. देवेन्द्रप्रसादमिश्रः** सहायकाचार्यः, वेदविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	62
17.	**कर्मकाण्डस्य प्रत्यक्ष-प्रामाण्यमीमांसा**	**डॉ. रामराज उपाध्यायः** सहायकाचार्यः, पौरोहित्यविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	64
18.	**वात्स्यायनसम्मतप्रत्यक्ष-प्रमाणविमर्शः**	**प्रो. पीयूषकान्तदीक्षितः** आचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	72
19.	**तर्कभाषाभिमतप्रत्यक्ष-प्रमाणविमर्शः**	**प्रो. हरेरामत्रिपाठी** आचार्यः, सर्वदर्शनविभागः, श्री ला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	79
20.	**न्यायवार्तिकसम्मतप्रत्यक्ष-प्रमाणविमर्शः**	**डॉ. विष्णुपदमहापात्रः** सहायकाचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	85
21.	**न्यायशास्त्रदिशा प्रत्यक्षलक्षणम्**	**डॉ. सुधांशुभूषणपण्डा** सहायकाचार्यः, धर्मशास्त्रविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	97

22. तात्पर्यटीकाभिमतप्रत्यक्ष-प्रमाणविमर्शः	**डॉ. महानन्दझाः** सहायकाचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	101
23. न्यायसिद्धान्तमुक्तावलीसम्मत-प्रत्यक्षप्रमाणविमर्शः	**डॉ. रामचन्द्रशर्मा** सहायकाचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	106
24. न्यायशास्त्रे प्रत्यक्षप्रमाण-सौन्दर्यम्	**डॉ. वेङ्कटेशशर्मा** आचार्यः, व्याकरणविभागः, श्रीस्वामिपराङ्कुशाचार्य- आदर्शसंस्कृतमहाविद्यालयः, हुलासगञ्ज, जहानाबाद	116
25. न्यायनये प्रत्यक्षप्रमाणविमर्शः	**डॉ. अरविन्दकुमारः** सहायकाचार्यः, साहित्यविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	122
26. सांख्ययोगदिशा प्रत्यक्ष-प्रमाणविचारः	**आचार्यसुधाकरदीक्षितः** निवृत्ताचार्यः, विमलनिलयः, बी-37/198 बी-1, बिर्दोपुरम्, महमूरगञ्जः, वाराणसी- 221010	124
27. धारणाध्यानसमाधीनामेक-विषयकत्वम्	**डॉ. आर्. कृष्णमूर्तिशास्त्री** निवृत्तप्राचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः, मैलापुर्, चेन्नै- 04	127
28. जैनदर्शने धर्मध्यानस्य वैशिष्ट्यम्	**प्रो. वीरसागरजैनः** आचार्यः, जैनदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	134

29.	**सांख्ययोगे समाधिस्वरूपम्**	**प्रो. महेशप्रसादसिलोडी** आचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	137
30.	**ध्यानयोगनिदर्शनम्**	**डॉ. संगीता खन्ना** सह-आचार्या, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	142
31.	**ऋते ध्यानान्न मुक्तिः**	**डॉ. अनेकान्तकुमारजैनः** सहायकाचार्यः, जैनदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	153
32.	**सांख्यनये प्रत्यक्षप्रमाणविमर्शः**	**डॉ. रविशङ्करशुक्लः** सहायकाचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	163
33.	**जैनदर्शने ध्यानस्य स्वरूपं वैशिष्ट्यञ्च**	**डॉ. कुलदीपकुमारः** सहायकाचार्यः, जैनदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	165
34.	**सांख्ययोगयोः धारणास्वरूपम्**	**डॉ मारकण्डेयनाथतिवारी** सहायकाचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	169
35.	**दर्शनेषु प्रत्यक्षप्रमाणविमर्शः**	**प्रो. एस्. एन्. रमामणिः** आचार्या, अद्वैतवेदान्तविभागः, श्री ला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	172

36.	**काव्यशास्त्रे वर्णितं प्रत्यक्षप्रमाणं बौद्धमतखण्डनञ्च**	**डॉ. सुमनकुमारझाः** सहायकाचार्यः, साहित्यविभागः, श्री ला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	178
37.	**Consciousness and its States: Exploring Dharmaraja's Concept of Vritti and Its Implications**	**Prof. Godabarisha Mishra** Professor, Dept. of Philosophy, The Madras University, Chennai	185
38.	**वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदः**	**श्रीधर्मराजाध्वरीन्द्रः**	196

(शब्दपटलम्)

1.	**प्रत्यक्षागमयोः प्राबल्य-दौर्बल्यविचारः**	**प्रो. शुद्धानन्दपाठकः** आचार्यः, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	211
2.	**शब्दप्रमाणम्**	**प्रो. एस. एन्. रमामणिः** आचार्या, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	215
3.	**आगमस्य प्रामाण्यविवेचनम्**	**डॉ. धनञ्जयकुमारपाण्डेयः** सहायकाचार्यः, वैदिकदर्शनविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी	220
4.	**वेदान्ते शब्दप्रमाणविमर्शः**	**डॉ. प्रभाकरप्रसादः** सहायकाचार्यः, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	226
5.	**शब्दवृत्तिनिरूपणम्**	**डॉ. सतीशः के. एस्** सहायकाचार्यः, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	232

6.	**उपक्रमादिलिङ्गानां तात्पर्यनिर्णायकत्वम्**	**डॉ. के. एस्. महेश्वरः** वेदान्तप्राध्यापकः, मद्रपुरीसंस्कृतमहा-विद्यालयः, मैलापूर्, चेन्नै - 04	**238**
7.	**शाब्दापरोक्षवादनिरासः**	**डॉ. सुदर्शनन्. एस्** सहायकाचार्यः, विशिष्टाद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**245**
8.	**मीमांसादिशा शब्द-नित्यत्वविमर्शः**	**डॉ. संगीता खन्ना** सह-आचार्या:, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**252**
9.	**न्यायवैशेषिकदृष्ट्या शब्दविमर्शः**	**प्रो. हरेरामत्रिपाठी** आचार्यः, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**260**
10.	**शब्दस्य प्रमाणान्तरत्वे युक्तिप्रदर्शनम्**	**डॉ. विष्णुपदमहापात्रः** सहायकाचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**266**
11.	**सांख्यन्याययोः शब्द-प्रमाणविषये वाचस्पतिमिश्र-मतचिन्तनम्**	**डॉ. जवाहरलालः** सहायकाचार्यः, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**272**
12.	**सांख्ययोगमते शब्दप्रमाणम्**	**प्रो. महेशप्रसादसिलोडी** आचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**278**
13.	**सांख्ययोगदृष्टौ आप्तप्रमाणम्**	**डॉ. रविशङ्करशुक्लः** सहायकाचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	**281**

14.	**सांख्यदर्शनरीत्या शब्द-प्रमाणस्वरूपम्**	**डॉ. मारकण्डेयनाथतिवारी** सहायकाचार्यः, सांख्ययोगविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	285
15.	**प्रमाणांशः शब्दनयः**	**डॉ. अनेकान्तकुमारजैनः** सहायकाचार्यः, जैनदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	287
16.	**जैनदर्शने शब्दप्रमाणम्**	**डॉ. कुलदीपकुमारः** सहायकाचार्यः, जैनदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	291
17.	**न्यायदर्शने शब्दस्वरूपविचारः**	**डॉ. महानन्दझाः** सहायकाचार्यः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	299
18.	**Shabda Pramana-Vishishtadvaitin View**	**Dr. K. Anantha** Assistant Professor, Dept. of Vishishtadvaita Vedanta, SLBSRS Vidyapeetha, Qutub Inst. Area, New Delhi-16	306
19.	**वेदान्तपरिभाषायाः आगमपरिच्छेदः**	**श्रीधर्मराजाध्वरीन्द्रः**	312

(विनेयपटलम्)

1.	**शब्दप्रमाणम्**	**डॉ. राजेन्द्रप्रसादद्विवेदी** शोधच्छात्रः, अद्वैतवेदान्तविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	321

2. विशिष्टाद्वैतवेदान्ते शब्दप्रमाणम् डॉ. पी.एस्.पद्मिनी श्रीधरः 324
शोधच्छात्रा, विशिष्टाद्वैतवेदान्तविभागः,
श्रीला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

3. पाणिनिव्याकरणे प्रत्यक्षस्वरूपम् डॉ. शिवप्रतापद्विवेदी 329
शोधच्छात्रः, व्याकरणविभागः,
श्रीला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

4. प्रमाणेषु शब्दप्रमाणम् श्री अरविन्दमोहनरतूडी 333
शोधच्छात्रः, अद्वैतवेदान्तविभागः,
श्री ला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

5. वेदान्तपरिभाषादिशा शब्दप्रमाणविमर्शः श्री रामसिंहः 337
शोधच्छात्रः, सर्वदर्शनविभागः,
श्रीला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

6. शब्दप्रमाणम् श्री प्रदीपकुमारः 341
शोधच्छात्रः, अद्वैतवेदान्तविभागः,
श्रीला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

7. शिखामणिटीकादृष्ट्या प्रत्यक्षपरिच्छेदः श्री सुब्रह्मण्यः 344
श्री चन्द्रशेखरेन्द्रसरस्वतीमानितविश्वविद्यालयः,
एनात्तूर्, काञ्चीपुरम्

8. शब्दप्रमाणम् श्रीमती कल्याणी साहू 349
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
श्रीला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

9. शब्दप्रमाणविचारः श्री विष्णुशङ्करमहापात्रः 352
शोधच्छात्रः, अद्वैवेदान्तविभागः,
श्री ला.बा.शा.रा.सं. विद्यापीठम्
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

10.	**विशिष्टाद्वैतसिद्धान्ते शब्दप्रमाणम्**	**श्री आलोककुमारः** शोधच्छात्रः, विशिष्टाद्वैवेदान्तविभागः श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**356**
11.	**मीमांसादर्शनदिशा वेदस्य अपौरुषेयत्वविचारः**	**श्री सुशीलकुमारः** शोधच्छात्रः, पाण्डिचेरीविश्वविद्यालयः पुदुचेरी	**359**
12.	**मीमांसादर्शने शब्दप्रमाणम्**	**श्री सन्दीपकुमारः** शोधच्छात्रः, मीमांसाविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**363**
13.	**शब्दप्रमाणविमर्शः**	**श्रीमती सियङ्काशर्मा** शोधच्छात्रः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**369**
14.	**नव्यन्यायमते शब्दप्रमाणम्**	**श्री धीरजकुमारः** शोधच्छात्रः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**375**
15.	**न्यायनये शब्दप्रमाणम्**	**श्री दीपककुमारद्विवेदी** शोधच्छात्रः, न्यायविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**379**
16.	**न्यायमते शब्दप्रमाणम्**	**श्री राजेशकुमारः** शोधच्छात्रः, न्यायविभागः श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**384**
17.	**सांख्ययोगनये शब्दप्रमाणम्**	**श्री दिनेशशर्मा** शोधच्छात्रः, सांख्ययोगविभागः, श्री ला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16	**388**

18.	**सयुक्तिकं सांख्याभिमत-शब्दप्रमाणविमर्शः**	**कु. गौतमदेवी** शोधच्छात्रा, सर्वदर्शनविभागः, श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	393
19.	**भारतीयदर्शनेषु शब्दप्रमाणम्**	**श्री सुनीलकुमारः** शोधच्छात्रः, सांख्योगविभागः श्रीला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	396
20.	**भारतीयदर्शनेषु शब्दप्रमाणम्**	**श्रीमती सुनीता कुमारी नागरः** शोधच्छात्रः, सांख्ययोगविभागः, श्री ला.बा.शा.रा.सं. विद्यापीठम् कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16	403

अद्वैतरीत्या प्रत्यक्षविमर्शः

डॉ. आर्. कृष्णमूर्तिशास्त्री

जीवः प्रमाणैः प्रमेयं परिज्ञाय स्वीयं सर्वं व्यवहारं निर्वर्तयति। अत एवोक्तं ''मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्'' इति। प्रमाणानां संख्याविषये अस्ति वादिनां विप्रतिपत्तिः। तत्र पूर्वोत्तरमीमांसकानां प्रमाणषट्कस्वीकारः। सख्यागणने च निर्विवादं प्रत्यक्षमेव प्रथमं गण्यते। अक्षाणि इन्द्रियाणि एकैकमक्षं प्रति जायमानं प्रत्यक्षमिति व्युत्पत्तिः। शब्दादयो विषयाः पञ्च क्रमेण श्रोत्रादिभिः इन्द्रियैः ज्ञायन्ते, सुखदुःखादिकं च मनसा इति निर्विवादम्। प्रत्यक्षशब्दोऽयं प्रमां प्रमाणं च कथयति। अद्वैतमतरीत्या प्रत्यक्षं किं? इति विषयः विचार्यतेऽधुना। प्रमाता, प्रमाणं प्रमेयम् इति विभागः लोकसिद्धः कथमद्वैते उपपद्यते इति विचारे एवं वेदान्तपरिभाषायां प्रतिपादितम्– अद्वैतसिद्धान्ते एकमेव चैतन्यं ब्रह्म तच्च मायोपहितम् ईश्वरः अन्तकरणोपहितं जीवः इति द्विधा व्यवहारे स्वीक्रियते। चैतन्यमेव ज्ञानं मुख्यं भवति। तच्च स्वयं सर्वदा स्वसंबद्धं सर्वं भासयति। उक्तं हि तस्य भासा सर्वमिदं विभाति इति। सर्वस्य चैतन्यैकरूपत्वे प्रमात्रादिविभागः एवं समर्थ्यते–

सर्वेषाम् अन्तःकरणं मन आख्यं सूक्ष्मपञ्चभूतसमष्टिसत्त्वगुणकार्यं पञ्चेन्द्रियसहायकं कामसङ्कल्पादिवृत्तिकं जीवस्योपाधिः, तादृशान्तः– करणावच्छिन्नं चैतन्यं प्रमाता भवति। यदा बाह्येन्द्रियद्वारा तन्मनः बहिः विषयदेशं प्राप्नोति तदा तस्मिन् मनसि कश्चन परिणामः वृत्त्याख्यो जायते। तादृशवृत्त्यवच्छिन्नं चैतन्यं प्रमाणम् इत्याख्यायते। घटादि यो बाह्यः पदार्थः शब्दादयश्च ज्ञेयाः विषया ये तदवच्छिन्नचैतन्यं प्रमेय इत्युच्यते। जाग्रदवस्थायां चक्षुरादिभिः घटादीनां सम्बन्धे सति तत्तदाकारवृत्तयो मनसि भवन्ति। तदा अयं घटः इति प्रत्यक्षज्ञानम् उत्पद्यते। अत्र च ज्ञानशब्द–

वाच्ये वृत्त्यवच्छिन्ने चैतन्ये स्वतः उत्पत्त्यभावेऽपि तादृशवृत्तेः उपाधिभूताया चक्षुर्घटसंयोगेन उत्पन्नत्वात् घटज्ञानम् उत्पन्नम् इति व्यवहारः, घटोत्पत्तौ घटाकाशोत्पत्तिवच्चैतन्यरूपस्य ज्ञानस्य अवच्छेदकरूपा वृत्तिरपि ज्ञानशब्देन उपचाराद् गृह्यते इति स्वीकारात् घटज्ञानोत्पत्तिः सुतरां सम्भवति।

प्रत्यक्षलक्षणम्–

ज्ञानं तदा प्रत्यक्षमुच्यते तस्य विषयः यदा प्रत्यक्षो भवति इति लोके व्यवहारः। घटज्ञानं तदैव प्रत्यक्षं स्वीक्रियते यदा घटः इन्द्रियसन्निकृष्टः समनस्केन इन्द्रियेण गृह्यते। यदा तु स घटः भित्तिव्यवहितो भवति घटज्ञानं परोक्षमेव। एवं विषयप्रत्यक्षाधीनज्ञानप्रत्यक्षत्वम् इति सिद्धम्। विषयाश्च घटादयः शब्दादयो वा यदा अस्मद्व्यवहिता तदा स्वात्मचैतन्येन सम्बन्धा भावात् परोक्षा एव भवन्ति। आत्मचैतन्यं तु सर्वदा प्रत्यक्षमेव, कदापि न परोक्षं इति हेतोः यत्साक्षादपरोक्षाद् य आत्मा सर्वान्तर इति उपनिषदि जोघुष्यते। अत एव स्वात्मसत्ताविषये कश्चिदपि न सन्दिग्धे अहं वा नाहं वेति, नापि विपर्येति नाहमेवेति। सर्वदा सर्वो जन्तुः अहमस्मि इति जानाति। अत एव तमेव भान्तमनुभाति सर्वम् इति मुण्डकोपनिषदि कथितम्। दक्षिणामूर्त्यष्टकेऽपि जाग्रज्ज्ञानसामान्यकाले शब्दस्पर्शादिप्रत्यक्षे जायमाने स्वचैतन्यमेव सर्वस्य भासकम् इति निरूपितम्–

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं

ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते इत्युक्तम्। प्रत्यक्षप्रमाया लक्षणं इदम् विषयावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभेदः इति।

शङ्का वृत्तिविषययोरुभयोरुपाध्योः भिन्नत्वेन कथं तयोः अभेदः इति।

समाधानम् उपाध्योः द्वयोः बहूनां वा स्वतः उपहितभेदप्रयोजकत्वं नास्ति। यतः बहूनां जलपात्राणां एकत्रैव परस्परान्तःप्रवेशद्वारा स्थापने कृते यथा तावत्पात्रावच्छिन्न आकाशः एकः भवति। परन्तु उपाध्योः उपाधीनां वा यदा भिन्नदेशस्थत्वं वर्तते तदा एव उपहितभेदप्रयोजकता भवति यथा, एवं प्रकृतेऽपि घटप्रत्यक्षकाले घटदेशे मनोवृत्तेः सत्त्वात् वृत्त्यवच्छिन्नचैतन्यस्य

घटावच्छिन्नचैतन्यस्य च एकदेशस्थत्वेन उपहितचैतन्याभेदो भवति। तथाच वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदात् घटप्रमायां प्रत्यक्षत्वं सिद्धम्।

शङ्का अतीतसुखादिस्मरणं यदा भवति, यदा वा त्वं धर्मिष्ठ इति वाक्यद्वारा स्ववृत्तिधर्मादिज्ञानं भवति तादृशस्थलद्वये अतिव्याप्तिः स्यात्। तत्र सुखादिविषयस्य धर्मादिविषयस्य च तद्वृत्तेश्च एकदेशस्थत्वात् इति।

समाधानम् प्रत्यक्षप्रमालक्षणे विषयस्य वर्तमानत्वं प्रत्यक्षयोग्यत्वं चेति विशेषणद्वयं दीयते। यथा च सुखादीनां प्रत्यक्षयोग्यत्वेऽपि स्मृतिकाले अवर्तमानत्वात् धर्मादीनां वर्तमानत्वेऽपि प्रत्यक्षायोग्यत्वात् नातिव्याप्तिः प्रत्यक्षप्रमालक्षणस्य।

एवं च इदं प्रत्यक्षज्ञानलक्षणं वृत्त्यवच्छिन्नचैतन्यस्य योग्यवर्तमान-विषयावच्छिन्नचैतन्याभेदः ज्ञानप्रत्यक्षत्वे इदमेव प्रयोजकम्। प्रायः "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं" इति यल्लक्षणं प्रसिद्धं तत् न युक्तम्। यतः वह्निमान् पर्वतः इति ज्ञाने वह्निज्ञानमपि एतल्लक्षणघटितमिति हेतोः वह्न्यंशेपि ज्ञानं प्रत्यक्षं आपतेत्। अपि च ईश्वरज्ञानस्य अजन्यत्वेन प्रत्यक्षत्वं न स्यात्। अस्मन्मते तु वह्निमान् पर्वतः' इत्यत्र वह्न्यंशे अन्तःकरणस्य पर्वतव्यवधानेऽपि वन्ह्याकारत्वस्य सत्त्वेऽपि तद्देशगमनाभावात् विषयावच्छिन्नचैतन्येन वृत्त्यवच्छिन्नस्य चैतन्यस्य भिन्नदेशस्थत्वेन उपहितयोः भेदादभेदरूपप्रयोजकाभावात् नातिव्याप्तिः। ईश्वरज्ञाने तु एतादृशप्रयोजकस्य सत्त्वेन अतिव्याप्तिरपि न भवति।

शङ्का इन्द्रियजन्यत्वस्य प्रयोजकगोष्ठावप्रवेशे त्वं सुखी इत्यादि-वाक्यजन्यज्ञानस्यापि प्रत्यक्षत्वमापतेदिति।

समाधानम् इयमापत्तिः नास्माकं दोषाय, अस्या अभीष्टत्वात्। अत एव दशमस्त्वमसि इत्यादिवाक्यजन्यज्ञानस्य सन्निकृष्टविषयकत्वेन प्रत्यक्षत्वं भवति, वृत्त्यवच्छिन्नविषयावच्छिन्नयोः चैतन्ययोः अभेदसत्त्वात्। किञ्च पर्वतो वह्निमान् इति ज्ञानं वह्न्यंशेऽपि प्रत्यक्षं स्यात् यतः तस्य संपूर्णस्य ज्ञानस्य वह्निमत्पर्वतावगाहिनः मनोरूपेन्द्रियजन्यत्वात्।

विषयप्रत्यक्षलक्षणम्

घटादेः विषयस्य प्रत्यक्षत्वं तु प्रमात्रभेदः। घटादीनां प्रमातृभिन्नत्वात् अहं घटं पश्यामि इति सर्वैः भेदस्य स्पष्टं अनुभूयमानत्वात् कथं प्रमात्रभेद इति न शङ्कनीयम्। अत्र प्रमात्रभेदो नाम न स्वरूपैक्यम् किन्तु प्रमातृसत्तातिरिक्तसत्ताकत्वाभावो विवक्षितः। स च घटादौ भवति। तथाहि सर्वोऽपि प्रपञ्चः स्वाधिष्ठाने चैतन्येऽध्यस्तः इति अद्वैतसिद्धान्तः। विषयश्चायं भगवद्गीतायाम्–

''मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्॥''

इत्यवधरितम्। एवं च सति अध्यस्तस्य अधिष्ठानात् पृथक्सत्ता नास्ति इति हेतोः घटीदीनां स्वाधिष्ठानचैतन्यात् पृथक्सत्ता नास्ति। स च घटादिः उपाधिः मनोरूपोपाधिश्च प्रत्यक्षकाले एकदेशस्थं सञ्जातम्। एकदेशस्थयोरुपाध्योः भेदकत्वात् मनअधिष्ठानचैतन्यस्य प्रमातुः घटाधिष्ठानचैतन्यस्य च अभेदात् तद्वारा प्रमातृसत्ता एव घटादिसत्ता सम्पन्ना इति हेतोः घटादीनाम् एतादृशः प्रमात्रभेदो जातः। ततश्च घटादिविषयः प्रत्यक्षो भवति। अनुमित्यादिस्थले तु अन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यस्य च भिन्नदेशोपाध्यवच्छिन्नत्वेन अभेदानापत्तेः वह्न्यादिसत्ता प्रमातृसत्तातो भिन्ना इत्यतः नातिव्याप्तिः।

शङ्का अहं, पुण्यवान् सुखानुभववत्वात् इत्यनुमितिगोचरपुण्यादीनामपि एतादृशप्रयोजकसत्त्वेन पुण्यस्य प्रत्यक्षत्वापत्तिः। पुण्यावच्छिन्नस्य चैतन्यस्य अन्तःकरणवृत्तिप्रमातृचैतन्यस्य च अभिन्नत्वात्।

समाधानम् ज्ञानप्रत्यक्षलक्षणे इव अत्रापि विषयस्य योग्यत्वं विशेषणं दीयते। पुण्यादीनां तु प्रत्यक्षयोग्यता नास्ति इति नातिव्याप्तिः।

शङ्का सर्वेषां पदार्थानां ब्रह्मचैतन्ये अध्यस्तत्वं समानम् इत्यतःकथं घटादीनामेव प्रत्यक्षयोग्यत्वं, न पुण्यादीनाम् इति कथं विनिगमनम्? विभागो वा?

समाधानम् एकचैतन्याध्यस्तत्वस्य समानत्वेऽपि केषाञ्चित्प्रत्यक्ष-योग्यत्वं, केषाञ्चिन्न इत्यत्र फलबलकल्प्यः स्वभावः एव शरणम्। अन्यथा तार्किकाणामपि अयं प्रश्नः समानः स्यात्। सुखादीनां धर्मादीनां च आत्मगुणत्वे समानेऽपि सुखादिकं प्रत्यक्षयोग्यं धर्मादिकं तु प्रत्यक्षायोग्यं इत्येवं विभागः न स्यात्।

शङ्का रूपी घट इत्येवं रूपविषयकप्रमासमये घटगतपरिणामादीनां विषयाणां प्रत्यक्षत्वं कुतो न भवति। घटगतानां रूपादीनामिव परिणामादीनामपि पूर्वोक्तरीत्या प्रमात्रभेदस्य सत्त्वात्?

समाधानम् प्रमातुः तत्तदाकारवृत्त्युपहितत्वं विशेषणं दीयते। एवं च रूपाकारवृत्तिदशायां परिणामाकारवृत्त्यभावेन परिणामाकारवृत्त्युपहितप्रमातृ चैतन्याभिन्नत्वं परिणामे नास्तीति परिणामस्य न प्रत्यक्षत्वम्।।

निगमनम् एवं रीत्या प्रत्यक्षलक्षणम् अद्वैतिभिः स्वीक्रियते। अस्य च मुख्यं प्रयोजनमिदं यत् शाब्दापरोक्षत्वसिद्धिः। दशमस्त्वमसि इति वाक्यस्येव तत्त्वमसि इत्यादिवाक्यजन्यस्यापि आत्मैक्यज्ञानस्य औपनिषदस्य साक्षात्काररूपत्वं पूर्वोक्तलक्षणस्वीकारस्य मुख्यं फलम्।

अपि च तत्त्वमस्यादिवाक्यस्य अपरोक्षज्ञानाजनकत्वे अपरोक्ष भ्रमनिवृत्तिर्नस्यात्। मनसाऽपरोक्षत्वज्ञानं भवतु इति तु न शंक्यम्; मनसः कुत्रापि प्रमाकरणत्वस्य स्वातन्त्र्येणाभावाददृष्टत्वात् वा। यथा शब्दस्य परोक्षप्रमाजनकस्वभावस्य अन्यत्रादृष्टम् अपरोक्षप्रमाजनकत्वं कल्प्यते तथा मनसोऽपि कल्प्यताम् इति तु न शङ्कनीयम्; मनसि प्रमाकरणत्वम् अपरोक्षप्रमाकरणत्वं चेति द्वयकल्पनागौरवात् शब्दे तु प्रमाकरणत्वस्य सिद्धत्वेन अपरोक्षाजनकत्वमात्रस्य कल्पनेन लाघवात्। वस्तुतस्तु दशमस्त्वमसि इत्यत्र लौकिकवाक्ये प्रत्यक्षप्रमाजनकत्वस्य दृष्टत्वाच्च।

वस्तुतस्तु लक्षणान्तरस्य दूषितत्वेन अस्मदभिमतं प्रत्यक्षलक्षणमेव सुस्थमिति सिद्धम्।।

वेदान्तदर्शनानुसारेण योगदर्शनप्रामाण्यम्

डॉ. मणिद्रविडः

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥

इति

सांप्रदायिकश्लोकेन पातञ्जलयोगदर्शनस्य चित्तमलापाकरणं परममुद्देश्यमिति स्पष्टं प्रतीयते। शुद्धचित्तस्य च तत्त्वदर्शने भवति सामर्थ्यम्। तत्त्वदर्शनं च मोक्षस्य साधनं तदिदं सर्वं श्रुत्यादिप्रमाणसिद्धम्। तथाहि कठोपनिषदि–

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ[1]॥

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥[2]

इत्यादीनि वाक्यानि उक्तमर्थं निरूपयन्ति। तां स्थिराम् अचलाम् इन्द्रियाणां स्वव्यापारपरित्यागपूर्वकब्रह्मैकाग्र्यलक्षणां धारणां योगविदः योगं मन्यन्ते। यदैव इन्द्रियाणां स्थिरा धारणा सिद्ध्यति तदैव अप्रमत्तो भवति। यतो योगः इन्द्रियवृत्तीनां प्रभवाप्ययौ। उपेक्षितो योगः इन्द्रियवृत्तीनां प्रभवः, अनुष्ठितश्च तासां लयहेतुः विषयेभ्यः प्रतिसंहृत्य चेतसः आत्मनि समाधानम् अध्यात्मयोगः तेन देवमात्मानं मत्वा धीरो हर्षशोकौ जहाति यदा ज्ञानानि ज्ञानसाधनानि पञ्चेन्द्रियाणि संकल्पविकल्पात्मकेन मनसा सह अवतिष्ठन्ते स्वव्यापारादुपरतानि भवन्ति, बुद्धिश्च न विचेष्टते, तदा तां परमां गतिमाहुः

1. कठोपनिषद् 2.6.11
2. कठोपनिषद् 2.6.12

इति उक्तवाक्यानां संक्षिप्तोऽर्थः। तथा **'यच्छेद् वाङ्मनसी प्राज्ञः'**[3] इति वचनं च साक्षादेव योगं विधत्ते। सति चैवं योगस्य ज्ञानहेतुत्वे श्रुतिसिद्धे कथं भगवता बादरायणाचार्येण ब्रह्मसूत्रेषु 'एतेन योगः प्रत्युक्तः' इति योगो निराकृतः इति भवति जिज्ञासा।

अत्रायं समाधिः बादरायणाचार्यहृदयवेदिभिः विद्वद्भिः वर्णितः। **'एतेन योगः प्रत्युक्तः**[4] इति सूत्रे 'एतेन' इति पदं पूर्वाधिकरणे **स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्'**[5] **'इतरेषां चानुलब्धेः**[6] इति सूत्रद्वयोक्तं सांख्यमतप्रसिद्धप्रधान-कारणवादनिराकणहेतुं परामृशति। तेन योगशास्त्रे यत् सांख्यवदेव प्रकृतेरूपादानत्वं, प्रकृतेर्महान् इत्यादि सृष्टिक्रमः तथा ईश्वरस्वीकृतावपि तस्य जगदुपादानत्वास्वीकारः इत्येवमादिकमेव श्रुत्यादिविरोधात् अस्मिन् सूत्रे निराक्रियते। न तु भावनाख्ययोगस्य अनेन सूत्रेण निराकरणं युक्तम्। तन्निराकरणहेतोः पूर्वाधिकरणे कस्याप्यनुक्तेः सांख्यवादनिराकरणहेतुपरामर्शक एतत् शब्दार्थत्वानुपपत्तेः। अत एव तत्सूत्रे भाष्ये ''येन त्वंशेन न विरुध्येते, तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्'' इति वेदाविरूद्धांशे तत्प्रामाण्यम् अङ्गीकृतमेव।

किञ्च ब्रह्मसूत्रे 'आसीनः संभवात्' इत्यधिकरणे योगस्मृतिनिरूपिताः पद्मस्वस्तिकाद्यासनविशेषाः प्रामाणिकत्वेन स्वीकृताः। तथा 'पञ्चवृत्तिर्मनोवद् व्यपदिश्यते (ब्र. सू.) इत्यत्रापि प्राणस्य पञ्चवृत्तिकत्वे दृष्टान्तत्वेन मनोवत्' इति योगसूत्रे प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' इति प्रसिद्धाः मनसः पञ्चवृत्तयः स्वीकृताः। इत्थं ब्रह्मसूत्रकृतैव योगस्मृतेः प्रमाणत्वेन स्वीकृतत्वात् अंशतः एव योगप्रत्याख्यानं तदभिप्रेतमित्यवश्यं वर्णनीयम्।

किञ्च भगवता ब्रह्मसूत्रकृतैव पातञ्जलयोगसूत्रस्य भाष्यं विरचितमिति प्रथा। ततश्च योगशास्त्रस्याप्रामाण्यं चेद्विवक्षितं तदा तत्कृतयोग-सूत्रभाष्यस्य वैयर्थ्यमेव स्यात्। अतश्च योगसूत्रवृत्तौ नारायणतीर्थपादा आहुः

3. कठोपनिषद् 1-3-13
4. ब्रह्मसूत्रम् 2.1.3,
5. ब्रह्मसूत्रम् 2.1.1,
6. ब्रह्मसूत्रम् 2.1.2,

''स्वतन्त्रसत्यत्वमुखं प्रधाने, सत्यं च चिद्भेदमभेदवाक्यैः।
व्यासो निराचष्ट न भावनाख्यं योगं स्वयं निर्मितब्रह्मसूत्रैः॥''

इति। प्रधाने सांख्ययोगाभिमतमूलप्रकृतौ स्वतन्त्रत्वसत्यत्वादि तथा तदभिमतमात्मभेदस्य पारमार्थिकत्वम् इत्येतदेव एतेन योगः प्रत्युक्त इति सूत्रेण व्यासो निराकृतवान्। वेदान्तसिद्धान्ते प्रकृतेः ईश्वराधीनत्व-मिथ्यात्वादिस्वीकारात्, आत्मभेदस्यापारमार्थिकत्वाच्च। भावनाख्ययोगस्य निराकरणं तु व्यासस्य नाभिप्रेतमिति तदर्थः। इत्थं योगस्य चित्तैकाग्रतादिसाधनत्वे स्वीकृतेऽपि वेदान्तदर्शने अधिकारिविशेषं प्रत्येव योगापेक्षा, न सर्वेषामिति व्यवस्था स्वीकृता। यथोक्तं वासिष्ठे–

द्वौ क्रमौ चित्तनाशस्य योगे ज्ञानं च राघव।
योगस्तद्वृत्तिरोधश्च, ज्ञानं सम्यगवेक्षणम्।
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः॥

इति। अत्र न्यायरत्नावल्यां ब्रह्मानन्दसरस्वतीस्वामिनां विवरणम्– ''चित्तनाशस्य=चित्तादर्शनप्रयुक्तस्य शुद्धात्मदर्शनस्य। क्रमौ = साधनानुष्ठानक्रमेण क्रियमाणौ उपायौ इति। कीदृशस्याधिकारिणः योगापेक्षेति स्वाराज्यसिद्धितद्व्याख्यानयोः श्रीगङ्गाधरेन्द्रसरस्वतीस्वामिपादाः इत्थं व्युत्पादयांबभूवुः। यः बलवत्तरप्रारब्धवशात् दृढतरासंभावनादिदोषात् विचारितमप्यात्मतत्त्वं न अवगच्छति यश्च दृढतररागद्वेषादिद्वैतसंस्कार-व्याकुलचित्तः विचारितेऽपि आत्मतत्त्वे चित्तस्थैर्यं न लभते, तयोः मुमुक्षावतोः मध्ये प्रथमः श्रवणाद्यावृतिं कुर्यात् द्वितीयस्तु योगाभ्यासेन चित्तनिग्रहं कुर्यादिति। तथा चोक्तम्–

इत्थं संबोधितस्याप्यनवहितमतेः यस्य बोधो न वृतः
स स्याद् भूयो विचारव्यसनवशमनाः सहायः स्वतश्च।
अक्षात् विक्षेपशान्त्यै चपलमपि मनो लालनैर्वा हठाद्वा
रुद्ध्वा ध्यायेदनन्तं परमसुखचिदात्मानमेकं विविक्ते॥

इति। अत्र पूर्वार्धे बोधार्थं श्रावणाद्यावृत्तिः कर्तव्यतयोच्यते। उत्तरार्धे तु कृतश्रवणादेः चित्तस्थैर्यार्थं योगः उपदिश्यते। तत्रापि मनोनिग्रहे उपायद्वयमाह लालनैर्वा हठाद्वेति। यथा दुर्दान्तस्य पशोः अभिमतदेशप्रवेशनेन बन्धनार्थं

तृणादिप्रदर्शनकण्डूयनादिः एकः लालनोपायः तथा लगुडप्रहारादिः दण्डोपायः अपरः। एवमेव चित्तस्य बहिः प्रवणतानिवारणेन आत्मप्रवणतासंपादने अभ्यासवैराग्ये, विषयदोषानुसंधानम् अमानित्वादयो धर्माः, असङ्गात्मभावना, इत्यादिः लालनोपायः। अयं राजयोगाख्यः। तथा द्वितीयः हठयोगाख्यः। इत्थं श्लोकेन दर्शितः

मुक्त्वा सङ्गं सहिष्णुः शुचिहितमितभुग् योगशास्त्रार्थदर्शी
पुण्ये निर्दोषदेशे यमनियमदृढः स्वासनस्थः प्रसन्नः।
प्राणायामक्रमेणाहृतचपलमनःस्थूलसूक्ष्मे निरुध्य
ध्यायन्नैकात्म्यसौख्यस्थिरगलितमनाः मोहबन्धं छिनत्ति॥
इति।

भगवद्गीतास्वपि षष्ठाध्याये चित्तस्यात्मनि स्थैर्यार्थं योगो विस्तरेण वर्णितः। तत्फलं चोक्तम्–

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति॥

सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते॥

तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्॥ इति च

अत्र च योगसेवया चित्तस्योपरमो नाम संप्रज्ञातसमाधिपाटवेन मनसः अयत्नतः विषयाकारपरिणामाभावः अभिप्रेतः। सुखस्य बुद्धिग्राह्यत्वं निरुद्धमनोऽभिव्यक्तत्वम्, अतीन्द्रियत्वं च विषयेन्द्रियसंपर्काजन्यत्वम्। एवं च तदा द्वैतभानाभावात् परमार्थात्मस्वरूपाद् योगी न विचलति। तथा पातञ्जलसूत्राणि योगश्चित्तवृत्तिनिरोधः तदा द्रष्टुः स्वरूपेऽवस्थानम् इत्यादीनि।

इदन्त्ववधेयं निरोधसमाधिरूपस्य योगस्य पुण्यविशेषजननद्वारैव आत्मसाक्षात्कारहेतुत्वम्। प्रमाणजन्यत्वात् साक्षात्कारप्रमायाः। तदपि उक्तं निर्विचारवैशद्येऽध्यात्मप्रसादः। ऋतम्भरा तत्र प्रज्ञा। श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् इति। निर्विचारः = निर्विकल्पकसमाधिः। तस्य वैशारद्ये = पाटवे अध्यात्मप्रसादः = अत्यन्तसत्त्वोद्रेकः भवति। ततः ऋतम्भरा = सत्यमेव विषयीकुर्वती प्रज्ञा जायते। सा च शब्दानुमानविषयाभ्यामन्यविषया, ब्रह्मणः शक्त्या शब्दबोध्यत्वाभावात् अनुमानाद्यविषयत्वाच्च ब्रह्मविषया प्रज्ञेत्यर्थः। विस्तरस्तु ग्रन्थेष्वेव द्रष्टव्य इति शम्।

अद्वैतवेदान्ते प्रत्यक्षलक्षणविचारः

प्रो. शुद्धानन्दपाठकः

प्रत्यक्षलक्षणविचारेऽस्मिन् प्रत्यक्षपदस्य त्रिषु विषयेषु प्रयोगो जायते यथा प्रत्यक्ष्यते इति प्रत्यक्षमर्थात् ज्ञानम्। प्रत्यक्ष्यते अनेनेति प्रत्यक्षमर्थात्प्रमाणम्। अक्षमक्षं प्रति वर्तत इति प्रत्यक्षमर्थाद् विषयः। अत्र वेदान्तपरिभाषायां ज्ञानगतप्रत्यक्षत्वप्रयोजकं विषयगतप्रत्यक्षत्वप्रयोजकमाधारीकृत्य चर्चा चलति। इतः पूर्वं तार्किकोक्तं 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तदिन्द्रियजन्यत्वादिज्ञानं प्रत्यक्षत्वस्य न प्रयोजकं यतो हि ईश्वरप्रत्यक्षेऽव्याप्तं तथाऽनुमितौ अतिव्याप्तमतः वेदान्ते किं प्रत्यक्षत्वस्य प्रयोजकमिति प्रश्नः उदेति तदा समाधीयते ज्ञानगतप्रत्यक्षत्वस्य प्रयोजकमस्ति प्रमाणचैतन्यविषयचैतन्ययोरभेदस्यैव तत्प्रयोजकत्वमिति। वेदान्ते चैतन्यैकत्वात्कथमत्र चैतन्यस्य भेदः कथ्यते? तत्रोत्तरं दीयते स्वरूपतश्चैतन्यस्याभेदेप्यौपाधिकभेदमादाय चैतन्यस्य भेदो वर्तते यथा अन्तःकरणावच्छिन्नचैतन्यं प्रमातृचैतन्यं, अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यं, घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यमिति। अनेन प्रकारेण चैतन्यं त्रिविधं भवति

यथा तडागोदकं कुल्यात्मना केदारान् प्रविश्य केदाराकारमायाति तथा तैजसमन्तःकरणं घटादिचक्षुसंयोगे सति चक्षुर्द्वारेण निर्गत्य घटादिविषयाकारेण परिणमते। तादृशपरिणाम एव वृत्तिरूपप्रमाणमुच्यते। ततश्च विषयावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्य च एकता भवति, घटवृत्तिरूपोपाध्योर्बहिरेकत्रावस्थानेन भेदकत्वाऽभावात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो मठाकाशान्न भिद्यते। तथा च ''अयं घटः'' इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्नचैतन्यस्याऽभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वं भवति, न तु

घटरूपांशे न च घटपरिमाणांशे प्रत्यक्षत्वं भवतीति। अन्यदपि सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमतः एकदेशस्थितोपाधिद्वयावच्छिन्नत्वान्नियमतः 'अहं सुखी' इत्यादिज्ञानस्य प्रत्यक्षत्वं भवति।

अनुमितिस्थले तु वन्ह्याकारवृत्तेर्बहिर्निर्गमनाऽभावेन चक्षुराद्य-सन्निकर्षाद् वन्हिविषयकं ज्ञानं न प्रत्यक्षम्, तत्रोपाध्योर्भिन्नभिन्न-देशस्थितत्वात्।

न चैवं स्ववृत्तिसुखादिविषयकस्मरणस्यापि सुखाद्यंशे प्रत्यक्षं स्यादिति वाच्यम्, स्मृतसुखस्याऽतीतत्वेन वृत्तेश्च वर्तमानतयोपाध्योर्भिन्नकालीनत्वेन तत्तदवच्छिन्नचैतन्ययोरपि भेदात् उपाध्योरेकदेशस्थत्वे सति एककालीन त्वस्यैवोपधेयाभेदप्रयोजकत्वस्य स्वीकारात्। न चैवं तर्हि भिन्न कालीनयोरेकदेशस्थितयोर्घटमठयोर्भेदकत्वापत्तिः। उपधेयाभेदकाले उपाध्योः एककालत्वविवक्षायान्तु उपधेयाभेदसिद्धावेककालीनोपाधिद्वयावच्छेदसिद्धि स्तत्सिद्धौ चोपधेयाभेदसिद्धिः इत्यन्योन्याश्रयश्च स्यादिति वाच्यम्, विषये वर्तमानत्वविशेषणदानेन अदोषात् तथा च प्रमाणचैतन्यस्य वर्तमानकालीन विषयावच्छिन्नचैतन्याभेदः प्रत्यक्षप्रयोजकः इति फलितम्। न च वर्तमानस्य विषयविशेषणत्वेऽपि धर्माधर्मविषयकशाब्दादिज्ञानेऽतिव्याप्तिः, तयोर्वर्तमानत्वादिति वाच्यम्, योग्यत्वस्यापि विषयविशेषणात्। एवञ्च धर्मादेरयोग्यत्वान्न तत्राऽतिव्याप्तिः। तथा च तत्तदिन्द्रिययोग्यवर्तमान-विषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यविच्छन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्।

अधुना विषयगतप्रत्यक्षत्वस्य प्रयोजकविषये चर्चा क्रियते। तत्र इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति स्वीकारेऽनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरज्ञानस्याऽनिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्चेत्यादियुक्त्या इन्द्रियार्थसन्निकर्षजन्यत्वं प्रत्यक्षत्वप्रयोजकं वेदान्तिभिर्निरस्तम्। तर्हि प्रत्यक्षत्वप्रयोजकं किमिति जिज्ञासायां ज्ञानगतप्रत्यक्षत्वप्रयोजकं पूर्वं प्रतिपादितमधुना विषयगतप्रत्यक्षत्वप्रयोजकं किमिति प्रतिपाद्यते। तत्र घटादेः विषयस्य प्रत्यक्षत्वप्रयोजकं नाम प्रमातृचैतन्याऽभिन्नत्वम्। ननु घटमहं

पश्यामीति भेदाऽनुभवविरोधेन घटावच्छिन्नचैतन्यस्य प्रमात्रभिन्नत्वं, जडत्वेन घटादेर्विषयस्य वा प्रमात्रभिन्नत्वं कथं सम्भवेदिति चेन्न, तत्राऽभिन्नत्वपदेन प्रमातृसत्ताऽतिरिक्तसत्ताकत्वाभावस्य विवक्षितत्त्वात्। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्तायाः आरोपितसत्तायाः अनङ्गीकारात्। विषयचैतन्यस्य तडागोदकस्य कुल्यात्मना निर्गमनरीत्याऽन्तःकरणस्य निर्गमनसम्भवेन तदवच्छिन्नचैतन्याऽभिन्नत्वमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटोदेरपरोक्षत्वम्।

अनुमित्यादिस्थले त्वन्तःकरणस्य वन्ह्यादिदेशनिर्गमनाभावेन वन्ह्यवच्छिन्नचैतन्यस्य प्रमातृसत्ता अनात्मकतया वन्ह्यादिसत्ता प्रमातृसत्तातो भिन्नेति न तत्राऽतिव्याप्तिः। एवं धर्माऽधर्मादेरनुमित्यादिस्थले धर्मादीनां प्रत्यक्षत्वापत्तिवारणाय योग्यत्वस्यापि विषयविशेषणं देयम्। तथा च योग्यविषयस्य प्रमात्रभिन्नत्वलक्षणस्य प्रत्यक्षत्वस्य धर्मादावभावान्नाति-व्याप्तिरिति।

न चैवं 'रूपी घट' इति घटगतरूपप्रत्यक्षदशायां तद्गतपरिमाणादेरपि प्रत्यक्षत्वापत्तिः, घटगतरूपपरिमाणादीनां समानचैतन्याऽध्यस्तत्वेनैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेददशायां परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नत्वेन परिमाणादिसत्तायाः प्रमातृसत्ताऽतिरिक्तसत्ताकत्वाभावादिति वाच्यम्, तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात् रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन तत्र परिमाणाद्याकारवृत्त्युपहितप्रमातृसत्ता ऽतिरिक्तसत्ताशून्यत्वाभावान्नातिव्याप्तिः।

एवञ्चानवस्थाभयेन वृत्तिगोचरवृत्त्यनङ्गीकारेऽपि घटमहं जानामि इति वृत्तेर्वृत्त्यन्तराऽनपेक्षत्वरूपस्य स्वविषयत्वस्याऽभ्युपगमेन स्वविषयवृत्त्यु-पहितप्रमातृचैतन्यसत्ताऽभिन्नसत्ताकत्वस्य तत्राऽपि सत्त्वान्नाऽव्याप्तिः। न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाऽभ्युपगमे केवलसाक्षिविषयत्वाऽभ्युपगम-विरोधः इति वाच्यम्, केवलपदं न वृत्तिनिरासार्थमपि तु इन्द्रियानुमानादिप्र माणव्यापारनिवृत्यर्थमिति स्वीकारे विरोधाऽभावात्। अत एवाहंकारटीकाया-माचार्यप्रकाशात्मयतिभिरहंवृत्त्यवच्छिन्नमेवाऽन्तःकरणं चैतन्यविषयभावमापद्यते

इत्यादिना अहमाकारान्तःकरणवृत्तिरङ्गीकृता। अत एव प्रातिभासिकरजतस्थले रजताकाराऽविद्यावृत्तिः सर्वज्ञमुनिना स्वीकृता। तस्माद् घटादिविषयाकारवृत्त्यु-पहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगः संयुक्ततादाम्यः संयुक्ताभिन्नतादात्म्यसम्बन्धानां चैतन्याऽभिव्यञ्जकवृत्तिजनने विनियोगः इति।

विषयगतप्रत्यक्षस्य चैतन्याऽभिव्यञ्जकवृत्तिजनने संयोगसम्बन्धः स्वीक्रियते। विषयगतरूपप्रत्यक्षस्य कृते चैतन्याऽभिव्यञ्जकवृत्तिजनने संयुक्ततादात्म्यसम्बन्धो भवति। विषयगतरूपत्वप्रत्यक्षस्य कृते चैतन्याभिव्य-ञ्जकवृत्तिजनने संयुक्ताभिन्नतादाम्यसम्बन्धः स्वीक्रियते। घटाभाववद्रूपत्व मित्यत्र चैतन्याऽभिव्यञ्जकवृत्तिजने नैयायिकवत् यदि घटाभावस्य विशेष णरूपत्वस्वीकारे। संयुक्ताभिन्नतादात्म्यविशेषणतासम्बन्धो भवति। घटाभावस्याऽधिकरणस्वरूपतास्वीकारे संयुक्ताऽभिन्नतादात्म्यसम्बन्धः स्वीक्रियते। रूपत्वे घटाभावः'' इत्यत्र घटाभावस्य विशेष्यतास्वीकारे संयुक्ताभिन्नतादात्म्यविशेष्यता सम्बन्धः स्वीक्रियते यदि अधिकरणस्वरूपता स्वीक्रियते चेत् संयुक्ताऽभिन्नतादात्म्यसम्बन्धः एव स्वीकर्तुं शक्यते। शब्दगतप्रत्यक्षत्वस्य कृते चैतन्याऽभिव्यञ्जकवृतिजनने तादात्म्यसम्बन्धो भवति तथा च शब्दत्वगतप्रत्यक्षत्वस्य कृते अभिन्नतादात्म्यसम्बन्धः स्वीक्रियत इति। शम्।

विशिष्टाद्वैतवेदान्तानुसारेण प्रत्यक्षस्वरूपम्

प्रो. के. ई. देवनाथन्

प्रत्यक्षमनुमानं शब्द इति प्रमाणत्रयमभ्युपगच्छन्ति विशिष्टाद्वैतिनः। उक्तं हि मनुना–

प्रत्यक्षमनुमानं च शास्त्रं च विवधागमम्।
त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता॥ इति

शौनकोऽपि ''दृष्टानुमानागमजं ध्यानस्यालम्बनं त्रिधा'' इति प्राह। श्रुतिश्च स्मृतिः **प्रत्यक्षैतिह्यमनुमानश्चतुष्टयम् इत** चतुष्ट्वानुवादः न विरुध्यते। स्मृतिःकरणस्य वस्तुतः पृथक्प्रमाणत्वाभावात्।

प्रत्यक्षप्रमाया लक्षणम्

साक्षात्कारिप्रमा प्रत्यक्षम्। साक्षात्त्वं च जातिरूपः उपाधिरूपो वा कश्चित् ज्ञानस्वभाविशेषः स्वात्मसाक्षिकः।

ज्ञातकरणजज्ञानस्मृतित्वरहिता मतिः।
अपरोक्षेति निष्कर्षे नाव्याप्त्यादिप्रसन्जनम्॥

घटं साक्षात्करोमि, पटं साक्षात्करोमि इति हि अनुभवः लोकानाम्। अयं श्लोकः उपाधित्वपक्षे। तत्पक्षे ज्ञातकरणजज्ञानत्वाभावे सति स्मृतित्वाभावे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम्। अनुमितिशाब्दबोधयोः वारणाय प्रथमदलम्, स्मृतेः वारणाय द्वितीयदलम्। घटादिवस्तुवारणाय ज्ञानत्वमिति। इन्दियस्यापि ज्ञातत्वं कदाचित् संभवति इति ज्ञातकरणेऽस्मदादिप्रत्यक्षेऽस्मदादिप्रत्यक्षेऽति व्याप्तिः अतः ज्ञायमानत्वावच्छिन्नकरणताकनिरूपकत्वशून्यत्वप्रथमदलार्थः। इन्द्रियस्य ज्ञायमानत्वेन कारणत्वं नास्तीति यावत्। ज्ञायमानलिङ्गशब्दयोः करणत्वाभिप्रायेणेदम्, ज्ञानस्य करणत्वपक्षे तु ज्ञानकरणकस्मृतित्वरहितामतिः इति पठनीयम्। साक्षात्त्वं द्विधा नित्यमनित्यं च। ईश्वरनित्यज्ञानादिनिष्ठं

नित्यम्। अस्मदादिज्ञाननिष्ठं त्वनित्यम्। अस्मदादिप्रत्यक्षं द्विधा योगिप्रत्यक्ष मयोगिप्रत्यक्षं चेति। तत्र योगिप्रत्यक्षं प्रकृष्टादृष्टाविशेषजन्यम्। तत् युक्ता वस्थायां मनोमात्रजन्यम्। वियुक्तावस्थायां तु बाह्येन्द्रियजन्यमपि। तच्च बुभुत्सादिप्रतिनियतम् आगमैकसिद्धं च। इन्द्रियार्थसन्निकर्षः द्विधाविभक्तः। द्रव्येषु संयोगः। द्रव्याश्रितेषु रूपादिषु संयुक्ताश्रयणम्। उक्तं च तत्त्वरत्नाकरे

अत्र वृद्धा विदामासुः संयोगः सन्निकर्षणम्।
संयुक्ताश्रयणं चेति यथासँभवमूह्यताम्। इति भट्टपराशरैः

प्रत्यक्षं पुनरपि द्विविधम् सविकल्पकं, निर्विकल्पकं चेति।

सप्रत्यवमर्शं प्रत्यक्षं सविकल्पकं संस्काराधीनविषयताश्रयः संस्कार जन्यप्रत्यक्षम् इति यावत्। संस्कारप्रयोज्यविषयत्वानिरूपकं प्रत्यक्षं निर्विकल्पकम्। निर्विकल्पकमपि विशिष्टविषयकमेव। मूकादिज्ञानमपि संज्ञादि विकल्परहितमपि विशिष्टवस्तुविषयकमेव। विशिष्टज्ञानं विशेषणज्ञानपूर्वकम् विशिष्टज्ञानत्वात्, सुरभिचन्दनम् इति ज्ञानवत् इत्यनुमाने विशेषणाग्राहकेन्द्रिय ग्राह्यविशेषत्वमुपाधिः। विशेषणाग्राहकत्वं च विशेषणनिष्ठलौकिक विषयताशालिप्रत्यक्षाजनकत्वम्। तेन चक्षुषः सौरभापनीतभानहेतुत्वेऽपि न क्षतिः। स्वरूपग्रहणेनैव सम्बन्धस्य गृहीतत्वात् न तद्ग्रणात् पूर्वं निष्प्रकारक ज्ञानस्य संभवः। समवायवादेऽपि तस्यैव गृह्यमाणस्य भासमानवैशिष्ट्यं प्रतियोगित्वानुयोगित्वसम्पादकत्वम्। योग्यस्य सन्निकृष्टगृह्यमाणसम्बन्धिनः सम्बन्धस्याग्रहणानुपपत्तेः निर्विकल्पके सम्बन्धग्रहणमुपपद्यत एव। अन्यथा नित्यं तदग्रहापातात्। प्रथमाक्षसन्निपातजन्याबुद्धिः विशिष्टविषया, बुद्धित्वात्, संप्रतिपन्नवत् इत्यनुमानमपि सिद्धान्तानुगणं ग्राह्यम्।

सविकल्पकं न प्रत्यक्षमिति केचित्। तत्र साक्षात्कारित्वबाधा भावेन तस्यापि प्रत्यक्षत्वस्य युक्तत्वात्। ''निर्विकल्पकमेकजातीयेषु द्रव्येषु प्रथमपिण्डग्रहणम् ''इतिभाष्यम् उदाहरणपरं योजनीयम्। इदं लक्ष्य विशेषप्रदर्शनपरमेव। इदमेव लक्षणकथनं चेत्। अनुवृत्तविषयेषु सेयं गौः सुरभिचन्दनम् इत्यादिज्ञानेषु सविकल्पकत्वानुपपत्तिः स्यात्।

निर्विकल्पकमपि सविशेषविषयकं चेत्, निर्विकल्पकमिति शब्दः

कथं तत्र युज्यत इति चेत्, अल्पधने दारिद्रव्यवहारवदिति। प्रज्ञापरित्रणे

अत्रेन्द्रियानपेक्षं यज्ज्ञानमर्थावभासकम्।
दिव्यं प्रमाणमित्येतत् प्रमाणज्ञाः प्रचक्षते॥

परमेश्वरविज्ञानं मुक्तानां च धियस्तथा।
सञ्जयार्जुनवाल्मीकिप्रभृत्यार्षधियोऽपि तत्॥ इति

अदिव्येन्द्रियानपेक्षं ज्ञानं कथितम्। तत् आर्षाभिमतं योगिप्रत्यक्षेऽन्तर्भवति सञ्जयार्जुनयोः यत् दिव्यं प्रत्यक्षं तत्र अप्राकृतेन्द्रियजन्यम् इति यावत् निर्विकल्पकशब्देन संस्कारनिरपेक्षेन्द्रियजन्यं ज्ञानं विवक्षितम् इति कथनेन भाट्टसम्मतं सम्मुग्धाकारत्वं, नैयायिकसम्मतं प्रकारताविशिष्टज्ञानत्वादिरूपं, प्राचीननैयायिकसम्मतं जातिमात्राविषयकज्ञानत्वं च न विशिष्टाद्वैतिसम्मतमिति लभ्यते। भवतः यज्ज्ञानं तत् करणनिरपेक्षमेव जायते यो वेति युगपत् सर्वं प्रत्यक्षेण सदा स्वतः। इति श्रीनाथमुनिपद्यानुसारात्। एवं न्यायपरिशुद्ध्यनुसारेण संक्षेपः कृतः॥

अद्वैतवेदान्ते वृत्तिनिर्गमनप्रयोजनम्

डॉ. सतीशः के एस्

अद्वैतवेदान्ते ज्ञानं परं ब्रह्मैव। सत्यं ज्ञानमनन्तं ब्रह्म[1], विज्ञानमानन्दं ब्रह्म[2] इत्यादिश्रुतेः। एतदनाद्यनन्तम्। एतदेव यदा विषयाकारबुद्धिवृतौ प्रतिफलति तदा घटादितद्विषयबोधो भवति। तस्या अपि आत्मचैतन्य-प्रफिलनग्राहकबुद्धिवृतेर्ज्ञानमिति व्यवहारो भवति[3]। विषयाकारबुद्धिपरिणाम एव वृत्तिशब्दग्राह्यः। अद्वैतवेदान्ते प्रत्यक्षप्रमाणम्।

प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्[4]। अद्वैतवेदान्ते सर्वावभासकं स्वयंप्रकाशमात्मचैतन्यमेव प्रत्यक्षप्रमा। यत्साक्षादपरोक्षाद्ब्रह्म[5] इति श्रुतेः। एकमेवेदमुपहितत्वेन रूपेण त्रिविधं व्यवह्रियतेप्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यमिति। तत्रान्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। अन्तःकरण-वृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्। विषयावच्छिन्नं चैतन्यं विषयचैतन्यम्।[6] अत एव चैतन्यस्यानादित्वाद्घटादिविषयकं प्रत्यक्षं ज्ञानं चैतन्यरूपं कथं जायते इति संशयो न कार्यः। तस्य स्वाभिव्यञ्जकान्तःकरणवृत्तेर्जायमानत्वेन तस्य जातत्वेन व्यवहारः। अस्य प्रत्यक्षज्ञानस्य प्रयोजकन्तु प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदो तत्करणं प्रत्यक्षप्रमाणम्[7]।

---

1. तैत्तिरीयोपनिषद् - 2/1
2. बृहदारण्यकोपनिषत् - 3/9/28
3. तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारेण परिणामिन्या ये शब्दाद्याकारावभसास्त आत्मविज्ञानस्य विषयभूता उत्पद्यामाना एवैवात्मविज्ञानेन व्याप्ता उत्पद्यन्ते। तस्मादात्मविज्ञानावभास्या श्च ते विज्ञानशब्दवाच्या श्च - तैतिरीयोपनिषच्छाङ्करभाष्यम्- 2/1
4. वेदान्तपरिभाषा- पृष्ठसंख्या - 43
5. बृहदारण्यकोपनिषत् 3/4/1
6. वेदान्तपरिभाषा - पृष्ठसंख्या- 62
7. वेदान्तपरिभाषा- पृष्ठसंख्या- 61

अयमत्र प्रत्यक्षज्ञानोत्पत्तिक्रमः – सावयवमन्तःकरणं सूर्यरश्मिवत्तैजसत्वाच्चक्षुरादीन्द्रियद्वारा निर्गत्य घटादिविषयं प्राप्य तत्तद्विषयाकारेण परिणमते। मनः सावयवं सादित्वात् घटवत्। अयं विषयाकारान्तःकरणपरिणामो वृत्तिरित्युच्यते। ततश्च तत्तद्विषयावच्छिन्नदेशे विषयतद्वृत्योरवस्थानं भवति। अन्तःकरणस्य बहिर्निर्गमनाद्वृत्तेरपि विषयावच्छिन्नचैतन्ये समवधानादुपधेययोर्विषयावच्छिन्नवृत्त्यवच्छिन्नचैतन्ययोरभेदो भवति। ततस्तद्विषयकज्ञानस्य प्रत्यक्षत्वं भवति, तत्करणं वृत्तिः। घटदेशस्थत्वेन घटावच्छिन्नचैतन्यस्य तद्वृत्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटाकारांशे प्रत्यक्षत्वम्। एवमुक्ते सुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिः। सुखाद्यवच्छिन्नचैतन्यस्यत तद्वृत्त्यवच्छिन्नचैतन्यस्यचैक देशस्थिततत्वेनाभेदात्। ततश्च तत्रातिव्याप्तिः स्यात्। अतो वर्तमानत्वं विषयविशेषणं देयम्। अतः स्मर्यमाणस्य सुखादेरवर्तमानान्न दोषः।

एवमपि धार्मिको भवानधार्मिको भवानित्यादिवाक्यजन्यवृत्यवच्छिन्नचैतन्यं प्रति धर्माधर्मयोर्वर्तमानत्वेनोपाधितया तस्य तदवच्छिन्नचैतन्याभिन्नतया तत्रातिव्याप्तिः। स्यात्। अतो योग्यत्वमपि विषयविशेषणं देयम्। धर्माधर्मयोः प्रत्यक्षायोग्यत्वान्न दोषः। तथा च ततदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्।[8]

वृत्तिनिर्ममनविचारः

अन्तःकरणस्य विषयाकारपरिणामो वृत्तिरित्युक्तम्। प्रत्यक्षस्थलेऽन्तः करणे चक्षुरादीन्द्रियद्वारा विषयदेशं गत्वा विषयाकारेण परिणमतीत्युक्तम्। तत्कुत एवमिति तन्निर्गमनप्रयोजनमिदानीं निरूप्यते–

प्रत्यक्षस्थले चैतन्यमेव प्रत्यक्षप्रमेत्युक्तम्। वस्तुतस्तु सर्वोऽपि विषयश्चैतन्येनैवावभास्यते। अयं वस्तुप्रकाशश्चैतन्यकृत एव ज्ञानमित्युच्यते। ब्रह्मचैतन्यं च सर्वत्र सुलभमेव। अत इन्द्रियादिसन्निकर्षं विना वृत्तिं विनापि सर्वस्य सर्वदा सर्वविषयकं ज्ञानं भवत्विति कदाचित् प्रश्नो भवेत्। अत्रोच्यते–ब्रह्मचैतन्यं प्रकाशरूपं सदपि स्वसंसृष्टमेवावभासयति।

---

8. वेदान्तपरिभाषा– पृष्ठसंख्या – 82

जीवतैतन्यमपि तन्न्यायेन स्वसंसृष्टमेवावभासयेत्। किन्तु यथा ब्रह्मचैतन्यं सर्वोपादानत्वात् सर्वसंसृष्टं सदवभासयति। न तथा जीवः सर्वजगदुपादानम्। तस्मात् स न सर्वसंसृष्टो विषयमवभासयितुमर्हति।

जीवोऽविद्योपधिक इति पक्षे सर्वगतः। अन्तःकरणोपाधिक इति पक्षे परिच्छिन्नः। अविद्योपाधिकत्वपक्षे तस्य प्रपञ्चानुपादनत्वादसङ्गित्वेऽपि स्वभावतोऽन्तःकरणेन संसर्गो भवति[9]। यथा गोत्वसामान्यमश्वादिव्यक्त्यसङ्ग्यपि स्वभावतः सास्नावद्व्यक्तौ संसृज्यते तद्वत्। तदुक्तम्–

बुद्धौ संसृज्यते जीवः सर्वगो व्यक्तिजातिवत्।
अन्यैस्तु वृत्त्युपारूढो ज्ञाता विवरणे स्थितः॥[10]

तथा च यदान्तःकरणस्य परिणामो वृत्तिरूपश्चक्षुरादिद्वारा विषयपर्यन्तं निर्गत्य विषयं व्याप्नोति तदा तत्संसृष्टो जीवो विषयसंसर्गलाभेन तत्प्रकाशयति। अतो वृत्तेरात्मचैतन्यस्य विषयसम्बन्धापादकत्वं प्रयोजनम्।

जीवस्यान्तःकरणोपाधिकत्वपक्षे तु जीवः परिच्छिन्नः। अतस्तस्य विषयसंसर्गाभावात्स न घटादिकमवभासयति। वृत्तिद्वारा यदा विषयसंसर्गस्तदा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तं प्रकाशयतीत्यभेदाभिव्यक्तिर्वृत्तेः प्रयोजनम्।

जीवस्य सर्वगतत्वपक्षेऽपि तस्याविद्यावृत्तत्वाद्विषयस्याप्यविद्यावृत्तत्वाद्विषयप्रकाशः। वृत्त्या तु विषयसम्बन्धेनावरणतिरोभावे सत्यभेदाभिव्यक्त्या विषयं प्रकाशयतीत्यावरणाभिभवार्था वृत्तिरित्युच्यते। तदुक्तम्–

अथवा सर्वगोऽविद्यावृतोऽसौ न प्रकाशते।
बुद्धावनावृतो वृत्तिभग्नावरणभासकः॥[11] इति।

---

9. सिद्धान्तलेशसंग्रहः, प्रत्यक्षपरिच्छेदः, पृष्ठसंख्या – 146
10. वेदान्तसूक्तिमञ्जरी, 1/62
11. वेदान्तसूक्तिमञ्जरी, 1/64

वेदान्तदर्शने प्रत्यक्षप्रमाणम्

डॉ. जवाहरलालः

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रमाणशास्त्रस्याभिमतम्। यथा गौतमसूत्रम् ''इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यव सायात्मकं प्रत्यक्षम्[1]। सूत्रेऽस्मिन् चक्षुःसन्निकृष्टेषु मरुमरीचिकाषु जायमानस्य उदकमिति भ्रमात्मकस्य ज्ञानस्य प्रत्यक्षत्ववारणाय अव्यभिचारि पदं प्रदत्तं। अतस्मिंस्तदिति ज्ञानं व्यभिचारि। अथ सूत्रस्थाव्यपदेश्यपदेन निर्विकल्पकं प्रत्यक्षं, व्यवसायात्मकमित्यनेन सविकल्पकं प्रत्यक्षं चोच्यत इति। पं. केशवमिश्रेणापि "साक्षात्कारिणी च प्रमा सैवोच्यते येन्द्रियजन्या"।।[2]

''साक्षात्प्रतीतिः प्रत्यक्षम्''[3] इति प्रत्यक्षलक्षणम्। अत्र लक्षणे प्रयुक्तस्य साक्षात् पदस्य नन्दीश्वरेण प्रभाकरविजये त्रिधा व्याख्या कृता।''[4] तत्रादौ–

1. साक्षात्प्रतीतिः स्वरूपप्रतीतिः। स्वस्यैव रूपं स्वरूपम्। असाधारणरूपमित्यर्थः।

2. यद्वा अव्यवहितप्रतीतिः साक्षात्प्रतीतिः। अव्यवहितत्त्वं नाम स्वविषयानन्तर्गतज्ञानान्तराव्यवहितत्त्वमभिप्रेतम्।

3. साक्षात्त्वं स्वकालाकलितवस्तुसत्त्वावबोधकत्वं, यत्कालीनं ज्ञानं तत्कालसंबंधिवस्तुविषयमित्यर्थः।

अत्र चोदना प्रमाणमिति नियमप्रतिष्ठापनार्थः लौकिकवाक्याप्रामाण्यं,

---

1. न्यायसूत्रम् 1-1-4
2. तर्कभाषा प्र प.
3. प्रकरणपञ्चिका 146
4. प्रभाकरविजयः 26

अख्यातिवादमुपस्थापयन्ति प्रभाकराः इति अयं विशेषः। तन्त्ररहस्यकारस्तु "साक्षात्प्रतीतिः प्रत्यक्षं इत्यत्र साक्षात्त्वं चापरोक्ष्यं विशदावभास इति। तच्च सर्वसंवित्तीनाम् आत्मस्वात्मांशयोः।"[5] तत्र मीमांसादर्शने इन्द्रियाणां विषयैः सह संयोगे सति पुरुषस्य या बुद्धिः जायते तत् प्रत्यक्षम्[6] तथा च सूत्रम् "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भत्वात्"[6] लक्षणमिदं भ्रमात्मके ज्ञानेऽपि वर्तते एव। अतः शास्त्रदीपिकायां भट्टपादेन उद्घाटितं–तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म–सत्प्रत्यक्षम्"[7]। एवं मानमेयोदयकारेणापि 'इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम्"[8] तत्र गागाभट्टेन भाट्टचिन्तामणौ' त्रीणि प्रत्यक्षलक्षणानि उक्तानि[9]–इन्द्रियार्थ–सम्बन्धजन्यं ज्ञानं प्रत्यक्षमिति सूत्रकारः। 2. ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। 3. जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं वा।

वेदान्तिनां मते तु इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति नेदं प्रत्यक्षलक्षणं भवितुमर्हति। मनोरूपेन्द्रियजन्यत्वेन स्मृत्यादीनां प्रत्यक्षत्व प्रसङ्गात् मनसः अनिन्द्रियत्वे सुखदुःखादिमानसप्रत्यक्षे लक्षणस्याव्याप्तिः। सुखादीनां मनोजन्यत्वात्। ईश्वरस्यापि इन्द्रियाभावात् ईश्वरप्रत्यक्षे अव्याप्तमेव लक्षणम्। अत्र ध्यातव्यं यत् वेदान्तिष्वपि प्रत्यक्षप्रमाणस्वरूपविषये प्रस्थानभेदेन भेदः दरीदृश्यते। तत्रैकं मतं मानाधीनामेयसिद्धिः इति न्यायमतमनुसृत्य ज्ञानमाश्रित्य प्रत्यक्षलक्षणं प्रतिपादयति। प्रत्यक्षप्रमाणेन प्रत्यक्षज्ञानं तद्द्वारा विषयप्रत्यक्षम्। तद्यथा प्रत्यक्षप्रमाणजन्यं ज्ञानं प्रत्यक्षं प्रमा।"[10] एतादृश प्रत्यक्षज्ञानस्य विषयत्वं च विषयगतप्रत्यक्षत्वम्। अपरन्तु एतद् वैपरीत्ये विषयमाश्रित्य प्रत्यक्षं प्रतिपादयति। विषयस्य प्रत्यक्षत्वमादौ प्रतिपाद्य प्रत्यक्षज्ञानं तद्द्वारा च प्रत्यक्षं प्रमाणं निर्धारयन्ति। तद्यथा साक्षादपरोक्षविषयस्यैव विषयगतप्रत्यक्षत्वं प्रत्यक्षविषयमवलम्ब्य यज्ज्ञानमुदेति तत् प्रत्यक्षज्ञानम्। तत् प्रत्यक्षज्ञानस्य साक्षात् साधनं च प्रत्यक्षप्रमाणमिति।

5. तन्त्ररहस्यम् 5
6. मीमांसादर्शनम् 1/1/4
7. शा. दीपिका
8. मानमेयोदयम्
9. भाट्टचिंतामणिः
10. वेदान्त परिभाषा प्र परिच्छेदः

विषयमाश्रित्य ज्ञानमुदेति इत्यस्मिन् पक्षे ''विषयजन्यं ज्ञानं प्रत्यक्षम् इति लक्षणं क्रियते चेत् मनोविशेष्यकानुमितौ प्रत्यक्षत्वप्रसङ्गः। मनः इन्द्रियं प्रत्यक्षज्ञानकरणत्वात् चक्षुरादिवदित्यत्र मनसः इन्द्रियत्वेन विषयत्वं सिद्धम्। अथ च मनोविशेष्यकानुमितेः मनोरूपविषयजन्यत्वेन तत्र लक्षण-स्यातिव्याप्तिः। सुखादिप्रत्यक्षेऽपि पुनः लक्षणस्याव्याप्तिः स्यादेव। वेदान्तिनां मते सुखं सुखाद्याकारावृत्तिश्च युगपदुदेति सुखाद्याकारावृत्तिः पुनर्न सुखरूपवृत्तिजन्या। युगपदुत्पन्ना जन्यजनकभावाभावाद्। पुनः तत्रोक्तलक्षणे ज्ञानं जन्यं, विषयः जनकः जनकतावच्छेदकं विषयत्वमित्यत्र विषयत्वरूपधर्मस्य अनुमेयेषु विषयेषु वह्न्यादीनामपि विद्यमानतात्वमस्त्येव। तत्र पुनः प्रत्यक्षज्ञानविषयत्वमवच्छेदकं स्वीक्रियते चेत् तर्हि प्रत्यक्षज्ञानं प्रति प्रत्यक्षविषयत्वं, प्रत्यक्षविषयत्वं प्रति प्रत्यक्षज्ञानं कारणम् अतः अन्योन्याश्रयप्रसक्तिः। अतः विषयाश्रितं प्रत्यक्षलक्षणं न युक्तियुक्तम्। ज्ञानमाश्रित्य प्रत्यक्षलक्षणं क्रियते चेत् यथा ''यत् ज्ञानं ज्ञानान्तरेण न जन्यं तत् प्रत्यक्षम्। ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्[12] यथा भाट्टैः स्वीकृतम्। तर्हि अनुमानादीनि ज्ञानान्तरपूर्वकमेव जायन्ते न प्रत्यक्षं तथा विषयेन्द्रियसंयोगजन्यत्वाद् अतः प्रत्यक्षस्य ज्ञानाकरणकत्वम्। पुनः तत्र अनुमित्यादीनि ज्ञानानि ज्ञानकारणकानि। दण्डिपुरुष इति प्रत्यक्षज्ञानं न ज्ञानाजन्यं दण्डज्ञानपूर्वकत्वात्।

पुनः स्मृतावपि लक्षणस्यातिव्याप्तिप्रसक्तिः। स्मृतिज्ञानं प्रति संस्कारः कारणम्। ज्ञातविषयकं ज्ञानं स्मृतिरिति[13]। संस्कारः न ज्ञानम्, अतः स्मृतिः न ज्ञानपूर्वकम्। अतः मतमिदमपि नास्ति समीचीनम्। तत्र वेदान्तपरिभाषाकारेण प्रतिपादितं यत् प्रमाकरणं प्रमाणम् इत्यनेन ''प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम् एतेषां मते प्रत्यक्षप्रमा चात्र चैतन्यमेव ''यत्साक्षादपरोक्षात् ब्रह्म[15]। अद्वैतमते ज्ञानं स्वप्रकाशं स्वतःप्रमाणञ्चेति। ज्ञानस्यापरोक्षत्वं प्रत्यक्षत्वं वा स्वाभाविकम्।

11. प्रमाणसमुच्चयः
12. भाट्टचिन्तामणिः
13. तर्कभाषा
14. वेदान्तपरिभाषा
15. बृ. उपनि.

अस्ति चेत् ज्ञानं प्रमाणान्तरनैरपेक्ष्येण स्वतः अपरोक्ष्येण ज्ञायते। तदेव ज्ञानं प्रत्यक्षज्ञानम्। अत्र ज्ञानत्वं प्रत्यक्षत्वमुच्यते चेद् अनुमित्यादेः ज्ञानत्वात् प्रत्यक्षत्वापत्तिः। तर्हि समाधीयते अत्र विशिष्टस्य ज्ञानस्यास्ति अंशद्वयं ज्ञानांशः विषयांशश्चेति। यथा घटविषयके ज्ञाने अयं घटः इति ज्ञानं विषयांशः घटमहं जानामि इति ज्ञानं ज्ञानांशः। ज्ञानांशे विषयांशः अध्यस्तः भवति ज्ञानस्य प्रत्यक्षेण घटादि- विषयाणामपि प्रत्यक्षं भवति। तत्र ज्ञानांशस्य नित्यत्वात् स्वप्रकाशत्वाच्च। तत्प्रत्यक्षे चक्षुरादीनां करणानां नास्त्यपेक्षा। विषयांशस्य प्रत्यक्षे पुनः चक्षुरादीनां करणानामुपादेयता तु अस्ति एव। अतः विषयांशप्रत्यक्षे चक्षुरादीनां करणत्वं सिद्धम्। अत एव प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणमिति प्रत्यक्षप्रमाणलक्षणं घटितम्। प्रत्यक्षघटज्ञानस्य विषयः घटः, यश्च चक्षुरादीन्द्रिय प्रतीतिभूतः। अनुमेयवह्निज्ञानस्य विषयः वह्निः स च वह्निः न चक्षुरादिप्रतीतिभूतः। अतः अनुमित्यादेः नास्ति प्रत्यक्षत्वापत्तिः।

ज्ञानं तु सदैव प्रत्यक्षं स्वप्रकाशं नित्यत्वाच्च नास्ति तत्र करणापेक्षा ज्ञानस्य प्रत्यक्षत्वपरोक्षत्वादिव्यवहारस्तु विषयस्य प्रत्यक्षतां परोक्षतां ज्ञाने आरोप्य एव भवति। अत एव स्वप्रकाशं ज्ञानमेव मुख्यं प्रत्यक्षं घटादिप्रत्यक्षं तु गौणम्। अस्मिन् गौणप्रत्यक्षे इन्द्रियं करणम्। अतः इन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति वक्तुं शक्यते गौणप्रत्यक्षम्। विषयप्रत्यक्षे पुनः ज्ञानांशः अखण्डज्ञानस्येव अंशः नित्यत्वात् चक्षुरादिकरणानां कः उपयोगः? नहि ज्ञानं चक्षुरादिना गृह्यते, अपितु विषयः एव। विषयस्य च जड़त्वात् ज्ञानभिन्नत्वाच्च प्रमाकरणं प्रमाणं इति लक्षणं कथं समन्वयः? उच्यते–स्वरूपचैतन्यस्य अखण्डत्वेऽपि घटादिविषयकं यद् ज्ञानं जायते तन्न नित्यम्। तच्च विषयावच्छिन्नं ज्ञानं चक्षुरादीन्द्रियैः जन्यते, घटादिविषयक ज्ञानम् इन्द्रियजन्यमेव। अद्वैतमते ज्ञानम् अन्तःकरणवृत्तिः। तथा चक्षुरादीन्द्रिय द्वारा बहिर्निर्गच्छत् अन्तःकरणं विषयदेशं गत्वा विषयाकारेण रूपेण परिणमते। अयं चान्तःकरणस्य विषयाकारः परिणामः वृत्तिः उच्यते। सा च वृत्तिः इन्द्रियजन्या। तया वृत्या घटादिविषयमावरणं दूरीकृत्य विषयः इन्द्रियगोचरः क्रियते। अनया रीत्या एव घटस्य प्रत्यक्षं भवति। अतः विषयेन्द्रियसंयोगे सति अन्तःकरणवृत्तिरूदेति इति, इन्द्रियजन्या वृत्तिः, वृत्तिजन्यं च ज्ञानम् इति।

वस्तुतः, इन्द्रियं न घटादिज्ञानकरणम्, घटादिज्ञानस्य अन्तः करणवृत्तिजन्यत्वात् एवं च जडघटादिविषयांशे चक्षुरादीन्द्रियाणां करणत्वेऽपि तेषां प्रमाकरणं प्रमाणम् इत्येवं प्रमाणलक्षणं युक्तमेव। प्रत्यक्षस्य द्वैविध्यम्– घटाद्यंशे प्रत्यक्षं द्विविधम् सविकल्पकं प्रत्यक्षं निर्विकल्पकं प्रत्यक्षञ्चेति। वैशिष्ट्यावगाहिज्ञानं सविकल्पकम्। वैशिष्ट्यन्तु विशेषणविशेष्ययोः संबंधः। अतः सविकल्पकमिति लक्ष्यं वैशिष्यट्यावगाहिज्ञानमिति लक्षणम्। लक्षणे तत्र पदद्वयं वर्तते। वैशिष्ट्यावगाहिज्ञानञ्च। निर्विकल्पके अतिव्याप्तिवारणाय वैशिष्ट्यावगाहीति, इच्छादावतिव्याप्तिवारणाय ज्ञानमिति पदं प्रयुक्तम्। यथा घटमहं जानामि इत्यत्र घटविषयज्ञानवान् अहम् इत्यस्मिन् घटविषयकसाक्षात्कारे अहं विशेष्यतया घटज्ञानं विशेषणतया। तयोः घटज्ञानाहंकारयोः सम्बन्धश्च संसर्गतया भासते। घटे च घटत्वं विशेषणमतः घटघटत्वयोः सम्बन्धच संसर्गतया भासते। अतः विशेषणे विशेषणं यत तत् विशेषणतावच्छेदकम्। तथा विशेषणतावच्छेदकं प्रकारकं ज्ञानं वैशिष्ट्यावगहिज्ञानं सविकल्पकं प्रत्यक्षम् अनुव्यवसायात्मकम्।

संसर्गानवगाहिज्ञानं निर्विकल्पकं प्रत्यक्षम्। संसर्गो नाम विशेष्य–विशेषणयोः सम्बन्धः। विशेषणविशेष्यसम्बन्धाविषयकं ज्ञानं निर्विकल्पकम्। अर्थात् यस्मिन् ज्ञाने विशेष्यं विशेषणं तयोः सम्बन्धश्च इत्येतत् त्रयो विषयाः न भवन्ति तद् ज्ञानं निर्विकल्पकम्। यथा सोऽयं देवदत्तः इति लौकिकवाक्यजन्यं ज्ञानम्।[16] तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानं वैदिकम्।[17] तच्च निर्विकल्पकं ज्ञानं चक्षुःसंयोगादनन्तरं जायमानमपि न प्रत्यक्षानुव्यवसाय–विषयं भवति।

---

16. वे. परि
17. वे परि.

प्रत्यक्षप्रमाणम्

कू. वेङ्कटेशमूर्तिः

ज्ञानादेव तु कैवल्यमिइत्यादिश्रुत्या ज्ञानादेव हि मोक्ष इत्यवगम्यते।

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।'

इति गीतासु च ज्ञानान्मुक्तिरिति निरूपितम्। तच्च ज्ञानं प्रमात्मकं भवति। प्रमाकरणं प्रमाणं प्रमाणानि च प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धि-भेदेन षडिति ब्रह्माद्वैतवादिनां वेदान्तिनामभिमतम्। तानीमानि प्रमाणान्यधिकृत्य श्रीमद्धर्मराजाध्वरीन्द्रः वेदान्तपरिभाषाख्ये स्वीये ग्रन्थे व्यवृणोत्। तत्र च अष्टप्रकरणानि विद्यन्ते यत्र आद्यानि षट्प्रमाप्रमाणनिरूपणपराणि, प्रकरणद्वयं चान्ते विषयप्रयोजनप्रतिपादकम्। तत्रादौ प्रत्यक्षपरिच्छेदे ज्ञानगतप्रत्यक्षत्वं विषगतप्रत्यक्षत्वं च सम्यङ्निरूपितम्। एवं तार्किकाभिमतसामान्यलक्षणा ज्ञानलक्षणाप्रत्यासत्त्योः निराकरणञ्च विशेषेणोपलभ्यते। मनसः इन्द्रियत्वनिरा करणपूर्वकं मानसप्रत्यक्षं सर्वं साक्षिज्ञानमेव इति निरूपितम्। प्रकृतं तावदत्र प्रत्यक्षप्रमाणमधिकृत्य सङ्ग्रहेण प्रस्तूयते। प्रत्यक्षप्रमा चात्र चैतन्यमेव, 'यत् साक्षादपरोक्षात् ब्रह्म' इति श्रुतेः। इन्द्रियसन्निकर्षादिजन्या अन्तःकरणवृत्तिस्तु ज्ञानाभिव्यञ्जकत्वात् प्रमेत्युपचर्यते। तस्याञ्च जन्यत्वात् तत्करणस्य चक्षुरादेः प्रमाणत्वम्। वृत्तिज्ञानं मनोधर्मः 'कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतसर्वं मन एव' इति श्रुतेः। तत्र धीशब्दो वृत्त्यभिधायी।

ज्ञाने विषये च प्रत्यक्षत्वव्यवहारोऽस्ति। तत्राद्ये वृत्तिचैतन्ये विषयचैतन्याभेदो नियामकः। द्वितीये विषये प्रमातृचैतन्यसत्तातिरिक्तसत्ता-

शून्यत्वम्। तथा हि चैतन्यं त्रिविधं विषयचैतन्यं, वृत्तिचैतन्यम्, अन्तःकरणचैतन्यं चेति। एतानि च क्रमेण प्रमेयप्रमाणप्रमाचैतन्यानीत्यभिधीयन्ते। प्रत्यक्षस्थले तैजसमन्तःकरणम् इन्द्रियद्वारा बहिर्निर्गत्य विषयदेशं गत्वा तदाकारेण परिणमते। स परिणामो वृत्तिरित्युच्यते। चैतन्यभेदकोपाधीनां यत्रैकदेशस्थत्वं तत्र चैतन्यभेदो नोपगम्यते। घटाकाशमठाकाशयोर्भेदेऽपि मठस्थघटाकाशः यथा न मठाकाशाद्भिन्नः तथा विषयेन्द्रियसन्निकर्षदशायां वृत्तेर्विषयस्य च एकदेशस्थत्वात्तच्चैतन्ययोरभेदेन वृत्तिचैतन्ये विषय-चैतन्याभेदाद्वृत्तेः प्रत्यक्षत्वम्। एवं विषयस्य घटादेः स्वावच्छिन्नचैतन्ये अध्यस्ततया तत्सत्तायाञ्च, आरोपितनिष्ठसत्ताया अधिष्ठानसत्तातोऽन-तिरिक्ततया, अधिष्ठानचैतन्यसत्तातो न भेदः। प्रत्यक्षस्थले उक्तरीत्या प्रमातृविषयचैतन्ययोरेकदेशस्थत्वेन विषयसत्तायाः प्रमातृचैतन्यसत्तातोऽपि अनतिरेकाद् विषये प्रत्यक्षत्वमुपपद्यते। सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्य-वच्छिन्नचैतन्यस्य च उपाध्योः नियमेन एकदेशस्थत्वात् सुखादिविषयके मानसप्रत्यक्षेऽपि लक्षणसङ्गतिः।

तत्राद्ये प्रत्यक्षलक्षणे विषये तत्तदिन्द्रिययोग्यत्वं वर्तमानत्वं च विशेषणं देयम्। तेन वाक्यादिजन्ये अदृष्टादिज्ञाने, सुखादिस्मृतौ सुखाद्यंशे च नातिव्याप्तिः। एवं च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नत्वं ज्ञानात्मकप्रत्यक्षस्य लक्षणं पर्यवसन्नम्।

द्वितीयलक्षणेऽपि तत्तदाकारवृत्त्युपहितत्वं प्रमातरि, तत्तदिन्द्रिययोग्यत्वं च विषये, विशेषणं देयम्। इत्थं च तत्तदाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताभिन्न-सत्ताशून्यत्वे सति तत्तदिन्द्रियोग्यत्वं विषयस्य प्रत्यक्षत्वम्। रूपवान् घट इत्यादिप्रत्यक्षस्थले घटादिगतपरिमाणादौ अतिव्याप्तिवारणाय तत्तदाकारवृत्त्युपहि-तत्वं प्रमातृविशेषणम्। तत्र रूपाद्यवछिन्नचैतन्यस्य तद्वृत्त्यवछिन्नचैतन्यस्य च तदुपाध्योरेकदेशस्थत्वेन एकत्वात् रूपाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिणामाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नत्वं प्राप्तमित्यतिव्याप्तिः। रूपादिविषयकवृत्तिदशायां परिणामाद्याकारकवृत्त्यभावाच्च न तत्रेदानी-मतिप्रसङ्गः। धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मादेः प्रत्यक्षत्वापत्तिवारणाय विशेष्यभागः। धर्मादेः गुरुत्वादिवत् स्वभावत एव अयोग्यत्वान् न तत्र

अतिव्याप्तिः। सुखदिसत्त्वदशायां तु 'अहं सुखी' इत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वापादनम् इष्टापत्त्या परिहरणीयम्। सन्निकृष्टविषये दशमस्त्व-मसीत्यादिवाक्यादपि प्रत्यक्षाङ्गीकारात्।

पर्वतो वह्निमानित्यादिज्ञानं सन्निकृष्टविषयतया पर्वतांशे प्रत्यक्षम्। वह्नेरतथात्वेन तदंशे अनुमितिः। अवच्छेदकभेदेन विरुद्धयोरपि प्रत्यक्षत्वा-नुमितित्वयोः कपिसंयोगतदभावयोरिव एकत्र समावेशः सूपपादः। सुरभिचन्दनमित्यादौ सौरभांशे ज्ञानं परोक्षमेव, ज्ञानलक्षणायाः सन्निकर्षत्वानङ्गीकारात्। अतस्तत्र न अव्याप्तिशङ्कावकाशः। न चैवम् अनवस्थाभिया वृत्तिगोचरापरवृत्तेः अनङ्गीकारात् द्वितीयलक्षणस्य तत्तदाकारवृत्युपहितत्वघटिस्य वृत्तावव्याप्तिरिति वाच्यम्। वृत्तेः वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाङ्गीकारेण स्वविषयवृत्त्युपहित-प्रमातृचैतन्यघटितलक्षणस्य तत्राक्षतत्वात्। केवलसाक्षिवेद्यत्वस्य इन्द्रियानु-मानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वरूपत्वात् न अन्तःकरणतद्धर्मादीनां तद्हानिः। इदं रजतमिति भ्रमस्थलेऽपि रजताकाराविद्यावृत्तेरभ्युपगमेन प्रातिभासिकरजतेऽपि लक्षणसङ्गतिः। चैतन्याभिव्यञ्जकवृत्तिश्च इन्द्रियसन्नि-कर्षाज्जायते। ते च सन्निकर्षाः संयोग-संयुक्ततादात्म्यसंयुक्ताभिन्नतादात्म्यभेदात् त्रिविधाः। क्रमेण तद्रूपघटानां वृत्तिजनने तेषामुपयोगः वृत्तिश्चतुर्विधा-संशयनिश्चयगर्वस्मरणभेदात्। वृत्तिभेदाद् एकमप्यन्तःकरणं मनः बुद्धिरहङ्कारः चित्तमिति च आख्यां लभते। तदुक्तम्

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे॥ इति।

निरुक्तं प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदात् द्विविधम्। तत्र वैशिष्ट्यावगाहि प्रथमं, घटमहं जानामीत्याकारकम्। सम्बन्धानवगाहि तु द्वितीयं, यथा सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम्। तस्य इन्द्रियाजन्यत्वेऽपि प्रत्यक्षत्वम्, इन्द्रियजन्यत्वस्य तदप्रयोजकत्वात्। पूर्वोक्तप्रत्यक्षलक्षणस्य च तत्र सत्त्वात्। उक्तवाक्ययोः विशिष्टार्थस्य विरुद्धत्वेन तात्पर्याविषयत्वात्। विरुद्धयोरुपाध्योस्त्यागे विशेष्यस्यैकत्वेन तस्यैव

तात्पर्यविषयत्वेन तज्ज्ञानस्य संसर्गानवगहितया निर्विकल्पकत्वं सिद्धमेव।

तच्च प्रत्यक्षं पुनरपि द्विविधं जीवसाक्षीश्वरसाक्षिभेदेन। तत्र अन्तः-करणविशिष्टं चैतन्यं जीवः, तदुपहितं जीवसाक्षी। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यां जीवसाक्षिणोर्भेदः। विशेषणोपाध्योः व्यावर्तकत्वे समानेऽपि कार्यान्वयानन्वयाभ्यां भेदः। एवं च कार्यान्वयि व्यावर्तकं विशेषणम्। तदनन्वयि व्यावर्तकमुपाधिः। कार्यं विधेयम्। रूपविशिष्टो घटोऽनित्यः इति विशेषणोदाहरणम्। तत्र विशेषान्वयिनि अनित्यपदार्थे रूपस्य अन्वयसम्भवात् विशेषणत्वम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम् इति उपाध्युदाहरणम्। तत्र विशेष्यान्वयिनि विधेये श्रोत्रेन्दिये कर्णशष्कुल्या अयोग्यत्वेन अन्वयासम्भवात् उपाधित्वम्। प्रकृते च अन्तःकरणविशिष्टो जीव इत्यत्र विधेये जीवपदार्थे अन्तःकरणस्य अन्वयसम्भवात् विशेषणत्वम्। अन्तःकरणोपहितचैतन्यं साक्षीत्यत्र विशेष्यान्वयिनि विधेये साक्षिपदार्थे विषयावभासके अन्तःकरणस्य जडस्य अन्वयायोग्यत्वात् तस्य उपाधित्वम्। अन्तःकरणोपाधीनाम् अनेकत्वेन जीवानां भेदात् तत्साक्षिणामपि भेदो ज्ञेयः। अन्यथा एकेनावगतस्य अन्येनापि अनुसन्धानप्रसङ्गात्। ईश्वरोपाधिमायाया एकत्वेन ईश्वरस्यैकत्वम्। तस्याः एकत्वे तु 'अजामेकां लोहितशुक्लकृष्णां' इत्यादिश्रुतिःप्रमाणम्। एवं च मायाविशिष्टं चैतन्यमीश्वरः, तदुपहितं चैतन्यम् ईश्वरसाक्षीति विवेकः। तस्येश्वरस्य एकत्वेऽपि तदुपाधिमायागत-सत्त्वरजस्तमोगुणैः प्रत्येकमुपाधिभूतैः क्रमाद् विष्णुब्रह्मशिवरूपास्त्रि-मूर्तिविलासाः। तत्र ब्रह्मविष्णुशिवाः यथाक्रमं सृष्टिस्थितिलयकर्तारः। ईश्वरकूटस्थस्य अनादित्वेऽपि परिपक्वप्राणिकर्मवशात् उपाधिभूतमायायाम् इन्द्रियसन्निकर्षाज्जीवोपाध्यन्तःकरण इव वृत्तिविशेषा उत्पद्यन्ते। वृत्तीनां जन्यत्वात् तत्प्रतिबिम्बितचैतन्येऽपि जन्यत्वव्यवहारः।

प्रातिभासिकशुक्तिरजतादिपदार्थोत्पत्तौ च शुद्धरजतादिसामग्री नापेक्षिता किन्तु तत्र विलक्षणैव सामग्री। तथा हि काचादिदुष्टदृष्टेः पुरोवर्तिद्रव्यसंयोगात् इदमाकाराचाकचिक्याद्याकारा च अन्तःकरणवृत्तिः जायते। तस्यां वृत्तौ इदमंशावच्छिन्नं चैतन्यं प्रतिबिम्बते। उपाधीनाम् उक्तरीत्या तत्रैकदेशस्थत्वेन तदुपहितानामैक्यं सम्भवति। इत्थं च इदमंशावच्छिन्नचैतन्याश्रिता शुक्तित्वप्रकारिका अविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधित-

रजतसंस्कारेण काचादिदोषेण च सहिता रजताकारेण रजतज्ञानाभासाकारेण च परिणमते। तच्च रजतम् अविद्याधारे इदमवच्छिन्नचैतन्ये वर्तते। सर्वकार्यस्यापि स्वोपादानाविद्याश्रयनिष्ठत्वनियमात्। चैतन्यनिष्ठस्यापि रजतादेः पुरोवर्तिनाऽभेदेन भानं तु, नैयायिकनये आत्मनिष्ठस्य ज्ञानादेः शरीरनिष्ठत्वेनेव, तदवच्छेदकत्वादिति बोध्यम्।

प्रातिभासिकव्यावहारिकरजतयोरुभयोरपि अविद्याजन्यत्वेन साम्येऽपि आगन्तुकनियतकाचादिनानादोषजन्यत्वनियतैकाविद्यादोषजन्यत्वाभ्यां तयोर्वैलक्षण्यम्। स्वाप्नपदार्था अपि प्रातिभासिका एव। तेषां प्रत्यक्षतया अनुभवात्। 'अथ रथान् रथयोगान् पथः सृजते' इति रथादिसृष्टिप्रतिपादिका श्रुतिरप्यनुग्राहिका। स्वाप्नपदार्थाः साक्षान्मायामया इत्येके। अन्तःकरणद्वारा तथेत्यपरे। अध्यासाधिष्ठानस्य चैतन्यस्य जागरे प्रत्यक्षाभावेऽपि स्वाप्नपदार्थानां जागरे नानुवृत्तिः निवृत्तिरूपकार्यनाशेन तत्सिद्धेः। उपादानसद्भावदशायामपि विरोधिवृत्त्युत्पत्या दोषनिवृत्या वा कार्यनाशाङ्गीकारात्। प्रकृते च विरोधि-प्रत्ययोत्पत्या निद्रादिनाशेन च स्वाप्नपदार्थाननुवृत्तिरूपोपपादयितुं शक्या। बाधरूपकार्यनाश एव अधिष्ठानसाक्षात्कारजन्योपादाननाशस्य अपेक्षितत्वात् प्रकृते तदभावेऽपि न क्षतिः। शुक्तिरजतादेः शुक्त्यवच्छिन्नतूलाविद्याकार्यत्वपक्षे अधिष्ठानतत्त्वज्ञानात् तस्य अविद्यया सह बाधः। मूलाज्ञानकार्यत्वपक्षे तन्नाशस्य ब्रह्मसाक्षात्कारैकसाध्यतया शुक्तित्वादिज्ञानेन शुक्तिरजतादेः घटादेः दण्डप्रहारादिनेव तदानीं निवृत्तिमात्रम् न त्वत्यन्तनाशः।

जपाकुसुमसङ्गात् स्फटिके रक्तत्वभ्रमस्थले न प्रातिभासिकरजतोत्पत्ति-रङ्गीकार्या तत्र इन्द्रियसन्निकर्षस्य विद्यमानत्वेन तेनैव प्रत्यक्षत्वनिर्वाहात्। यत्र आरोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तिरावश्यकी।

प्रत्यक्षं पुनर्द्विविधम् इन्द्रियजन्यं तदजन्यं चेति। तत्राद्यं चक्षुरादीन्द्रिय-भेदात् पञ्चविधम्। द्वितीयं सुखादिप्रत्यक्षम्। तत्र मनस एव कारणत्वात् मनसश्च सिद्धान्ते इन्द्रियत्वमनङ्गीकारात्। तत्र घ्राणं रसनं त्वक् च स्वस्थानस्थितान्येव विषयान् गृह्णन्ति। इतरे तु विषयदेशं गत्वा विषयं गृह्णीतः। वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशे भेर्याद्यवच्छेदेन उत्पन्नशब्दस्य उत्पत्तिकल्पनं, 'भेरीशब्दो मया श्रुतः' इति प्रतीतेः सजातीयविषयकल्पनं च गौरवात् क्लिष्टत्वाच्च न सम्भवति।

प्रत्यक्षप्रमाणम्

मंजुनाथः एस्. जी.

भारतीयदर्शनशास्त्रेषु सर्वैः आस्तिकनास्तिकदार्शनिकैः प्रमाणप्रमेयौ प्रधानतया प्रतिपादितौ। प्रमाकरणं प्रमाणं प्रमाणेन प्राप्यमानोऽयं प्रमेयः प्रमाणेन प्रमितिर्जायते इत्यत्र च नास्ति दार्शनिकानां विमतिः। किन्तु केन प्रमाणेन प्रमितिर्जायते? कथं जायते? कति प्रमाणानि? तस्य स्वरूपं किम्? प्रमेयानां स्वरूपं किमित्यादिविषयेषु अस्ति विमतिः। यद्यपि सर्वेऽपि दार्शनिकाः प्रत्यक्षप्रमाणमङ्गीकुर्वन्ति, तथापि तस्य स्वरूपविषये नास्ति मतैक्यम्।

इन्द्रियेभ्यः उत्पद्यमानं ज्ञानं यथार्थज्ञानम्, यथार्थज्ञानस्य एकमेव साधनं प्रत्यक्षप्रमाणमिति चार्वाकाः कथयन्ति। बौद्धाः प्रत्यक्षेण सह अनुमानमपि अङ्गीकुर्वन्ति। जैनाः विशिष्टाद्वैतिनश्च त्रीणि प्रमाणानि स्वीकुर्वन्ति। श्रुतिसिद्धार्थप्रतिपादनार्थमेव अनुमानप्रमाणं न स्वतन्त्रतया इति प्रतिपादयन्ति माध्वाः। वैशेषिकास्तु प्रत्यक्षमनुमानमिति प्रमाणद्वयं शब्दस्य अनुमाने एव अन्तर्भावः इति वदन्ति। उपमानेन सह चत्वारि प्रमाणानीति नैय्यायिकाः, अर्थापत्त्या सह पञ्चप्रमाणानीति प्राभाकरमीमांसकाः, अनुपलब्ध्या सह षट्प्रमाणानीति भाट्टाः अद्वैतिनश्च साधयन्ति।

इत्थं प्रमाणानां संख्याविषये अस्ति मतभेदः, न प्रमेयसाधनादिविषये। तार्किकाः ईश्वरमनुमानेन साधयन्ति। वेदान्तिनः श्रुतिप्रमाणसिद्धमिति वदन्ति। पीनो देवदत्तः दिवा न भुङ्क्ते इत्यत्रार्थम् अर्थापत्त्या प्रतिपादयन्ति मीमांसकाः। किन्तु अत्रानुमानमेव प्रमाणमिति नैय्यायिकाः निरूपयन्ति। सर्वत्र प्रमाणानि सिद्धार्थस्य स्वरूपं दृढीकुर्वन्ति। न तु वस्तूनि उत्पादयन्ति अथवा सिद्धस्य निवारणं न कुर्वन्ति। तदुक्तं कुमारिलभट्टपादैः वार्तिके–

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्।। इति

प्रत्यक्षप्रमाणेन विना अन्यप्रमाणानि न सिद्ध्यन्ति। यथा हेतुप्रत्यक्षेण विना अनुमानं, सादृश्यप्रत्यक्षेण विना उपमानं, शब्दप्रत्यक्षेण विना शाब्दबोधः उपपाद्यवस्तुप्रत्यक्षेण विना अर्थापत्तिः, अधिकरणप्रत्यक्षेण विना अनुपलब्धिश्च न सिद्ध्यति।

प्रत्यक्षप्रमाणं सर्वेऽपि दार्शनिकाः स्वीकुर्वन्ति। नैय्यायिकाः इन्द्रियार्थ सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि अध्यवसायात्मकं प्रत्यक्षम् इति प्रतिपाद्य घ्राणजरासनश्रावणचाक्षुषत्वाचमानसप्रत्यक्षान् निरूपयन्ति। अद्वैतिनस्तु इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम् इति नाङ्गीकुर्वन्ति। यतो हि अनुमित्यादेरपि मनोजन्यतया प्रत्यक्षत्वापत्तेः, ईश्वरज्ञानस्य अनिन्द्रियजन्यस्य साक्षात्वानापत्तेश्च। अद्वैतिनः प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्, प्रत्यक्षप्रमा चात्र चैतन्यमेव इत्युक्त्वा श्रुतिप्रमाणं दर्शयन्ति **यत्साक्षादपरोक्षाद् ब्रह्म** इति। अत्र साक्षात्पदेन ब्रह्मज्ञानरूपत्वादेव साक्षात् प्रत्यक्षं भवतीति ज्ञायते। प्रत्यक्षं द्विविधं किञ्चित्प्रत्यक्षज्ञानविषयत्वात् प्रत्यक्षं भवति, यथा घटादयः। प्रत्यक्षविषयत्वं घटादिषु अस्ति अतः घटप्रत्यक्षं सञ्जायते। द्वितीयं किञ्चित् ज्ञानरूपत्वादेव प्रत्यक्षं भवति, यथा ब्रह्म अथवा घटप्रत्यक्षम्, शुद्धं ब्रह्म अखण्डाकारवृत्तिविषयः न भवति इति भामतीकारमतम्। विवरणाचार्यास्तु वृत्तिव्याप्यत्वमिच्छन्ति। यथा

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिः निवारितम्।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यते।। इति

इत्थं च उभयमतेऽपि ब्रह्मणि फलव्याप्यत्वं नास्ति, विवरणमते वृत्तिव्याप्यत्वमस्तीति सिद्धम्। घटादिविषयप्रत्यक्षे फलव्याप्यत्वमस्ति। यथा जलासिञ्चितभितौ मुखं प्रतिबिम्बते तथैव वृत्तिनिर्गमनेन एव वस्तुप्रत्यक्षं जायते। वृत्तिनिर्गमनाभावे विषयसम्बन्धाभावात् विषये चैतन्यं वा प्रतिबिम्बते तदा वस्तु परोक्षं भवति

तर्हि प्रतिकर्मव्यवस्था कथम्? यतो हि चैतन्यं विभुः किल चैतन्यं सर्वदा विषयेण सम्बद्धं भवति, अतः किञ्चिदपरोक्षं किञ्चित्

परोक्षमिति किमर्थमिति चेत्, उच्यतेऽत्र वस्तु सर्वदा अज्ञानेनावृतं भवति। वृत्तिनिर्गमनेन यदा आवरणनाशः तदा वस्तुप्रत्यक्षं वृत्तिनिर्गमनाभावे आवरणनाशाभावः तदा वस्तु परोक्षं च भवति। प्रमाणेन प्रमेयसिद्धिः भवति। वेदान्ते ब्रह्मणः अप्रमेयत्वात् प्रमाणं व्यर्थं किल? इति चेत् न नित्यसिद्धब्रह्म अज्ञानेन आच्छादितं भवति स्पष्टतया न प्रकाशते। अतः आच्छादिताज्ञाननिवारणार्थं प्रमाणमपेक्षते।

ज्ञानगतप्रत्यक्षं विषयगतप्रत्यक्षं चेति प्रत्यक्षस्य द्वैविध्यं प्रतिपादयन्ति वेदान्तिनः। अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्न चैतन्यं प्रमाणचैतन्यम्, घटाद्यवच्छिनं चैतन्यं विषयचैतन्यञ्चेति उपाधिभेदेन चैतन्यभेदः। यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति। तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। एवं वृत्त्या घटाद्यवच्छिन्नचैतन्यस्य प्रमात्रभिन्नतया प्रत्यक्षं जायते। अत्र प्रमात्रभिन्नत्वमित्युक्ते प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्तातिरिक्तायाः आरोपितसत्तायाः अनङ्गीकारात्। एवं घटाद्यधिष्ठानसत्ता प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्, तथा च 'तत्तदिन्द्रययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्' इति ज्ञानगतप्रत्यक्षस्य निष्कृष्टं लक्षणम्। अत्र धर्मादीनां प्रत्यक्षत्वापत्तिवारणाय योग्यत्वमिति दलं देयम् किञ्चिद्योग्यं किञ्चिदयोग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्। 'अहं पूर्वं सुखी' इत्यादिस्मर्यमाणविषये लक्षणस्य अतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम्। 'पर्वतो वह्निमान्' इत्यत्र पर्वतांशे अपरोक्षत्वं वह्न्यंशे परोक्षत्वम्, वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात्। अत्र वह्न्यंशे अतिव्याप्तिवारणाय चैतन्याभिन्नत्वमिति दलम्। 'रूपी घटः' इत्यत्र घटगतपरिमाणादेः प्रत्यक्षत्ववारणाय तत्तदाकारवृत्त्यवच्छिन्नत्वमिति विशेषणम्। तदा रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्तिः न सम्भवति। 'दशमस्त्वमसि' इत्यादिसन्निकृष्टविषये शब्दादप्यपरोक्षत्वमङ्गीक्रियते।

अयं घट इत्यत्र घटस्य, घटज्ञानस्य च प्रत्यक्षं जायते। ज्ञानगतप्रत्यक्षविचारविमर्शः सम्पादितः। इदानीं विषयगतप्रत्यक्षत्वविचारः प्रस्तूयते प्रमातृसत्तातिरिक्तसत्ताकत्वाभावात् विषयप्रत्यक्षं सम्भवति। यथा घटादेः स्वावच्छिन्नचैतन्ये अध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्तातिरिक्तारोपितसत्तायाः अनङ्गीकारात्। अत्रापि पूर्वोक्तप्रकारेण प्रत्यक्षं भवति। अनुमित्यादिस्थले अन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिचैतन्यस्य प्रमातृसत्तानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति न तत्रातिव्याप्तिः। तथा च स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम् इति विषयगतप्रत्यक्षस्य लक्षणम्। तत्र पुनः सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षस्य द्वैविध्यं वैशिष्ठ्यावगाहिज्ञानं सविकल्पम्। यथा घटमहं जानामि' इति संसर्गावगाहि ज्ञानं निर्विकल्पकम्। अत्र अखण्डार्थतया अथवा प्रातिपादिकार्थतया प्रत्यक्षं जायते। यथा तत्त्वमसि सोऽयं देवदत्तः इति।

तच्च प्रत्यक्षं पुनर्द्विविधम्, जीवसाक्षि, ईश्वरसाक्षि चेति। अन्तःकरणावच्छिन्नं चैतन्यं जीवः। तदुपहितं चैतन्यं जीवसाक्षि, अयं च प्रत्यात्मं नाना, उपाधिभेदात्। जीवः अल्पज्ञः स्वसम्बद्धं वस्तु प्रकाशयति। मायोपहितं चैतन्यम् ईश्वरसाक्षि। तदुपहितमायायाः एकत्वादनादित्वात् तच्चैकमनादि च ईश्वरः सर्वज्ञः सर्वविषयकज्ञानरूपत्वाद् इति केचन वदन्ति। अत्र ईश्वरस्य ज्ञानार्थं मायावृत्तिः स्वीक्रियते। सा वृत्तिः एका इति केचन कथयन्ति। केचन भूतभविष्यत्वर्तमानविषयत्वेन वृत्तेः त्रैविध्यं प्रतिपादयन्ति। अत्र विशेषणत्वोपाधित्वाभ्याम् ईश्वरत्वेश्वरसाक्षित्वयोः भेदः, न तु धर्मिणो ईश्वरतत्साक्षिणोः परिभाषाकारैरपि अहमाकारावृत्तिः अङ्गीकृता। एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यं भवति ज्ञेयगतं, ज्ञप्तिगतं चेति। ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वं सर्वज्ञानसाधारणं भवति।

वेदान्तसिद्धान्ते ब्रह्म स्वतः अपरोक्षं **'यत्साक्षादपरोक्षाद् ब्रह्म'** इति श्रुतेः।

श्रीभाष्ये सविकल्पकनिर्विकल्पकप्रत्यक्षविचारः

डॉ. सुदर्शनन् एस्

दार्शनिकाः प्रायः प्रत्यक्षस्य द्वैविध्यमुररीकुर्वन्ति। प्रत्यक्षञ्चेन्द्रियार्थ-सन्निकर्षजन्यं ज्ञानमिति बहुधा वर्ण्यते। प्रत्यक्षद्वैविध्यञ्च सविकल्पक-निर्विकल्पकभेदेन भवति। इन्द्रियं यदा वस्तुनः सह सन्निकृष्टं भवति तदा किमाद्यं निष्प्रकारकं ज्ञानं जनयति उत सप्रकारकमिति विषये महान् विचारः वरीवर्ति।

श्रीभाष्यकारः भगवद्रामानुजाचार्याः निर्विकल्पकमपि प्रत्यक्षज्ञानं सविशेषविषयकमित्येव समर्थयन्ति। तथा च सविकल्पकनिर्विकल्पके निर्वच्येते-

1. निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्
2. सविकल्पकं द्वितीयादिपिण्डग्रहणम्। इति

अत्रैवमाक्षिप्यते-

प्रथमपिण्डग्रहणस्य सविशेषविषयत्वस्वीकारात्, एकजातीयगोद्रव्येषु प्रथमपिण्डग्रहणवत् द्वितीयादिपिण्डग्रहणानामपि **खण्डोऽयं, कृष्णोऽयं, शुक्लः गौः** इति रूपमेव जात्याकृतिविशिष्ट- व्यक्तिविषयपरत्वात् सविकल्पकनिर्विकल्पकयोरविशेषप्रतीत्या च, आद्यप्रत्यक्षस्य निर्विकल्पकत्वकथनं द्वितीयादीनाञ्च सविकल्पकत्वकथनमनुचितम्।

यत्र ज्ञाने विकल्पो विषयो न भवति तन्निर्विकल्पकं, यत्र तु ज्ञाने विकल्पो विषयो भवति तत् सविकल्पकमिति शब्दार्थस्य सविकल्पकनिर्विकल्पकशब्दाशक्त्यैव स्वयं सिद्धत्वात्, श्रीभाष्यस्थ-निर्वचनमयुक्तम्। यत्र ज्ञाने विकल्पो विषय इत्यादिविचारे विकल्पः

नामजात्यादिरूपो भेद इति निर्विवादम्। तथा च प्रथमपिण्डग्रहणस्यापि भेदविषयत्वात् प्रत्यक्षद्वैविध्यकथनमनुचितम्।

यदि निर्विकल्पकस्य संस्कारासचिवज्ञानपरत्वस्वीकारे सविकल्पकस्य संस्कारसचिवज्ञानपरत्वस्वीकारे द्वैविध्यसिद्धिरिति श्रीसुदर्शनसूरि-भणितिरपि न सङ्गतामेति। यथो हि ज्ञानस्य संस्कारसचिवत्वप्रतिपादनपक्षे च तज्ज्ञानं स्मृतिरूपं प्रत्यभिज्ञारूपमेव वावशिष्येत।

अत्रैदं सैद्धान्तिकमित्थं निगद्यते-

एकजातीयवस्तुषु प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वे, द्वितीयादिनाञ्च पिण्डग्रहणानाञ्च सविकल्पकत्वे उभयत्र गोपिण्डग्रहणेषु शुक्लः गौः, कृष्णोऽयमित्येव प्रतीतिसिद्ध्या नामजात्यादिविशिष्टप्रथमपिण्डग्रहणं निर्विकल्पकत्वनिर्वचनं, तद्विशिष्टद्वितीयादिपिण्डग्रहणानां सविकल्पकत्वनिर्वचनमित्येकरूपस्यैव प्रत्यक्षस्य द्विधा निर्वचनमनुचितमित्याक्षेपस्य समाधानंत्वेवम् -

प्रत्यक्षज्ञाने एकजातीयवस्तुग्रहणे पिण्डग्रहणानां प्रथमत्वद्वितीयत्वादि-कथनमुपलक्षणमात्रमेवेत्यवगन्तव्यम्। **शुक्लः गौः** इत्यादिज्ञानं निर्विकल्पक-रूपमेव। तथा च यस्मिन् प्रत्यक्षे धर्मेऽनुवृत्तत्वमपि प्रकाशते तत्प्रत्यक्षं सविकल्पकत्वशब्देनोच्यते। सविकल्पकज्ञानस्यापि **अयं गौः, शुक्लः गौः** इत्यादिरूपत्वमेव। यत्र च द्वितीयादिपिण्डग्रहणेष्वपि प्रत्यक्षे धर्मेऽनुवृतत्वाग्रहणे च तद्वितीयादिपिण्डग्रहणं निर्विकल्पकत्वरूपमित्येवावगन्तव्यम्। धर्मानुवृतिर्नाम पूर्वव्यक्तिवृतित्वस्यैतद्व्यक्तिवृतित्वरूपैव।

सविकल्पकनिर्विकल्पकशब्दयोः

शब्दशक्त्यावगम्यमानार्थकृताक्षेपस्य समाधानन्त्वेवम्।

विकल्पस्य नामजात्यादिरूपभेदपरत्वेऽपि तद्रहितत्वेन निर्विशेषविषय-त्वात् निर्विकल्पकपदव्युत्पत्यैव तत्प्रत्यक्षस्यैव निर्विशेषविषयकप्रत्यक्षत्व-कथनापेक्षोऽयुक्त एव। यद्यपि निर्विकल्पकशब्दविशेषस्य विकल्प-सामान्याभाववानित्येवार्थः, तथापि लोकानुभवे निर्विशेषविषयकज्ञानमित्य-स्यासम्भवात्, अनुभवे च सविशेषविषयकप्रत्यक्षस्यैवादौ ग्रहणाच्च, आद्यग्रहणे

विवक्षितस्य विकल्पविशेषस्याभावेन तत्प्रत्यक्षं निर्विकल्पकत्वमुखेन व्यवह्रियते।

उक्तञ्च भाष्ये– **निर्विकल्पकं केनचिद्विशेषेण** इति। संस्कारस–चिवत्वतदसचिवत्वकृतनिर्वचनप्रतिक्षेपकाक्षेपस्येदं समाधानम्–

तत्र हि निर्विकल्पकस्य संस्कारासचिवत्वज्ञानस्वीकारे, सविकल्पकस्य च संसारसचिवत्वस्वीकारे चोभयविधस्य ज्ञानस्य स्मृतित्वमुत प्रत्यभिज्ञात्वरूपमाक्षितम्। तत्रोच्यतेसंस्कारमात्रजन्यं ज्ञानं स्मृतिः। सविकल्पकप्रत्यक्षन्तु इन्द्रियसन्निकर्षेण संस्कारसहकृतेनोत्पद्यमानं ज्ञानं भवति, ताकथमिव स्मृतिरूपत्वमापद्येत। प्रत्यभिज्ञायां सविकल्पत्वकथनं सिद्धान्त इष्टमेव।

ननु सर्वाण्यपि सविकल्पकानि चेत्प्रत्यभिज्ञाविशेषाणि स्युरिति चेन्न, यद्यपि प्रत्यभिज्ञायाः सविकल्पकरूपत्वेऽपि प्रत्यभिज्ञाप्रयोजकः–विषयविशेषविशिष्टविषयकसंस्कारो भवति। तथा च सविकल्पकसामान्ये प्रत्यभिज्ञात्वापत्तिः न समीचीना। प्रत्यभिज्ञा तदुच्यते – यत्प्रत्यक्षं कालान्तरदेशान्तरविशिष्टभेदविषयकम्, कालान्तरदेशान्तरसम्बन्धविषयकं वा संस्कारविशेषं सहकृत्य भवति। प्रत्यभिज्ञेतरसविकल्पकं तद्भवति यत् विशेषणगतानुवृत्तिविषयकसंस्कारसहकृतं भवति।

विकल्पस्य नामजात्यादिरूपभेदपरत्वात् सर्वप्रत्यक्षस्यापि भेदविषयकत्वं विचार्यतेऽत्र सविकल्पकनिर्विकल्पकरूपभेदानुमोदनाय। भेदविषयकसिद्धान्तस्तु –

प्रत्यक्षं जात्यादिविशिष्टवस्तुविषयम्। जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वरूपस्य च भेदव्यवहारहेतुत्वमिति। तत्रैवमाक्षिप्यते– भेदः दुर्निरूपः। भेदस्तु न प्रत्यक्षेण गृह्यते। यतो हि शब्दादिविषयेष्वुपपद्यमानं भेदमिन्द्रियाणि बाह्यानि न गृह्णन्ति। भेदो न मानसप्रत्यक्षविषयः आन्तरत्वाभावात्। नानुमानं भेदसाधकम्। तथा च पटः घटभिन्नः नामाकारादिभेदात् दण्डवदित्याद्यनुमानानि नामाकारभेदस्य घटपटभेदसिद्ध्याधीनत्वेनान्योन्याश्रयदोषग्रस्तत्वात् दूरोत्सारि–तानि। सादृश्यज्ञानाभावादेवोपमानं न भेदबोधकम्। श्रुतीनामभेदार्थप्रतिपादनपरत्वात् न शब्दः भेदसाधकः। घटः पटो नेत्याद्यर्थापत्तिप्रमाणेनापि भेदः न बुद्ध्यते,

भेदव्यवहारप्रतीतिस्तु भ्रान्तिसिद्धा। अनुपलब्ध्यापि पटभेद: घटेऽनुपलब्धि प्रमाणेन भवतीति वक्तुं न शक्यते, अनुपलब्धिप्रमाणस्याभावविषयकत्वात्, भेदस्य च भावधर्मरूपत्वरूपाच्च तथा। अभावस्य भेदस्य भावधर्मत्वे न दोष इति वक्तुं शक्यम्। यतो हि भावस्याभावो धर्म इति कथनं व्याहतमेव। जले दाहकत्वाभावरूपो धर्मोऽभावरूपोऽस्तीति न, यतो हि जले दाहनिवारकत्वस्य भावरूपस्यैव सत्त्वात्। तथैव घटध्वंसोऽपि चूर्णत्वादिरूपभावरूप एव। कार्यस्य नाशो नाम स्वकारणेऽवस्थनमेव। भेदस्याभावत्वस्वीकारेऽपि न प्रमाणेन तत्सिद्धि: भवति। पटो घटो नेत्याद्यन्योन्याभावस्य पटघटभेदज्ञानविषयत्वात् भेदस्यैव स्वयमन्योन्याभावत्वे- नात्माश्रयो नाम दोष: आपद्यते। भेदान्योन्याभावयो: पृथग्रूपेण स्वीकारे चान्योन्याश्रयदोषो भूयते।

एवञ्च पटो न घट इत्यन्योन्याभावस्य सिद्धावेव तदधीना भेदसिद्धि: भवति। भेदस्य सिद्धावेव पटो न घट इति अन्योन्याभावप्रतीति: सिद्ध्यति इति रूपोऽत्रान्योन्याश्रयदोषस्य। भेद: भ्रान्तिरूप एवेति केचन दार्शनिकानां विचारनिष्कर्ष:।

तत्रैव समाधीयते-

गवादिपदार्थेषु विद्यमानगोत्वादिरेव भेद:। तथा च गोत्वादीनामेव भेदत्वस्वीकारात् शब्दाद्यनन्तर्भूतभेदस्य बहिरिन्द्रियग्राह्यत्वात्। बहिरिन्द्रिय-ग्राह्यत्वादेव भेद: मानसप्रत्यक्षस्यापि विषय:। घट पदाद्भिन्न: इत्याद्यनुमानमपि भेदसाधकत्वेनानुक्तत्वात् नात्र युक्तम्। अभेदार्थप्रतिपादकश्रुतिवाक्यवद्ध-दप्रतिपादकवाक्यानामपि बाहुल्याच्छब्द: न भेदसाधक इति वक्तुं शक्यते। अभावस्य भावधर्मत्वस्वीकरे दोषाभावादेव घटो न पट इति व्यवहारानुपपत्त्या भेद: अर्थापत्तिप्रमाणेनापि सिद्धत्येव। कार्यनाशस्य कारणावस्थानरूपत्वमपि सिद्धान्त इष्टमेव। भेदस्य घटत्वादिरूपत्वादन्योन्याश्रयकृतदोष: न सम्भवति। यत्र पट: घटो न भवतीति व्यवहारस्तत्रैव प्रतियोग्यनुयोगिज्ञानसापेक्ष:। भदस्यान्योन्याभावस्य च भिन्नत्वेऽन्योन्याश्रयदोष इति कथनमपि व्यर्थमेव। घटत्वादिरेव भेद: तस्य च घटज्ञाने विषयत्वात्। भेदज्ञानं घटज्ञानकाल एव जातमिति भेद: प्रत्यक्षप्रमाणग्राह्य एव अत: प्रत्यक्षं सविशेषविषयमेव।

भाट्टसम्मतज्ञाततास्वरूपनिरूपणम्

प्रो. के.ई. देवनाथन्

इन्द्रियार्थसन्निकर्षात् प्रत्यक्षं जायते। तथा लिङ्गदर्शनादिना अनुमित्यादिरुत्पद्यते। जायमानमिदं प्रत्यक्षादिकं मानसप्रत्ययवेद्यमिति नैयायिकाः। ज्ञानं स्वज्ञप्तौ नियमेनान्यज्ज्ञानं नापेक्षते, तत् स्वविषयकमत एव स्वप्रकाशमिति प्राभाकराः। वेदान्तिनोऽपि ज्ञानस्य स्वप्रकाशत्वमाशेरते।

भाट्टमतम्

कुमारिलभट्टानुयायिनस्तु ज्ञानस्यातीन्द्रियत्वमाचक्षते। तेषां मते ज्ञानेन विषये ज्ञातताख्योऽतिशयो जायते, यः घटो ज्ञात इत्यनुभवसिद्धः। स च 'मया ज्ञातः' इति अनुभवबलेन च पुरुषविशेषजन्यः, तदनुभवमात्रविषयश्च। अतः विषयनिष्ठोऽपि ज्ञातताख्यातिशयः घटादिवत् सर्वेषां प्रत्यक्षविषयो न भवति। अयं चातिशयः अनुमित्यादिपदार्थेष्वपि जायते, अनुमितः श्रुतः, इत्यादि अनुभवस्याविशेषात्। स्मृतिस्थले स्मृत्या ज्ञातता उत्पद्यत इति न स्वीक्रियते, अनुभवजन्यसंस्कारकाले सर्वदा प्रागुत्पन्नज्ञाततायाः सत्त्वात्। गृहीतविस्मृतार्थश्रुतिस्थले प्रागुत्पन्नज्ञाततायाः नष्टत्वात् प्रामाण्यं सम्भवति। ज्ञातताश्रयवस्तुग्राहित्वं गृहीतग्राहित्वं स्मृतेः प्रागुत्पन्नज्ञातताश्रयवस्तुग्राहित्वमिति न प्रमात्वम्। अतः स्मृतेः प्रमात्वाभावानुरोधेन स्मृत्या ज्ञाततोत्पत्तिः न स्वीक्रियते। अपि च विषये ज्ञानेन किञ्चित् यदि नोत्पाद्यते, तदा इदं ज्ञानं घटीयम् इदं ज्ञानं पटीयम् इति व्यवस्था नोपपद्येत। घटस्य ज्ञानम् इत्येव व्यवहारः, न तु ज्ञानस्य घट इति। अतः घटादिना ज्ञाने आकारः समर्प्यते "हेतुत्वमेव तद्युक्तं यत् ज्ञानाकारार्पणक्षमम्" इति बौद्धोक्तं न ग्राह्यम्। भाट्टा अपि निराकारज्ञानवादिनः।[1] घटगतोपकारः घटसमवेतकार्यत्वात् कपालसमवेतघटवत् इत्यनुमानेन ज्ञाततायाः पुरुषविशेषनियन्त्रितत्वमपि

सम्भवति। उक्तं च तत्त्वटीकायाम् ''अर्थप्रकाशौ हि पुरुषविशेषधीजन्यतया तत्प्रतियोगितयैव स्वतः परतो वा कुतश्चिद्धातत्वात् तद्गतज्ञानानुमापक इति। अपि च ज्ञानस्य स्वप्रकाशत्वं न युक्तम्। अर्थान्तरं स्पृशतोऽङ्गुल्यग्रस्य स्वात्मस्पर्शवत् अशक्यवत्। आहुश्च

अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति।
स्वांशेन ज्ञानमप्येतं नात्मानं ज्ञातुमर्हति। इति।

अतः ज्ञानस्वप्रकाशत्वमनुपपन्नम्। अस्तु ज्ञानं मानसप्रत्यक्षग्राह्यम्, क्षणिकत्वे सति आत्मविशेषगुणत्वात् सुखादिवत् इत्यनुमानेन ज्ञानस्य प्रत्यक्षत्वमिति न शङ्कनीयम्। मानसस्य सुखादेरबुभुत्सितग्राह्यत्वदर्शनात् ज्ञानस्यापि तथात्वापत्त्या अनन्तज्ञानावलीप्रसक्त्या ज्ञानान्तरस्यावकाशभाव प्रसङ्गात्। अपि च ज्ञानमतीन्द्रयं साक्षात्कृततारूपधर्मानाश्रयत्वात् इत्यनुमानं ज्ञानातीन्द्रियत्वे प्रमाणं न हि घटः साक्षात्कृत इतिवत् ज्ञानं साक्षात्कृतम् इति प्रतियन्ति लोकाः।

भाट्टमतस्य परिशीलनम्

तदिह भाट्टमतं नोररीकुर्वन्ति नैयायिकादयः। तथाहि घटादौ विषये ज्ञानेन उपकारः कश्चित् जायत इति हि भाट्टाः तन्न यदि तद्गतोपकारजनकत्वं विना ज्ञानस्य तदीयत्वं वक्तुं वा शक्यते, तदा उपकारजननात् प्राक् तदीयत्वरूपविशेषाभावात् ज्ञानं तत्रैवोपकारं जनयेदिति कथम्? येन इन्द्रियार्थसन्निकर्षादिना ज्ञानं जायते, तत्रैव उपकारं जनयतीति वक्तुं न शक्यम्, तर्हि तेनैव तदीयत्वं ज्ञानस्य सिद्ध्यतीति किमर्थमुपकारः कल्प्यते?

अपि च अतीत-अनागतविषययोः कथं ज्ञातता ज्ञानेनोत्पद्येत? तत्र आधारस्याभावात्। उक्तं च संवित्सिद्धौ-

अतीतेऽनागते चार्थे कथं प्राकट्यसंभवः।
न हि धर्मिण्यसत्येव धर्मः संभवमृच्छति॥

न च घटस्यातीतत्वेऽपि घटत्वस्य सामान्यस्य सर्वदा सत्त्वात्तत्र ज्ञातता जायत इति वाच्यम्, तथात्वे ज्ञानस्य घटीयत्वं न स्यात् घटत्वीयत्वमेव

स्यात् इत्यापत्तेः। न च धर्मधर्मिणोः भेदाभेदाङ्गीकारात् घटत्वीयत्वेऽपि घटीयत्वं ज्ञातताया उपपद्यत इति वाच्यम्। चक्षुषा घटे ज्ञायमाने रसस्यापि ज्ञानप्रसङ्गात्, घटीयत्वे ज्ञानस्य घटतादात्म्यापन्नरसीयत्वस्याप्यापत्तेः। यदि सामान्याकारेण ज्ञातता उत्पद्यत एवेत्युच्यते तर्हि विशेषाकारेण सा न जातेति अतीतादौ अनुपपत्तिः तिष्ठत्येव। उक्तं च उदयनाचार्यैः–

स्वभावनियमाभावात् उपकारोऽपि दुर्घटः।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा॥

अर्थे सति सुघटत्वेऽपि इत्यन्वयः

यदुक्तं क्रियाजन्यफलशालित्वं कर्मत्वम्। ज्ञानस्य कर्म घटादि। तत्र ज्ञानेन कश्चिदुपकारः जननीय इति, तदापि न ज्ञानं स्वकर्मणि किञ्चित् करोति क्रियात्वात् इत्यनुमाने क्रियाशब्देन धात्वर्थमात्रं यदि स्वीक्रियते तदा शरसंयोगेन गगने उपकारस्याजननात् संयोगरूपधात्वर्थस्वीकारे व्यभिचारः। स्पन्दरूपक्रिया यदि क्रियापदेन विवक्ष्यते तदा ज्ञाने गुणे स्पन्दत्वाभावात् स्वरूपासिद्धिः। अतः ज्ञातो घट इत्यनुभवे घटे ज्ञानवैशिष्ट्यमेकमेव भासते, नातिरिक्तं ज्ञाततादि इति। न च ज्ञातता अनुभवसिद्धा घटो ज्ञातः इति सामान्यतः साक्षात्कृतो घटः अनुमितो घट इत्यादिना विशेषरूपेण सोऽतिशयोऽनुभूयते इति वाच्यम् ''अर्थेनैव विशेषो हि निराकारतया धियाम्'' इति हि बौद्धखण्डने उच्यते। अयं भावः यथा बौद्धसम्मतज्ञानसाकारत्वखण्डनप्रकरणे ज्ञानस्य अर्थवैशिष्ट्यमेव विशेषः न तु ज्ञाने कश्चित् विषयजन्यातिशयः इत्युच्यते, तद्वत् क्रियया कर्मणि उपकारः कश्चित् जन्यते इत्यपि न स्वीक्रियते क्रियावैशिष्ट्यमेव कर्मविशेषकम्। घटक्रिया पटक्रियेतिवत् कृतः घटः करिष्यते घट इत्यादि, तथैव गृहाण घटज्ञानं पटज्ञानम् इतिवत् ज्ञातो घटः ज्ञास्यते घट इति।

कथमसम्बद्धयोः विषयविषयिणोः धर्मधर्मिभाव इति चेत् न ध्वस्तो घट इतिवत् सम्भवात्। न हि ध्वंसस्य घटस्य च कश्चित् संबन्धोऽस्ति। ध्वंसप्रतियोगिभूतघटादिनिरूपणाधीननिरूपणकः प्रतियोगित्वरूपसम्बन्धं विना नातिरिक्तं सम्बन्धमपेक्षते इति यथा तथा घटस्य ज्ञानस्य च सम्बन्धस्वभावापेक्षया नान्यः। एतत्सर्वमभिप्रेत्य प्रत्यपादि आचार्यैः–

अनैकान्त्यादसिद्धेर्वा न च लिङ्गमिह क्रिया।
तद्वैशिष्ट्यप्रकाशत्वादध्यक्षानुभवोऽधिके॥ इति।

ननु ज्ञानमतीन्द्रियम्, असाधारणकार्यानुमेयम्। असाधारणकार्येण यदि नानुमीयते तदा अज्ञातस्य ज्ञानस्य कथं व्यवहारः। एवं न च ज्ञानातीन्द्रियत्वात् ज्ञातता स्वीकार्या इति चेन्न, अन्योन्याश्रयात्। प्रथमतो ज्ञाततानुभवः, ततः ज्ञानानुमानम् ततः ज्ञानव्यवहारग्रहणम् इति क्रमः। ज्ञातताया ज्ञानज्ञानं ज्ञाते च ज्ञाने व्यवहारान्यथानुपपत्त्या ज्ञातताज्ञानम् इति अन्योन्याश्रयः। किन्न घटादिव्यवहारान्यथानुपपत्त्या ज्ञातता न कल्पनीया ज्ञाततया हेतुत्वेन स्वीकृतस्य ज्ञानस्यैव साक्षात् व्यवहारहेतुत्वं स्यात्। किमर्थं मध्ये ज्ञाततयाः? किञ्च ज्ञानेन प्राकट्यं (ज्ञातता) जायत इति पक्षे ज्ञाततया ज्ञानानुमानं स्वीक्रियते तर्हि ज्ञातताज्ञानं यदि अनुमितिरूपं तथा अनवस्था यदि ज्ञातताज्ञानं स्वप्रकाशरूपं तदा ज्ञानमेव स्वप्रकाशमिति स्वीक्रियताम्।

एतत्सर्वं श्लोकैः संगृहीतम्। तथाहि–

यदि कल्प्येत विषये प्राकट्यं व्यवहारतः।
तद्धेतुत्वेन कल्प्या धीस्तत्फलार्थं प्रकल्प्यताम्॥
यथा तत्रैव तस्यैव प्राकट्यं ते धिया भवेत्।
तथा भानादयोऽपि स्युः किमन्तर्गडुक्लृप्तितः॥
प्राकट्यं प्रकटं स्याद्वः परतः स्वत एव वा।
आद्येऽनवस्थितिः शेषे बुद्धिरेव तथा न किम्॥[1]

न च ज्ञानस्य प्रत्यक्षत्वं वक्तुं न शक्यम् इन्द्रियेणानुपलभ्यमानत्वात्, साक्षात्कृततानाश्रयत्वात् क्षणिकत्वाद्वा इति वाच्यम्। प्रथमे हेतौ साध्याविशिष्ट-त्वात्। द्वितीये आश्रयासिद्धेः तृतीये विकल्पासहत्वाच्च। एतद्विस्तरः न्यायकुसुमाञ्जलौ।

अन्ये तु ज्ञाततायाः विषयधर्मस्य विषयस्य घटादेरिव सर्वप्रत्यक्षवेद्यत्वं स्यात्। न च यस्य धिया द्वित्वं जन्यते, तेन तदनुभूयते, तद्वत् ज्ञाततापि यस्यानुभवेन जन्या, तेनैव ज्ञायत इति वाच्यम्, अपेक्षावेद्याकारव्यतिरिक्त

द्वित्वादौ प्रमाणाभावात्। यथा बुद्ध्या द्वित्वादिः जायत इत्युच्यते, तयैव द्वित्वादिव्यवहारो भवतु। अतीतादौ द्वित्वाद्युत्पत्तेः वक्तुमशक्यत्वात्। अपि च अतिरिक्तद्वित्वस्वीकारेऽपि द्वित्वदृष्टान्तोऽत्र भवति। द्वित्वादेरिव अनन्यथासिद्धप्रत्यक्षस्य ज्ञातताख्यातिशयेऽभावात्। तस्मात् विषयधर्मस्य कल्प्यमानस्य ज्ञातताख्यस्य सर्वपुरुषवेद्यत्वं स्यादित्याहुः।

किञ्च ज्ञाततां विना ज्ञानघटयोः वैशिष्ट्यमुपपद्यते, यथा ध्वंस-घटयोः अतिरिक्तसम्बन्धं विना वैशिष्ट्यप्रत्यय उपपद्यत इति उदयनाचार्याः प्राहुरित्युक्तम्। ध्वंसः कथं निराधार इति प्रश्न इदानीं समाधीयते। ध्वंसो न निराधारः प्रतियोगिसमवायिदेशवृत्तित्वात्। कपालध्वंसानन्तरघटध्वंसः घटसमवायिनि कथं स्यादिति न प्रष्टव्यम्, तद्भिन्नदेशेऽपि सम्भवात्। न तर्हि प्रतियोगिसमवायिदेशेनैव प्रध्वंसनिरूपणम् इति नियमः, प्रकारान्तरेणापि निरूपणात्। तस्मात् यस्य यावती ग्रहणसामग्री तां विहाय तस्यां सत्यां तदभावो यत्र क्वचिन्निरूप्यो देशे काले वा। इयांस्तु विशेषः-सा सती चेत् प्रत्यक्षेण। असत्येव ज्ञाता चेत् अनुमानादिनेति स्थितिः इति।[2]

न च अङ्गुल्यग्रदृष्टान्तः ज्ञानस्य स्वप्रकाशत्वे विरुध्यत इति वाच्यं ज्ञानस्य स्वप्रकाशत्वानभ्युपगमात्। तदभ्युपगमेऽपि अहं घटं जानामीति अनुभवबलेन सिद्धस्य ज्ञानप्रत्यक्षत्वस्यापलापायोगात्। अङ्गुल्यग्रदृष्टान्तः योगस्य द्विष्ठत्वात् तद्विषये सम्भवति, न ज्ञानविषये। उक्तं च तत्त्वटीकायां वेदान्तदेशिकैः

अङ्गुल्यग्रादिदृष्टान्तमात्रमप्यत्र निष्फलम्।
दृष्ट्यदृष्टिविशेषेण सर्ववस्तुव्यवस्थितेः॥

अस्पृष्टिस्स्वात्मनस्तत्र संयोगाद्विष्ठता बलात्।
दृष्टान्तमात्रभक्तेन दीपादिः किन्न दृश्यते।[3]

यथा दीपः अन्यान् प्रकाशयति, स्वस्य प्रकाशनेऽन्यदीपनिरपेक्षः तथा ज्ञानं स्वप्रकाशे ज्ञानान्तरनिरपेक्षो भवितुमर्हतीत्यर्थः।

एतावत्पर्यन्तं ज्ञातताखण्डनं संगृहीतम्

भाट्टमीमांसकानां निर्णयः

ज्ञातताया साधनं ये कुर्वन्ति भाट्टास्ते गुरुसम्मतं ज्ञानस्वप्रकाशत्व निराचिकीर्षया ज्ञानस्यानुमेयत्वसिषाधयिषया तत् कुर्वन्ति, इति ज्ञातव्यम्। ज्ञानं हि अनुमेयं चेत् तत्र तत्कार्येण स्वरसतः तदनुमितिरिति तेषामाशयः। उदयनाचार्याः न्यायकुसुमाञ्जलौ वेदान्तदेशिकास्तत्त्वटीकायां न्यायसिद्धाञ्जने च तत्पक्षं खण्डयन्ति। तत्संग्रह एतावत्पर्यन्तं कृतः। भाट्टमतानुसारेण वार्तिके, न्यायरत्नाकरे, शास्त्रदीपिकातर्कपादे च कृतः ज्ञाततासमर्थनप्रकारः संग्रहेण प्रदर्श्यते। भाट्टचिन्तामणौ तथा मानमेयोदये च ज्ञातता्स्वरूपसमर्थनं दरीदृश्यते।

परन्तु पार्थसारथिमिश्राणां ज्ञानानुमेयत्वे निर्भरे सत्यपि न ज्ञातताख्य-धर्मसमर्थने तावान् निर्भरो लक्ष्यते इति तद्ग्रन्थतो लभ्यते। अपि च भाट्टा ज्ञाततापक्षमेवाश्रयन्त इति प्रथास्ति। उदयनाचार्यैः भाट्टमतमेवेदम् इति अनूद्य खण्डनं चाकारि इत्यतः ज्ञाततापक्षोऽत्र विव्रियते।

भट्टानुसारी सिद्धान्तः

ज्ञानेन विषये कश्चिदतिशयो जन्यते, यो हि प्राकट्यम्, ज्ञातता, प्रकाशः अवभासनमित्यादिशब्दैः व्यवह्रियते। अयं प्रकाशः पार्थसारथि मिश्रैरेवमुपपादितः। तथाहि यथा पाकक्रिया स्वकर्मणि तण्डुलादौ विकृत्त्यादि फलं जनयति, तथैव ज्ञानमपि क्रियाभूतं इन्द्रियाधीनज्ञानजन्यमपरोक्षत्वं, लिङ्गादिजन्यज्ञानजन्यं परोक्षत्वं च फलं स्वस्वविषये जनयति। विषयेषु परोक्षापरोक्षविभागः सर्वजनेष्टः वरीवर्ति। अयं परोक्षापरोक्षविभागः विषयाविषयविभागश्च फलं ज्ञानजन्यं विना न संभवति। तच्च फलं प्रकाशापरपर्यायं कारणभूतज्ञानं कल्पयति। एवं ज्ञातताया निरूपणं कृतं तैः।

ज्ञानस्यानुमेयत्वादिभिः श्रीपार्थसारथिमिश्रैः प्रकारान्तरेणापि ज्ञानानुमानं विशदीकृतम्। तथाहि ज्ञानक्रियाद्वारा ज्ञातुरात्मनः ज्ञेयस्य कर्मभूतस्य चार्थस्य च व्याप्तव्याप्यत्वलक्षणः कश्चित् सम्बन्धोऽस्ति। आत्मा हि नित्यः आगन्तुकधर्ममन्तरा विषयं न व्याप्नुयात् इति स आगन्तुकधर्मो भवति ज्ञानमनुमानसिद्धम् अयं व्याप्तृव्याप्यत्वलक्षणः सम्बन्धः मानसप्रत्यक्षवेद्यः।

आकारश्च ज्ञातो मया घट इति निरूपितः। न च संविदः स्वप्रत्यक्षत्वमेव स्वीक्रियताम्, किमर्थं तस्या अनुमानमिति वाच्यम्। प्रथमं विषयं प्रकाशञ्च पुनः सम्बन्धं प्रकाशयितुं हि नार्हति संवित्। क्षणिकत्वात्। तस्मात् मानसप्रत्यक्षगम्यः आत्मनोऽर्थेन सह सम्बन्धः ज्ञानं कल्पयतीति युक्तम्।

न्यायरत्नाकरेऽपि तैरयं पक्षः विशदीकृतः। ज्ञातताख्यधर्मोऽन्यथासिद्धः, प्रत्यक्षेऽतिशयस्य कस्यचित् ज्ञानकल्पकत्वेऽपि अनुमानादिषु तस्य कथं ज्ञानकल्पकत्वम्, तत् हि अर्थनिष्ठस्य तस्य प्रत्यक्षेणात्रानवगतत्वात्। कथं तस्यातिशयस्यानुमितिकल्पकत्वम् इति यावत्। व्यवहारात् प्राक् तादृशातिशय-व्याप्यस्य लिङ्गस्याप्रमितत्वात्। अप्रमितस्य तस्यातिशयस्याकल्पकत्वात् नानुमितिकल्पनोपपत्तिः। अनुमितेऽप्यर्थे ज्ञातो मया अग्निरिति पुरुषः ज्ञातमग्निमनुसन्धत्ते, अतः ज्ञाने प्रमाणं वक्तव्यम्। तच्च ज्ञातुः ज्ञेयेन सहाप्तत्वरूपम्। तदेव द्वारभूतं ज्ञानं कल्पयति। आप्तत्वरूपः सम्बन्धः मानसप्रत्यक्षगम्यः। कः पुनरसौ सम्बन्धः उक्तं प्राप्तिरिति इति न्यायरत्नाकरः। स्मृतिस्थलेऽपि यत् पूर्वानुभवस्य ज्ञानं विनैव स्मृत्युत्पत्तिः तत्रापि मानसप्रत्यक्षेण द्रष्टृदृश्यत्वसम्बन्धेन ज्ञानकल्पनायां तस्य च ज्ञानस्य इन्द्रियाद्यजन्यत्वात् स्मृतित्वनिश्चये सति पूर्वानुभवकल्पना। तथा च न्यायरत्नाकरपरिशीलने ज्ञातताख्यधर्मस्वीकारे तेषां निर्भरो नास्तीति गम्यते।

ज्ञाततापक्षः

परन्तु शास्त्रदीपिकायामर्थगतो वा ज्ञानजन्योऽतिशयः कल्पयति ज्ञानम्। अवश्यमङ्गीकरणीयश्चायमतिशयः त्रितयप्रतिभासवादिभिरपि। त्रितयं प्रतिभासत इति वदता ज्ञानज्ञेयज्ञातृषु त्रिष्वप्यनुगतं प्रकाशनपदवाच्यमव-श्यमङ्गीकर्तव्यम्। तत्र ज्ञानत्वं तावन्नानुगतं तद्धि ज्ञाने एव न ज्ञातृज्ञेययोः। ज्ञेयत्वमपि ज्ञेय एव न ज्ञातृज्ञानयोः। ज्ञातृत्वं ज्ञातर्येव न ज्ञानज्ञेययोः। व्यवहारविषयत्वं प्रकाशमानत्वमिति चेत् न। संविदि व्यवहाराद्भिनष्टत्वात्। शब्दप्रयोगो व्यवहार इति चेत् न उक्तदोषत्वात्। तदवश्यं प्रकाशनभासनादिपर्यायः धर्मविशेषः त्रिष्वप्यनुवृत्तः गोत्वमिव गोव्यक्तिष्वस्ति इति ग्रन्थेन ज्ञाततापक्षः समर्थितः।

ज्ञाततापक्षे दोषाभावः

ज्ञातो घट इति प्रतीतिबलात् ज्ञातताख्यधर्मः ज्ञानोत्पाद्यः स्वीकार्यः। एवं साक्षात्कृतत्वादिरपि। न च विषयता विषयस्वरूपा, भूतलं घटवत् इति विशिष्टज्ञानस्य ''भूतत्वं घटश्च'' इति। समूहालम्बनज्ञानस्य न च वैलक्षण्यानुपपत्तेः। नापि ज्ञानस्वरूपा 'भूतलं घटवत्' इति ज्ञानस्थले भूतलीयं घटं जानामीति अनुव्यवसायापत्तेः (भा चि. 13) अतः उभयातिरिक्ता विषयता नित्या स्वीकार्या, तस्या अनित्यत्वे अनन्ततत्तद्विषयकज्ञानैरनन्त-तत्तद्विषयतोत्पत्तिः। तन्नाशकल्पनाद् गौरवापत्तेः। भाट्टचिन्तामणिकारास्तु आत्मनः घटेन सह व्याप्यव्यापकभावरूप सम्बन्धो मानसप्रत्यक्षगम्य इति पक्षः न युक्तः तत्पक्षस्य दुर्ज्ञेयत्वात् इत्याहुः।

द्वित्वप्रत्यक्षे यावदाश्रयप्रत्यक्षं न कारणं तस्य संयोगप्रत्यक्ष एव हेतुत्वात्। सम्बन्धप्रत्यक्षं प्रति यावदाश्रयप्रत्यक्षं कारणमिति कार्यकारणभावस्य रामरुद्रीये निरस्तत्वात् व्यासज्यवृत्तिधर्मप्रत्यक्षे हि तस्य कारणत्वं न स्वीक्रियते। वायुप्रत्यक्षं विनापि तन्निष्ठस्पर्शप्रत्यक्षस्य नैयायिकाङ्गीकारात् कथमाश्रयप्रत्यक्षं विना भूतभावि-अनुमितपदार्थे ज्ञाततायाः ग्रहणमिति प्रश्नोऽपि नोचितः। उपपादितश्चायमर्थः शब्दानित्यत्वप्रकरणे न्यायकुसुमाञ्जलौ। न चाश्रयाभावे विषयताद्वित्वादेः क्वावस्थानमिति वाच्यं कपालादिनाशे क्षणमात्रं घटादेरिव विषयताया अपि सत्त्वे बाधकाभावात्। अतो नष्टघटादावपि घटो ज्ञात इति अनुभवबलात् ज्ञाततायाः भूतभाविनिष्ठत्वोपपत्तिः।

न च ज्ञातो घट इति प्रतीतिबलात् ज्ञातताया इव इष्टो घट इति अनुभवबलात् इष्टताया अपि अतिरिक्तायाः स्वीकारापत्तिः। तथा ध्वस्तो घटः इत्यत्रापि ध्वंसजन्यातिशयः घटेऽस्तु इति वाच्यम्; विषयताया अतिरिक्तत्वपक्षे एव ज्ञातताया अतिरिक्तत्वस्य स्वीकारात्, तत्पक्षे इष्टताया अतिरिक्तायाः स्वीकारे बाधकाभावात्।

न च ज्ञाततायाः एव ज्ञानानुमापकत्वात् ज्ञातताज्ञानेन ज्ञाततान्तरस्वीकारे अनवस्थेति वाच्यम्; ज्ञातताज्ञानस्यावश्यज्ञेयत्वाभावेन अनवस्थाभावात्। एवमेव अन्येऽपि आक्षेपाः समाधेया इति दिक्।

मीमांसकमते प्रत्यक्षप्रमाणम्

डॉ. ए.एस. आरावमुदन्

लोके तावत् सुखमिच्छद्भिः पुरुषैः तत्प्राप्तुं नैकाध्वानं समनुश्रीयते। तद्वेदेनैव सिद्ध्यतीति सप्रमाणेन साधयन्ति वाक्यशास्त्रविदः। सोऽयं वेदोऽप्रमाणम् इति भावयतः बौद्धादीन् निराकर्तुं मीमांसापूर्वाचार्यैः, को धर्मः? तत्केनावगम्यते? येन तज्ज्ञानं भवति तत्प्रमाणं वा न वा, यदि प्रमाणं, तर्हि केन प्रमाणेन, धर्मे कस्य प्रमाणस्य प्रवृत्तिरित्याद्याक्षेपोत्थापनद्वारा सूत्रसम्मतसमाधानं समादायि। तदर्थं प्रधानतया सूत्रत्रयं स्वीक्रियते, **'तस्य निमित्तपरीष्टिः**[1], **'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्**,[2] **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्**[3] इति।

अत्र तस्य निमित्तपरीष्टिरिति सूत्रनिरूपणावसरे शाब्दमेव प्रमाणं वा उतान्येऽपि प्रत्यक्षादयः वा इति स्वात्मनि आक्षेपमुपस्थाय सत्सम्प्रयोगे इति सूत्रमुखेन प्रत्यक्षं धर्मं प्रति न निमित्तमथवा न प्रमाणम् इति ज्ञापितम्। यद्यपि सूत्रदर्शनेन इदं सूत्रं प्रत्यक्षलक्षणं ब्रवीति इति प्रतीयते। तथापि तदवलोकनेन अयमंशः स्पष्टो भवति यदिदं सूत्रं न प्रत्यक्षप्रमाणं वक्तुं प्रवृत्तम्। किन्तु धर्मं प्रति प्रत्यक्षं न निमित्तमिति बोधितुं प्रवृत्तमिति। कुतो न निमित्तमिति चेत् प्रत्यक्षन्तु विद्यमानवस्तुना सह इन्द्रयसन्निकर्षे सिद्ध्यति। किन्तु धर्मो न प्रत्यक्षगम्यः। तदुक्तं चोदनासूत्रे वार्त्तिककारैः–

---

1. जै. सू. 1/1/3
2. जै. सू. 1/1/4
3. जै. सू. 1/1/5
4. श्लो. वा. चो. सू. –191 श्लो

श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः।
चोदनालक्षणैः साध्या तस्मात् तेष्वेव धर्मता॥[4]

श्रेयसः एव धर्मत्वम्। तदुक्तं चोदनालक्षणात्मकेन कर्मणा। तस्मात् वेदोक्तकर्मणः प्रत्यक्षत्वेऽपि तस्य स्वतः श्रेयस्त्वाभावात् श्रेयस्साधनत्वात् धर्मे न प्रत्यक्षस्य निमित्तत्वम्। अत एव सूत्रे विद्यमानोपलम्भनत्वात्' इति पदं दर्शितम्। तर्हि धर्मं प्रति किं निमित्तमिति विचारे प्रवृत्ते औत्पत्तिकसूत्र-रचनेन स्वाशयं स्पष्टयति, शाब्द एव धर्माधर्मं ज्ञातुं प्रमाणम्। कुत इति चेत् उक्तं भाष्ये–'चोदना हि भूतं भवन्तं भविष्यन्तं, सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्किञ्चन इन्द्रियम्[5] इति। तस्मात् धर्मं प्रति चोदना एव (शाब्दः) प्रमाणमिति उच्यते।

वृत्तिकारस्तु ''न परीक्षितव्यं निमित्तम्। प्रत्यक्षादीनि हि प्रसिद्धानि प्रमाणानि। तदन्तर्गतं च शास्त्रम्। तदपि न परीक्षितव्यम्''[6] इत्युक्त्वा'' व्यभिचारात् परीक्षितव्यम्''[7] इत्यनेन प्रत्यक्षादिप्रमाणसमन्वयं समारभत। तदेवाग्रे वार्त्तिककाराः प्रत्यक्षप्रमाणं शास्त्रसम्मतरीत्या विस्तारेणाकुर्वन्।

मीमांसकमते प्रत्यक्षम्।

प्रत्यक्षलक्षणन्तु भाष्यकाराः ''सत्प्रम्प्रयोगे पुरूषस्येन्द्रियाणां बुद्धि-जन्म तत्प्रत्यक्षम्'' इति समवदन्। तद्यथा यद्विषयकं ज्ञानं तेनैव सम्प्रयोगे-न्द्रियाणां पुरुषस्य बुद्धिजन्म सत्प्रत्यक्षम् इत्यादिना।[8]

लोके तावदिन्द्रियाणां घटपटाद्यर्थेन सह वर्तमानकाले दोषरहितव्यापारादिरूपप्रयोगे उत्पन्नपुरुषबुद्धिरेव प्रत्यक्षज्ञानं जनयति। प्रयोगस्य विद्यमानता एवं कारणदोषाभावेन अयमंशो ज्ञायते यत् प्रत्यक्षं वर्तमानवस्तुप्रकाशकमिति। तत् प्रत्यक्षस्य वर्तमानिकत्वात् (भविष्यति) उत्पद्यमानधर्माधर्मं प्रति तन्न प्रमाणम्। प्रत्यक्षलक्षणं एवमप्युक्तम्–

---

5. शा. भा. चो. सू. पृ. 15
6. शा. भा. चो. सू. पृ. 31
7. शा. भा. चो. सू. पृ. 7
8. शा. भा. चो. सू. पृ. 32

'इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षमिति'।[9]

अत्र सन्निकर्षः द्वेधा भवति। संयोगरूपेण संयुक्ततादात्म्यरूपेण। पृथिव्यप्तेजोभिः चक्षुस्त्वगिन्द्रियाभ्यां, वायोः त्वक्संयोगात्, दिङ्नभस्तमसां दृक्संयोगाच्छब्दस्य श्रोत्रसंयोगात् आत्मनः मनस्संयोगात् ग्रहणम्। एवं चक्षुरादिसंयुक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं यदा भवति तदा संयुक्ततादात्म्यसन्निकर्षः उच्यते। तार्किकास्तु सन्निकर्षः षोढा इति वदन्ति। तदपास्तं वार्त्तिककारेण। अतः तद्वयोरपि सन्निकर्षयोः विद्यमानकालीनत्वात् धर्माधर्मनिर्णये नास्त्यनयोः प्रवृत्तिः।

एवमिन्द्रियसन्निकर्षः प्रकारद्वयेन भवतीति निरुपणाच्च तेन उत्पद्यमानज्ञानस्याऽपि प्रकार इत्थं निरूप्यते। तज्ज्ञानं द्विविधम्। निर्विकल्पकं सविकल्पकं चेति। निर्विकल्पकं नाम इन्द्रियसन्निकर्षानन्तरं द्रव्यादिस्वरूपमात्रावगाहि शब्दानुगमशून्यं यत्संमुग्धं ज्ञानं जायते तत् विशिष्टकल्पनाभावात् निर्विकल्पकमित्युच्यते। तदुक्तं वार्त्तिके–

अस्ति ह्यालोचना ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्।।[10]

एवं शब्दोच्चारणात्पश्चात् जात्यादिविशिष्टवस्तुविषयं रक्तोऽयं घटोयं, इत्यादिव्यक्तविज्ञानं सविकल्पकमिति। तदेवमभिहितं वार्त्तिककारेण–

ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यथा।
बुद्ध्यावसीयते साऽपि प्रत्यक्षत्वेन सम्मता।।[11]

एवं रूपेण निरूपिते सति तद्वयोरपि इन्द्रियसन्निकर्षजन्यज्ञानयोः धर्माधर्मनिर्णये न निमित्तत्वमिति उच्यते। कुत इति चेत् बौद्धानाम्मते निर्विकल्पकमेव प्रत्यक्षम्। जात्यादिज्ञानेन रहितभ्रमभिन्नं ज्ञानं प्रत्यक्षमिति उच्यते। यतो हि स्वर्गादिरूपश्रेयस्साधनता एव धर्मता इत्युच्यते। तादृश धर्मत्वग्रहणं 'इदमस्य साधनम्' इत्यादिविकल्पद्वारा भवति। एवं मीमांसकमते

---

9. मा. मे. पृ. 9
10. श्लो. वा. प्र. सू. 112 श्लो.
11. श्लो. वा. प्र. सू. 120 श्लो.

सविकल्पकज्ञाने भ्रमसंशयाद्यभावः नितरां दृश्यते। तज्ज्ञानं विद्यमानवस्तुना सह भवति। यद्विद्यते तद्धर्मसाधनं भवति।

यथा–यागादयः। एतन्न धर्मः। अतः विद्यमानवस्तुज्ञानजनकप्रत्यक्षस्यापेक्षया शाब्दः एव स्पष्टतया धर्माधर्मज्ञानं जनयतीति न निर्विकल्पकसविकल्पके धर्माधर्मज्ञानग्रहणे प्रमाणे भवतः।

एतदेवाभिलक्ष्य वृत्तिकारैरुक्तं प्रत्यक्षसूत्रे सत्पदतत्पदयोः व्यत्ययेन। एतेषामभिप्रायेण येनार्थज्ञानं भवति तेन सह इन्द्रियसन्निकर्षेण यज्ज्ञानं भवति तत्प्रत्यक्षम् इति। अनेन प्रत्यक्षाभासोऽपि निराकृतो भवति। तत् प्रत्यक्षं लोकसिद्धमव्यभिचारि च तस्मात् परीक्षा न कर्तव्या। तन्निरूपणं परीक्षासूत्रे 'नञ्' अध्याहारेण कृतम्। तदुक्तं वार्त्तिके–

आदिशब्दो मकारान्तो लुकि क्लेशेन सङ्गतिः।
नञध्याह्रियते सूत्रे सङ्करात् परिचोदना॥[12]

एवं रूपेण सूत्रोक्तत्वात् मीमांसकैः लोकसिद्धषट्प्रमाणनिरूपणं कृत्वा शाब्दं विहाय तदतिरिक्तपञ्चप्रमाणानि धर्माधर्मनिर्णये निमित्तत्वेन नाङ्गीक्रियन्ते। अनेनायमाशयः सिद्ध्यति यत् प्रत्यक्षं प्रमाणमेव किन्तु धर्माधर्मज्ञानं प्रत्यक्षप्रमाणेन न भवतीति।

मीमांसामते प्रत्यक्षस्वरूपम्

डॉ. वृन्दावनदाशः

मीमांसासूत्रकारस्य भगवतो जैमिनेः मतानुरोधमिन्द्रियाणां विषये सति संयोगे पुरुषस्य जायते या बुद्धिस्तत्प्रत्यक्षमुच्यते। तथा च सूत्रम् सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानो-पलम्भनत्वात्''[1] इति यथाश्रुतसूत्रतः एवमवगम्यते इन्द्रियार्थसन्नि- कर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति। तथा सति भ्रमात्मकज्ञानेऽपि प्रत्यक्षमुच्यते। तथा च सूत्रम् ''सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम्''[2] इति अत्र तदिति तृतीयान्तमव्ययम्। तेनेति यावत् न च साक्षात्सम्प्रयोग- जत्वोक्तावेव कुत्रापि व्यभिचारादिसम्भवात् तत्सतोर्व्यत्यासः अनावश्यक इति वाच्यम्। पीतशंखद्विचन्द्रादिज्ञाने अतिव्याप्तिवारकतया तत्र सार्थक्यसम्भवात्। मानमेयोदयकारः नारायणस्तु तत्र इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम्[3] इति प्रत्यक्षलक्षणमभ्यधात्, इदं च प्रमाणाभिप्रायेण। गागाभट्टस्तु भाट्टचिन्तामणौ त्रीणि लक्षणानि प्रत्यक्षप्रमाया उक्तवान् यथा (क) इन्द्रियार्थसम्बन्धजन्यं ज्ञानं प्रत्यक्षमिति सूत्रकाराः। (ख) ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। (ग) जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं वा।[4]

इति नवीनैः मीमांसकैः भाट्टमतावलम्बिभिः एवमेव प्रत्यक्षप्रमालक्षणं प्रतिपादितम्। प्रभाकरैः नैयायिकोक्तं प्रत्यक्षलक्षणं नाभ्युपगतम्। तत्र तै दोषाः उद्भविताः। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्य-भिचारिव्यवसायात्मकं प्रत्यक्षम्।[5] इति खलु प्रत्यक्षस्य लक्षणं नैयायिकैः

1. मीमांसासूत्रम् 1.1.4
2. शा.दी. पृ. 48
3. मा.मेय. पृ. 8
4. भा.चिन्ता. पृ. 15
5. न्या.सू. 1.1.4

स्वीक्रियतत्र किं नामाव्यपदेश्यपदस्य सार्थक्यम्? यदा खल्वयं रूपं रूपं इति जानाति रसं रसं इति जानाति तदानीं शब्दजन्यं संभवतीति कस्यचित्स्यात् शाब्दत्वसङ्केतेति तन्निरासाय अव्यपदेश्यमिति।

इदं खलु नोपपद्यते। कुत इति चेत् लक्षणमिदं हि प्रत्यक्षस्य सजातीयविजातीयभेदकं हि नाम लक्षणम्। शब्दाद् भेदस्य इन्द्रियार्थसन्निकर्षजं प्रत्यक्षमित्यनेनैव सिद्धत्वात् नात्र तत्प्रस्तावमर्हति, शाब्दस्य सर्वस्य अनुमानशङ्का यथा शब्दपरीक्षाप्रकरणे प्रतीति विधीयते तथा शब्द सजल्पनानुविद्धस्य प्रत्यक्षस्य शाब्दत्व शंकापि तत्रैव निराकरणीया। अत: निरर्थकमत्र प्रत्यक्षलक्षणगतमव्यपदेश्यपदमिति[6] एवमेवाव्यभिचारिपदमपि विपर्ययादूषणायेति नैयायिकमतं नैव घटते। प्राभाकरमते सर्वज्ञानानां अव्यभिचारिरूपत्वात्।

अपि च तन्मते संशयवारकं व्यवसायात्मकपदमपि निरर्थकम्। स्थाणुर्वा पुरुषो वेति हि स्मृतिरूपज्ञानद्वयम्। नैदमिन्द्रियार्थसन्निकर्षजमिति नैव तस्य प्रत्यक्षत्वप्रसक्ति:। किं च अव्यभिचारिपदेनैव संशयव्युदासस्य सुलभतया पुनस्तन्निरासाय व्यवसायात्मकमिति पदं नैयायिकमते गौरवावहम्। वस्तुतस्तु अव्यभिचारित्वम् व्यवसायात्मकं चेतीदं दलद्वयं न प्रत्यक्षलक्षणे आवश्यकम्। किन्तु प्रमाणलक्षणे अवश्यम्भावि। एवं च तद् विरहितया केवलमिन्द्रियार्थसन्निकर्षोत्पन्नं प्रत्यक्षमित्येव लक्षणमुच्यते तर्हि तदापि अनुमानादिप्रमिति: स्वात्मनि प्रमातरि च नैव प्रत्यक्षभवितुमर्हति। अनिन्द्रियजन्या हि सन्ति,[7] अत: नैयायिकोक्तं लक्षणं नास्माभिरभ्युपगम्यते।

मीमांसकमते तु साक्षात्प्रतीति: प्रत्यक्षम्[8] इति प्रत्यक्षलक्षणम्, न चैवं भावनाप्रकर्षपर्यन्तजा स्मृतिरपि साक्षात्कारवतीति सापि प्रत्यक्षं प्रसज्येत इति वाच्यम्। प्रमाणाधिकारबलात् तद्वारणस्य सुलभत्वात् तथा हि अनुभूति: प्रमाणं तद्विशेषं च प्रत्यक्षमिति स्मृते: तत्राप्रवेशात् न प्रत्यक्षत्वापत्ति:। अनुभूते: स्मृतिव्यतिरिक्ताया: प्रागेव व्यवस्थापितत्वात्। प्रभाकरविजये नन्दीश्वरस्तावत् साक्षात्त्वमिदं प्रत्यक्षलक्षणघटकं त्रिधा व्याचख्यौ। यथा–

---

6. प्र.प. पृ. 134
7. प्र.प. पृ. 139
8. प्र.प. पृ. 149

(क) ''साक्षात्प्रतीतिः स्वरूपप्रतीतिः। स्वस्यैव रूपं, स्वरूपम् असाधारणरूपमित्यर्थः।

(ख) यद्वा अव्यवहितप्रतीतिः साक्षात्प्रतीतिः। अव्यवहितत्वं नाम स्वविषयान्तर्गतज्ञानान्तराव्यवहितत्वमभिप्रेतम्।।

मानमेयोदयसम्मतप्रत्यक्षप्रमाणविमर्शः

डॉ. प्रभाकरप्रसादः

श्रीनारायणप्रणीतो मानमेयोदयग्रन्थः प्रमाणखण्डः प्रमेयखण्ड इति द्विधा विभक्तः। तत्र प्रमाणखण्डः श्रीनारायणभट्टप्रणीतः। प्रमेयखण्डस्तु श्रीनाराणयपण्डितविरचितः।[1] तत्र प्रमाणखण्डे श्रीनारायणभट्टेन ''राम षड्युक्तयो लोके याभिः सर्वोऽनुदृश्यते'' इति श्रीवाल्मीकीयरामायणस्योद्धरण-पूर्वकं षडेव प्रमाणानीति षण्णां प्रमाणानां विवेचनं कृतम्। आदौ प्रमाणानां ज्येष्ठं प्रमाणं प्रत्यक्षप्रमाणमिति प्रत्यक्षप्रमाणस्यैव विचारः कृतः। यतः प्रत्यक्षप्रमाणमनाश्रित्य किमपि प्रमाणं नोत्पद्यते। अतः प्रत्यक्षप्रमाणं ज्येष्ठं प्रमाणम्। अनुमानोपमानार्थापत्त्यनुपलब्धीनां लिङ्गसदृशानुपपन्नादिद्वार त्वाल्लिङ्गादिज्ञानार्थं शब्दद्वारत्वाच्च शब्दप्रमाणस्य तज्जानार्थं प्रत्यक्षस्या-पेक्षादर्शनात्। यद्यपि लिङ्गविज्ञानं प्रत्यक्षेणैव भवतीति नियमो नास्ति शब्दादिनापि सम्भवात् तथापि लिङ्गादिज्ञानानां हेतुभूतलिङ्गादिज्ञानार्थं प्रत्यक्षमपेक्षितमेव। अत एव आपामरं व्यवहारः प्रत्यक्षे किं प्रमाणमिति प्रसिद्धम्। ''प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् इति स्मरणमपि शब्दप्रमाणस्य प्रत्यक्षोपजीव्यत्वे न बाधकम्। अत एवागमबाध्यं प्रत्यक्षमिति ये वदन्ति तेऽपि आगमस्योत्पत्तौ प्रत्यक्षस्यापेक्षित्वं स्वीकुर्वन्त्येव। अतः भामत्यां ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वञ्चेति युक्तम् तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य बोधकतया स्वतः सिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात्। प्रमितावनपेक्षत्वेऽपि उत्पतौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यमिति चेत् न उत्पादकाप्रतिद्वन्द्वि त्वात् इति प्रमाणान्तरोपजीव्यतया प्रत्यक्षस्य ज्येष्ठत्वे न कोऽपि विरोध

---

1. अत्र प्रमाणम् ''प्राङ्नारायणसूरिणा विरचितं सन्मानमेयोदयम्'' प्रमेयप्रकरणस्य मङ्गलाचरणश्लोकः। पृ सं. 149 ''सोऽहं नारायणाख्यो व्यलिखमखिलम् उपसंहारश्लोकः पृ. सं 121

इत्युक्तग्रन्थसन्दर्भेण प्रत्यक्षस्यागमबाध्यत्वेऽनुपपत्तिः प्रकारान्तरेण समाहिता।

एवञ्च ज्येष्ठप्रमाणत्वात्प्रत्यक्षप्रमाणं प्रथमं विविच्यत इति ग्रन्थसङ्गतिर्युज्यते। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन प्रमाणस्यापि वस्तुत्वात् लक्षणप्रमाणाभ्यां तन्निरूपणं प्रसक्तम्। न च प्रमाणस्य प्रमाणान्तरेण सिद्धिः कथमिति वाच्यम्। प्रमाणस्वरूपे प्रमाणसङ्ख्याविषये विवाददर्शनात् प्रमाणेनैव तदपि साधनीयमिति युक्तम्।

प्रकृते मानमेयोदयग्रन्थे निरूपितं प्रत्यक्षलक्षणं विविच्यते इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षमिति प्रत्यक्षलक्षणमुक्तम्। इन्द्रियसामान्यस्य लक्षणं प्रत्यक्षप्रमाकरणमिति नोक्तम् अन्योन्याश्रयप्रसङ्गात्, अपि तु पृथक् पृथक् षण्णामिन्द्रियाणां लक्षणान्युक्तानि। चक्षुर्नाम कनीनिकान्तर्गतं तेजोऽथ जिह्वाग्रगस्तोयांशो रसनं क्षितेरवयवो घ्राणञ्च घोणोदरे। सर्वाङ्गप्रसृताश्च मारुतलवास्त्वङ् नाम कर्णोदरव्योमैव श्रवणं मनस्तु विभु तद्देहे च कार्यावहम्। इति।

अनुमानोपमानयोर्विषयेऽनुमानम् अनुमितिः अनुमेयम्, एवमुप मानमुपमेयमुपमितिरिति शब्दत्रयं पृथक् पृथक् प्रमाणप्रमितिप्रमेयाणां बोधकं दृश्यते परन्तु प्रत्यक्षविषये एवं नास्ति। एक एव प्रत्यक्षशब्दः प्रत्यक्षप्रमाणे प्रत्यक्षप्रमितौ प्रत्यक्षविषये च प्रयुज्यते। अतः अत्र प्रत्यक्षप्रमाणमभिप्रेतमुत प्रत्यक्षप्रमितिरभिप्रेतेति विषये प्रत्यक्षप्रमितिरेवाभिप्रेता। पङ्कजादिष्विव योगरूढिस्वीकारेणानुमानादिषु प्रत्यक्षशब्दस्याप्रवृत्तेः इति ग्रन्थतः प्रत्यक्षशब्दः योगरूढ्या इन्द्रियसन्निकर्षजन्यसविकल्पनिर्विकल्पसाधारणज्ञानवाचक इति निश्चीयते। प्रत्यक्षज्ञानस्य करणं प्रत्यक्षप्रमाणमिति फलितम्। तच्च करणं विवक्षाभेदेनेन्द्रियं तत्सन्निकर्षः तज्ज्ञानं वा भवति। भट्टाचार्यैरप्युक्तम्–

यद्वेन्द्रियं प्रमाणं स्यात् तस्य वार्थेन सङ्गतिः।
प्रमाणफलते बुद्ध्योर्विशेषणविशेष्ययोः॥
हानादिबुद्धिफलता प्रमाणं चेद्विशेष्यधीः॥ इति

शास्त्रदीपिकायाम् सत्सम्प्रयोगे पुरुषेन्द्रियाणां बुद्धिजन्म तत्प्रत्य-क्षम् इदं यथाश्रुतं प्रत्यक्षस्य न लक्षणम् आभासेऽपि तुल्यत्वादिति प्रत्यक्षसूत्रे

तत्सतोर्व्यत्ययेन ''यदाभासं विज्ञानं तेनेन्द्रियाणां सम्प्रयोगे यद्विज्ञानं तत्सत्प्रत्यक्षम्'' इति लक्षणं कृतम्। इन्द्रियसम्प्रयोगजं ज्ञानं प्रत्यक्षमिति चेत् प्रत्यक्षाभासेऽतिव्याप्तिः। न च शुक्तिकायां रजतज्ञानमिन्द्रियसंप्रयोगजं नास्ति। अपि तु इन्द्रियसम्प्रयोगात् शुक्तिशकलं रजतसाधारणेन भास्वरत्वादिरूपेण गृहीतम् अनन्तरञ्च संस्कारोद्बोधाद्रजतं स्मृतम् ततः स्मृतरजतात्मना शुक्तिः व्यक्तिदोषवशाद् गृह्यते। अतो नेन्द्रियसम्प्रयोगजं रजतविज्ञानमिति नातिव्याप्तिः इति चेत् पीतशङ्खद्विचन्द्रादिज्ञानेष्वतिव्याप्तिः स्यात्। साक्षात् सम्प्रयोगजादित्युक्तम्। मानमेयोदयकारैस्तु इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षमित्येव उक्तम्। इन्द्रियसन्निकर्षजन्यं निर्विकल्पसविकल्पसाधारणं ज्ञानं प्रत्यक्षमित्येव योगरूढ्या प्रत्यक्षशब्दार्थ उक्त इति प्रतीयते। अत्रेन्द्रियसन्निकर्षजं प्रमाणमर्थात् प्रमाणज्ञानं प्रत्यक्षमुक्तमेव। भ्रमेऽतिव्याप्ति-निरासो भवतीति प्रमा चाज्ञाततत्त्वावगम इति लक्षणं निर्दुष्टम्। अस्मिन् लक्षणे इन्द्रियम्, सन्निकर्षाः ज्ञानमिति पदत्रयं निहितम्। तेषां क्रमशः व्याख्यानं मानमयोदये कृतम्। रूपज्ञानस्य केनचित् कारणेन भवितव्यमिति सामान्येन सिद्धौ दीपादितेजस एव रूपज्ञानहेतुत्वदर्शनात् तैजसं चक्षुः कल्प्यते इत्यादिना चक्षुः तैजसं, रसनमाप्यम्, पार्थिवं घ्राणम्, वायवीयं त्वगिन्द्रियम् श्रोत्रस्याकाशात्मत्वम्। अयं विशेषः श्रोत्रस्याकाशात्मत्वमत्र प्रतिपादितम्। शास्त्रदीपिकायां दिशः श्रोत्रमिति श्रुत्या श्रवणेन्द्रियस्य दिग्भागत्वमुक्तम्।

सन्निकर्षः द्वेधा। संयोगः, संयुक्ततादात्म्यञ्चेति। द्रव्यग्रहणे संयोगः सन्निकर्षः। तत्र गुणादीनां ग्रहणं संयुक्ततादात्म्यसम्बन्धेन। रूपत्वादीनां ग्रहणमपि संयुक्ततादात्म्येनैव भवति। तत्रापि परम्परया तादात्म्यस्य सम्भवात् इत्युक्तम्। अथवा रूपत्वादीनां ग्रहणं संयुक्ततादात्म्येन भवतु इत्यपि पक्षः स्वीकृतः। ज्ञानञ्च इन्द्रियार्थसन्निकर्षजं निर्विकल्पकं सविकल्पकञ्च प्रथमं जायमानमालोचनाज्ञानं निर्विकल्पकम्। तच्च शब्दानुगमशून्यं सम्मुग्धज्ञानं ज्ञायते। तद्विशिष्टकल्पनाभावान्निर्विकल्पकमित्युच्यते तदनन्तरं शब्दस्मरण-सहकृतं जात्यादिविशिष्टवस्तुविषयं रक्तोऽयं घटोऽयम् इत्यादिव्यक्तविज्ञानं सविकल्पकम्। अत्र सविकल्पकज्ञानस्य निर्विकल्पकजन्यत्वात् साक्षादक्ष-जन्यत्वाभावात् कथं सविकल्पकं प्रत्यक्षं भवति इति प्रश्नः अवतरति।

परम्परयाक्षजं प्रत्यक्षमिति उच्यते चेत् अनुमानादीनामपि प्रत्यक्षत्वप्रसङ्गः। अतः ग्रन्थकारैरुक्तं पङ्कजादिवत्प्रत्यक्षशब्दः योगरूढः इन्द्रियसम्प्रयोगजनिर्विकल्पसविकल्पज्ञानमेव प्रत्यक्षम्। तत्करणञ्चोक्तप्रकारेण इन्द्रियादिरेव। एवमत्र प्रतिपादितं प्रत्यक्षलक्षणं शास्त्रदीपिकादिग्रन्थेषु। अर्थतः प्रतिपादितमेवेति तल्लक्षणघटकीभूतपदानां पदकृत्यानि तत्तद्ग्रन्थेषु स्थितमेवेति विशेषाभावाल्लेखनव्यापारस्तत्र न प्रवर्तते।

सिद्धान्तरीतिषु मया भ्रमदूषितेन।
स्यादन्यथापि लिखितं यदि किञ्चिदत्र॥

संशोधने च विबुधा सदया भवन्तु
सच्छास्त्रतत्त्वपरिशीलननिर्विशङ्काः॥

इति प्रार्थनया सह विरम्यते।

भाट्टमते प्रत्यक्षप्रमाणस्वरूपम्

डॉ. रामानुज उपाध्यायः

"मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्" इति सिद्धान्तमनुसृत्य स्वमनीषयाऽत्र समासशैल्या भाट्टाभिमतं प्रत्यक्षप्रमाणमुपस्थाप्यते।

तत्र प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणम्। प्रमा च अज्ञाततत्त्वार्थज्ञानकरणमिति। करणं च व्यापारवदसाधारणकारणम्।

अत्र कैश्चिदुच्यते यद् अज्ञाततत्त्वार्थज्ञानं यदि प्रमा स्यात् तदा 'घटोऽयम्" इति धारावाहिकज्ञानेषु द्वितीयादीनाम् अप्रमात्त्वं स्यात् तेषां ज्ञानार्थविषयकत्वात्। तेनात्र अयम् "अयम्" इति "उत्तरोत्तरेषां" कालांशानामज्ञातानामवगमात् उत्तरे क्षणे घटादिसद्भावस्य च पूर्वज्ञानेन अनधिगतत्वात् नाव्याप्तिदोषः। तत्त्वपदनिवेशेन भ्रमसंशयादीनामयथार्थज्ञानानां निरासो वेदितव्यः। तथा च अज्ञाततत्त्वावगमरूपायाः प्रमायाः करणत्वेन इन्द्रियसन्निकर्षादीनां प्रमाणत्वं सिद्धम्। तानि च प्रमाणानि भाट्टमते षड् सन्ति। तथा चोक्तम्–

प्रत्यक्षमनुमानं च शब्दश्चोपमितिस्तथा।
अर्थापत्तिरभावश्च षट्प्रमाणानि मादृशाम्॥

तत्र प्रत्यक्षप्रमाणस्य लक्षणमित्थमिह वर्णितम् "इन्द्रयसन्निकर्षजं प्रमाणं प्रत्यक्षं कानि पुनरिन्द्रियाणि? तत्रोच्यते चक्षूरसनघ्राणस्पर्शश्रोत्राणि मनश्चेति षडिन्द्रियाणि। एवमिह एभिरिन्द्रियैः तत्तत् विषयसन्निकर्षेण तत्तत्प्रत्यक्षात्मकज्ञानं समुत्पद्यते तत्तदिन्द्रियजन्यत्वात् षड्विधं वेदितव्यम्। चाक्षुष–रासन–घ्राणज–स्पार्शन–श्रौत्र–मानसश्चेति। इदानीमिन्द्रियेण सह अर्थस्य सन्निकर्षः व्यापाररूपो वेदितव्यः। स चात्र द्विविधः–संयोग संयुक्ततादात्म्यञ्चेति। तत्र पृथिव्यप्तेजसां चक्षुस्त्वगिन्द्रियाभ्यां संयोगाद्ग्रहणं (ज्ञानं) जायते।

वायोः त्वक्संयोगात् ग्रहो भवति। दिङ्नभस्तमसां दृक् संयोगात् ज्ञानं भवति। शब्दस्य श्रोत्रसंयोगात् ज्ञानं जायते आत्मनश्च मनसः संयोगाद् ग्रहो भवति। कालस्य तु सर्वैरपि इन्द्रियैः संयोगाद् ज्ञानं भवति।

यदा तु चक्षुरादिसंयुक्तेषु पूर्वोक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं जायते तदा संयुक्ततादात्म्यसंन्निकर्षो बोध्यः। तथा चोक्तं

रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः।
प्रतीतिकारणं तस्मान्न सम्बन्धान्तरस्पृहा॥

यदा तु जातिगुणकर्मगतानां सत्तारूपत्वं कर्मत्वादीनां ग्रहणं तदा तेषामेव परम्परया तादात्म्यं विज्ञेयम्।

अतः एतेषां ग्रहे (ज्ञाने) संयुक्ततादात्म्यमेव सन्निकर्षो ग्राह्यः।

तदित्थम् उपर्युक्तद्विविधसन्निकर्षेण चक्षुरादि इन्द्रियमाध्यमेन तत्तदर्थे विषयिणी प्रमा जायते। एवमिह संक्षेपेण भाट्टमते प्रत्यक्षप्रमाणस्वरूपं विवेचितमिति।

मीमांसाश्लोकवार्त्तिके प्रत्यक्षप्रमाणस्य स्वरूपम्

डॉ. गोपालप्रसादशर्मा

नेत्रश्रोत्रादीन्द्रियैः प्रत्यक्षज्ञानस्योत्पत्तिः भवति। इन्द्रियाणां घटपटाद्यर्थैः सह वर्तमाना तथा च दोषरहितव्यापारादिप्रयोगेण उत्पन्ना पुरुषस्य बुद्धिः प्रत्यक्षत्वेन लोकेऽभिधीयते। इदं प्रत्यक्षं वर्तमानस्य वस्तुनः प्रकाशकं भवति। यथा घटस्य चक्षुरिन्द्रियेण सह विद्यमानं तथा च दोषरहितेन प्रयोगेण उत्पन्नं ज्ञानं प्रत्यक्षप्रमाणत्वेन भवति।

इदं प्रत्यक्षं वर्तमानवस्तुनः प्रकाशकत्वाद् आगामिनिकाले सम्पत्स्यमानेषु धर्माधर्मेषु प्रमाणत्वेन न भवितुं शक्यते। अत एव औत्पत्तिकसूत्रे प्रयुक्तः सच्छब्दः सार्थको भवति। सच्छब्दो वर्तमानस्य बोधकः, अपि च सम्प्रयोगशब्दस्य अभिन्नत्वेन विशेषणभूतो येन वर्तमानेन्द्रियसम्प्रयोगरूपोऽर्थः प्रकटीभवति।

ननु यदि इन्द्रियाणि प्रमाणानि सन्ति तर्हि नेत्रे आच्छादिते सति इन्द्रिये विद्यमानेऽपि ज्ञानरूपं फलं कथं न भवति? अत्रोच्यते व्यापारस्याधारेणैव कुत्रापि प्रमाणत्वं भवति। अयं व्यापारोऽस्ति न वा? अस्य निश्चयः फलेन भवति। नेत्रे आच्छादिते सति ज्ञानरूपं फलं न भवति। अनेन च निश्चीयते यदत्र व्यापारो नास्ति। अतो नेत्रे आच्छादिते सति ज्ञानरूपं फलं न भविष्यति, व्यापाराभावात्।

ननु तैजसचक्षुरिन्द्रियस्य सम्बन्धः सर्वैः विषयैः सह अस्ति। अतश्चक्षुषा रसादीनां ग्रहणं कथं न भवति? अत्रोच्यते यदि केवलेन प्राप्तिमात्रेण सम्बन्धो भवेत् तर्हि त्वगिन्द्रियेण रूपस्य ग्रहणं भवितव्यं परं च त्वगिन्द्रियेण रूपस्य ग्रहणं न भवति। अतो योग्यताविशिष्टप्राप्तिः सम्बन्धः। इयं योग्यता कार्यदर्शनेनानुमेया। चक्षुरादीनां रसैः सह

योग्यताविशिष्टसम्बन्धो नास्ति। अतश्चक्षुषा रसैः सह सम्बन्धे सत्यपि ज्ञानस्य प्राप्तिर्न भविष्यति। यथा प्रमाणसिद्धौ योग्यतासहितप्राप्तिरपेक्षिता तथैव फलसिद्धावपि योग्यतासहितप्राप्तिः अपेक्षिता भवति।

प्रत्यक्षादीनां धर्मे प्रमाणत्वम्

यदा चक्षुरादीन्द्रियैः शाब्दबोधो जायेत तर्हि श्रोत्रेन्द्रियस्य आवश्यकता कुतः? अतश्चक्षुरादीन्द्रियैः अज्ञातशब्दज्ञानार्थमेव श्रोत्रस्य मान्यता भवति। एवं प्रकारेण प्रत्यक्षादिभिः प्रमाणैः अज्ञातानां धर्मब्रह्मादीनां ज्ञानार्थं प्रत्यक्षानुमानप्रमाणाभ्यां भिन्नस्य शब्दप्रमाणस्यावश्यकता भवति। यदि तेषां धर्मादीनां ज्ञानं केनचिदन्यप्रमाणेन जायते तर्हि शब्दप्रमाणं व्यर्थमेव। अतः प्रत्यक्षादीनां धर्मे प्रामाण्यं नास्ति।

लौकिकवाक्यस्य विषयाणां गवाद्यर्थेषु चाक्षुषप्रत्यक्षादिप्रमाणैः सन्निकर्षः सम्भवति। चक्षुरादिप्रमाणैः गवाद्यर्थान् सम्प्राप्यावबुद्ध्यैव पुरुषस्तदर्थबोधकशब्दान् प्रयुङ्क्ते। अतो लौकिकवाक्यप्रयोगो नियमेनान्यप्रमाणैर्ज्ञातानर्थानवबोधयितुं भवति। अतो लौकिकशब्दैः अन्यप्रमाणैर्ज्ञाततदर्थेन पुरुषेणोच्चारणीयैर्भवितव्यमिति नियमः। वैदिक-वाक्येष्वेवं नास्ति। यतो हि वैदिकवाक्येषु येषां ज्योतिष्टोमस्वर्गप्रभृतीनामर्थाः प्रतिपादितास्तेषामर्थानां प्रत्यक्षादिप्रमाणैः ज्ञानं न सम्भवति। प्रयोगविषयीभूतशब्दस्यार्थेन प्रमाणान्तरैः ज्ञातव्यतया भाव्यमेवेत्ययं लौकिकवाक्यानां न्यायो वैदिकवाक्येषु न प्रभवति। तस्माल्लौकिकवाक्यवद् वैदिकवाक्येषु पौरुषेयत्वं न भवति। पौरुषेयत्वं नाम प्रमाणान्तरेणार्थमुपलभ्य निर्मितत्वम्। बुद्धाः परमेश्वरस्यैवावतारा इति सर्वैर्मन्यते। परं च वेदविरोधादास्तिकेषु तेषां सम्मानाभावो वर्तते। बहुधा पुरुषाणां प्रसन्नतैव ग्रन्थानां प्रामाण्ये मूलं जायते। अतः प्रामाण्यपरीक्षणार्थं वेदेषु पुरुषस्वातन्त्र्यस्य वारणं बहुप्रयत्नपूर्वकं क्रियते। मीमांसाश्लोकवार्त्तिकस्य शब्दनित्यत्वा-धिकरणस्य नवत्युत्तरद्विशततमे श्लोक उक्तं "यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रते'' ति। परमेश्वरोऽपि वेदानां निर्माणे स्वतन्त्रो नास्तीति वेदान्तिनः। तस्मान्मीमांसकैः प्रत्यक्षादीनां धर्मे प्रामाण्यं न स्वीकृतम्।

मीमांसाशास्त्रदिशा प्रत्यक्षप्रमाणम्

डॉ. देवेन्द्रप्रसादमिश्रः

पूजार्थकमान्धातोः सन्प्रत्ययेऽभ्यासादिकार्ये कृते तदन्तात् स्त्रियां टाप्, मीमांसाशब्दस्य निष्पत्तिर्भवति। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। इन्द्रियाणि नेत्ररसनश्रोत्रघ्राणस्पर्शनमनांसि षड्विधानि। प्राचीनैतेषां स्थानानि परिगणितानि–

चक्षुर्नाम कनीनिकान्तरगतं तेजोऽथजिह्वाग्रगः
तोयांशो रसनं क्षितेरवयवः घ्राणश्च घोणोदरे।
सर्वाङ्गप्रसृताश्च मारुतलवाः त्वङ्नामकर्णोदर–
व्योमैव श्रवणं मनस्तु विभु तद्देहे च कार्यावहम्।। इति।

लोके च कार्यसामान्यस्य केनचित्कारणेन जन्यत्वस्य दृष्टत्वात् रूपज्ञानस्यापि कार्यस्य केनचित्करणेन भवितव्यमिति सामान्यतस्सिद्धौ प्रपञ्चे दीपादितेजः एव रूपज्ञानं प्रति कारणं इति दर्शनेन रूपज्ञानकारणं चक्षुरपि तैजसमिति सिद्ध्यति। एवं रसनमपि जलस्यैव। शुष्कवस्तुषु रसव्यञ्ज कत्वदर्शनात् तत् जलीयमिति बोध्यम्। तथा घ्राणमपि गन्धग्राहकं, पार्थिवतदनुलेपनस्य चन्दनगन्धाभिव्यञ्जकत्वदर्शनात् पार्थिवमिति विभावनीयम्। व्यजनपवनस्याङ्गसलिलगतशैत्यस्पर्शाभिव्यञ्जकत्वदर्शनात् स्पर्शोपलम्भकस्य त्वगिन्द्रियस्य वायवीयत्वम्। एवं च परिशेषात् शब्दग्राहकस्य श्रोत्रस्य आकाशात्मकत्वं सिद्ध्यति। न च पृथिव्यादिभूतचतुष्टयान्यतमात्मकत्वमेव श्रोत्रेन्द्रियस्य किं न स्यात् इति वाच्यम्। श्रोत्रमन्येन्द्रियारम्भकेण आरब्धं न भवति इन्द्रियत्वात् इत्यनुमानेन तद्बाधात्। मा भूत्तर्हिभूतात्मकत्वमेव श्रोत्रेन्द्रियस्य इति चेन्न श्रोत्रं भूतात्मकमेव बहिरिन्द्रियत्वात् चक्षुरादिवत् इत्यनुमानस्यैव तत्र प्रमाणत्वात्। तार्किकाश्च शब्दस्य आकाशगुणत्वात् तद् ग्राहकस्य श्रोत्रास्यापि आकाशत्वमिति वर्णयन्ति। मीमांसकमते शब्दः द्रव्यमेव। मनस्तु

सुखदुःखाद्यपरोक्षज्ञानकारणत्वेन परिकल्प्यमानं विभु इति च सिद्धान्तः।

इन्द्रियैः ज्ञानात्मके कार्ये जननीये व्यापारभूतसन्निकर्षस्तु द्विविधः संयोगः, संयुक्ततादात्म्यञ्चेति। अत्र पृथिव्यप्तेजसां नेत्रत्वगिन्द्रियाभ्यां संयोगेन ग्रहणम्। वायोः त्वक्संयोगात् दिङ्नभस्तमसां चक्षुःसंयोगात्। शब्दरूपद्रव्यस्य तु श्रोत्रसंयोगात्, आत्मनः मनस्संयोगात्, कालस्य तु सर्वैरपि इन्द्रियैः संयोगात्। चक्षुरादिसंयुक्तपृथिव्यादिगतानां जातिगुणकर्मणां ग्रहणं संयुक्ततादात्म्यात्। उक्तञ्चाकरे रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः प्रतीतिकारणम्। तस्मान्न सम्बन्धान्तरस्पृहा इति। न च द्रव्यगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणाय अन्येऽपि सन्निकर्षाः स्वीकार्या एवेति वाच्यम्। तेषामपि साक्षात् तादात्म्यभावेऽपि परम्परया तादात्म्यसम्भवेन संयुक्ततादात्म्येनैव निर्वाहात्। अथ परम्परया निर्वाहे एकेनैव सन्निकर्षेणालमिति चेत्, अस्तु रूपत्वकर्मत्वदीनां ग्रहणाय परेषां संयुक्तसमवेतसमवायवत् अस्माकमपि संयुक्ततादात्म्यतादात्म्यं नाम तृतीयः सन्निकर्षः अतश्चः द्वेधा त्रेधा वा सन्निकर्षाः।

कर्मकाण्डस्य प्रत्यक्षप्रामाण्यमीमांसा

डॉ. रामराजउपाध्यायः

कर्मणः काण्डं कर्मकाण्डमित्यस्त्येका सुप्रसिद्धा प्रक्रिया। भारतीयसंस्कृतौ कर्मकाण्डीयोपक्रमोऽतीव वैज्ञानिकोऽस्ति। किञ्च वैमतिकाः जनाः विवदन्ते। कर्मकाण्डस्य प्रत्यक्षप्रमाणमीमांसायाः स्वरूपप्रतिपादने किञ्चित् प्रयासो मया क्रियते।

[1]**वेदोऽखिलो धर्ममूलम्** इत्यनुसारेण धर्मस्य वेदमूलकता ख्यापितास्ति। धर्मकृत्यस्य व्यवहारः कर्मकाण्डे पूर्णतया दरीदृश्यते।[2] **मन्त्रब्राह्मणयोर्वेदनामधेयमिति** रीत्या संहिताब्राह्मणयोर्वेदसंज्ञा वर्तते। यज्ञेषु प्रयुक्तानां मन्त्राणां प्रयोगः संहितायां प्राप्यते। कर्मकाण्डे प्रयुक्तवेदमन्त्राणां स्वतः प्रामाण्यं वक्तुं शक्यते।[3] **श्रुतिस्तु वेदो विज्ञेयो** इत्यनुसारेण वेदस्यापरं नाम श्रुतिरस्ति। श्रुत्यां यत्किमप्युक्तं तत्प्रामाण्यं स्वीक्रियते। मीमांसकमनीषिभिरपि श्रुतेरपौरुषेयत्वं निर्णीय तस्यानेकप्रभेदभिन्नत्वं चोक्तम्। मूलतो मन्त्रब्राह्मणात्मकत्वेन द्विधा-सन्नपि स वेदो वाक्यविचारपरम्परायां मीमांसकैः विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पंचविध उक्तः। विषयविभाजने वेदस्तावत्काण्डद्वयात्मक इति पूर्वोत्तरकाण्डभेदात् मीमांसाग्रन्थेषूक्तमस्ति।

वीरमित्रोदयस्य परिभाषाप्रकाशे श्रुतेः षड्विभागाः विद्यन्ते। विधि-निषेधार्थवादमन्त्रनामधेयोपनिषद्भेदात्। तत्र विधेस्तावत्तत्द्विषयप्रवर्तनाव-बोधकत्वेन धर्मस्य प्रामाण्यमस्ति। यथा "वायव्यं श्वेतमालभेत भूतिकामः[4]"

---

1. मनुस्मृतिः 2.6
2. आप. श्रौ. 24.1.31 बौ गृ. 2.62 कौ. सू. 1.3
3. मनु 2.10
4. तै. सं 2.1.1

इत्यादेर्द्रव्यदेवतासंयोगानुमितवायुदैवत्ययागप्रवर्त्तनावबोधकत्वेन। विधिर्विधेयस्त-र्कश्च वेदः[5] इत्यत्र विधिर्नाम ब्राह्मणं, विधेयो नाम मन्त्रः, तर्को नामार्थवादः स्पष्टमस्ति।

विधिः

[6]**अज्ञातार्थज्ञापको वेदभागो विधिः** इत्यनुसारेण **दर्शपूर्णमासाभ्यां यजेत अग्निहोत्रं जुहुयादित्यादिविधायकं** ब्राह्मणवाक्यम्। विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्मांगत्वेनेति विधेयो मन्त्रः इषेत्वादिः। तर्कशब्देनार्थवादो ज्ञायते। तर्क्यते ह्यनेन सन्दिग्धोऽर्थः। यथा अक्ताः शर्करा उपदधाति तेजो वै घृतमिति घृतसंस्तत्वात् तर्क्यते घृताक्ता इति। तर्कः कल्पसूत्रमिति भर्तृयज्ञः। तर्को मीमांसेति कल्पतरुः। तत्र कस्यापि कर्मकाण्डस्य विधिर्वर्णनं ब्राह्मणग्रन्थेषु प्रतिपादितमस्ति। विधिहीन[7] कर्मकाण्डं स्वकीयोद्देश्यस्य प्राप्तिं कर्तुं न समर्थोऽस्ति यतो हि तस्मिन् फलाभावत्वं विद्यते। विधिसंयुक्तं कृत्यमेव पुण्यजनकत्वयुक्तमस्ति। तर्हि वैदिककर्मकाण्डे वेदविहितत्त्वं तत्र विधिसंयुक्तत्वं विद्यते। विधिपूर्वकं कृत्यं स्वयमेव प्रामाण्यसम्पृक्तमस्ति। यथा कस्यापि कर्मकाण्डे तस्य कृत्यं यद् वर्णितमस्ति तद्विधिरस्ति। तेनैव प्रकारेण तस्य सम्पादनं क्रियते। वेदशब्दव्यतिरिक्तैः प्रत्यक्षानुमानोप-मानादिप्रमाणैरपरिज्ञातमर्थं यो वेदयति स विधिः। सामान्यरूपेण विधिः चतुर्धा विभज्यते। उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः प्रयोगविधिश्च।

उत्पत्तिविधिः–

कर्मस्वरुपमात्रावबोधको विधिरुत्पत्तिविधिः। कर्मकाण्डे द्रव्यदेवता संबन्धमज्ञापितं तयोः ज्ञापनमुत्पत्तिरस्ति। मीमांसायां प्राप्यते येन वाक्येन इदं कर्म कर्त्तव्यमिति बोध्यते तत्कर्मोत्पत्तियुक्तं वाक्यमित्युक्तम्। सर्वाणि कर्मविधायकवाक्यानि उत्पत्तिविधेरुदाहरणानि सन्ति। यथा–अग्निहोत्रं जुहुयात् स्वर्गकामः।[7]

---

5. पारस्करगृह्यसूत्रम् 2.6.5
6. अर्थसंग्रहे विधिप्रकरणम्
7. विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्। श्रद्धाविरहितं यज्ञं तामसं परिचक्षते। श्रीमद्भगवद्गीतायां 17.13

विनियोगविधिः

अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधिर्भवति। यथा दध्ना होमं भावयेदिति। विशिष्टरूपेण नियोगः विनियोगः। उक्तोदाहरणे दध्ना एव होमः करणीय इतिविधिर्विद्यते। मन्त्राणां प्रयोगावसरे कर्मकाण्डे विनियोगः प्राप्यते। तत्र हस्ते जलमादाय अस्य मन्त्रस्य अमुक ऋषिः, अमुकछन्दः, अमुकदेवता, अस्मिन् कर्मणि पाठे जपे हवने विनियोगः। अर्थाद् यत्र विनियोगस्य सम्यक् विधिविधानं प्राप्यते तत्र विनियोगविधिर्भवति। अस्माकं तु मतं विद्यते यस्य मन्त्रस्य विनियोगः यस्मिन् कर्मणि भवति तस्मिन् तत् साधकत्वमागच्छति।

अधिकारविधिः

कर्मफलसंबन्धबोधको विधिरधिकारविधिः। अर्थादत्र कर्तृविशेष-विधिरिति देवनाथठक्कुरः वदति। फलस्वाम्यावबोधकोविधि-रधिकारविधिरस्ति। कस्यापि कर्मणोपक्रमः फलोत्पादकं भवति। तस्य भोक्तृत्वं कर्तृत्वे व्याप्तमस्ति। कर्तैव फलभोक्तुकामा वर्तते। व्याजेनानेन कार्यस्य सम्पादनं करोति। कर्मणोत्पादितं फलं सुखकरं स्यादिति विचिन्त्य कर्त्ता कर्मण्यभिप्रवृत्तो भवति। एतावता सैवाधिकारी। यस्मिन् विधौ अधिकारनिरूपणं क्रियते तत्राधिकारविधिः प्रतिपाद्यते।

प्रयोगविधिः–

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। प्रयोगविधेः स्वरूपं कर्मकाण्डे दृश्यते। प्रधानविधेरितिकर्त्तव्यतायां यावत्क्रियाजातांगत्वेन तत्र संबद्धं तावत्क्रियाबोधकैः तैस्तैरंगविधिभिस्सह प्रधानविधेरेकवाक्यतया सर्वेषां वाक्यानां मिलित्वा यो महावाक्यार्थस्तादृशमहावाक्यार्थावगतो यो विधिः स प्रयोगविधिरित्यर्थः। यथा श्राद्धकाण्डे[8] उपदेशातिदेशसंकलतया सम्पन्नः पिण्डदानप्रयोग उच्यते। तत्र श्राद्धादिप्रयोगे पितृतीर्थेन पिण्डदानं जलदानञ्च कर्त्तव्यम्। तत्र पवित्रस्य प्रयोगः कथं क्रियते? मोटकादिनिर्माणं कृत्वा यथाविहितं प्रयोगं कर्त्तव्यमित्येतत्सर्वं प्रयोगविधौ दृश्यते। कर्मकाण्डः

8. स्मृतिचन्द्रिकायां श्राद्धकाण्डे पृ. 379

सर्वदा विधिसंयुक्तं भवत्येतावता अत्र कर्मकाण्डस्य प्रामाण्यं प्रसिद्ध्यति।

निषेधः

निषेधस्य तु निवर्तनावबोधजनकत्वेन, यथा कलञ्जं न भक्षयेदित्यादिः। कर्मकाण्डे सर्वत्रैवं प्राप्यते इदं न कर्त्तव्यम्। अत्र निषेधोऽवगम्यते। फलजनकतावबाधकत्वं निषेधत्वमस्ति। कर्मकाण्डस्य मुख्योद्देश्यमस्ति संकल्पितस्य कार्यस्य संसिद्धिः। संकल्पितं कार्यं तत्र भवितुं शक्यते यत्र यथाविधिः कर्मकाण्डः सम्यक् प्रतिपाद्यते। तत्र निषिद्धस्य निषेधः करणीयः सामान्यत इष्टप्राप्तिप्रतिबन्धकतया अनिष्टोत्पादकतया च यन्न ज्ञायते। यच्च शास्त्रैकमात्रं संवेद्यं निषेधविधिना पर्यवसीयते तन्निषिद्धं कर्म। आर्षेषु स्मार्तेषु च निबन्धेषु निषिद्धक्रियाणां बाहुल्यं वर्तते। तत्र केचन आश्रममूलकाः निषेधाः–

[9]मधुमांसाञ्जनोच्छिष्टशूक्तस्त्रीप्राणिहिंसनम्।
भाष्करालोकनाश्लीलपरीवादांश्च वर्जयेत्॥

कर्माङ्गनिषेधविधयोपि भवन्ति। जाबालिः–

[10]ताम्बूलं दन्तकाष्ठं च स्नेहस्नानमभोजनम्।
रत्योषधपरान्नानि श्राद्धकर्त्ता विवर्जयेत्॥

सर्ववर्णाश्रमसाधारण्येन सामान्यनिषेधविधयोऽपि बहवः। यथा–

[11]नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्मधीः।
ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत्॥
संमानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा॥

भारतीयवैदिककर्मकाण्डे नित्य–नैमित्तिक–काम्य–निषिद्धरूपाणां कर्म विभागानां वर्णनं सुव्यस्थितं यथा दृश्यते तथा अन्यत्र न।

9. आ. स्मृ. 1.33. पृ. 94
10. नि. सि. 328 पृ.
11. मनु. स्मृ. 2.161-162

अर्थवादः-

प्राशस्त्यनिन्दान्यतरलक्षणविधिशेषभूतं वाक्यमर्थवादः। अर्थवादो द्विविधः प्रशंसार्थवादो निन्दार्थवादश्च। यस्मिन्नर्थवादे प्रशंसा श्रूयते तस्मिन् प्रशंसार्थवादः। अस्मिन् विधावापेक्षितप्राशस्त्यं समर्प्यते। यथा वायुर्वै क्षेपिष्ठा देवता[12] इत्यादि वायव्ययागादिप्रशंसार्थतया। द्वितीयः निन्दार्थवादः। यस्मिन् अर्थवादे निन्दा श्रूयते तत्र निन्दार्थवादः। निषेधापेक्षितनिन्दा समर्प्यते यत्र तत्र निन्दार्थवादः। यथा यदश्रु अशीर्यत् तद्रजतमभवदित्यादिस्तस्माद्बर्हिषि रजतं न देयम्।[13] इत्यादिनिषिद्धरजतदाननिन्दार्थतया।

मन्त्रः

मननात् त्रायते इति मन्त्रः। कर्मकाण्डे मन्त्रैः सर्वाणि कार्याणि सम्पाद्यन्ते। देवानामाह्वाता होता इति रीत्या होता नाम्नः ऋत्विक् देवानामावाहनं करोति। स कथं देवानामावाहनं करोति। मन्त्रानुच्चारणपुरस्सरं देवानामावाहनं करोति। देवानामावाहनं कुत्र स्यादित्यावाहनमन्त्राणां प्रयोगात् पूर्वं विचार्यते। तत्र प्रथमं स्थाननिर्धारणं क्रियते। वेदिस्थण्डिलोपरि देवस्थानं निर्माय देवानामावाहनं क्रियते। भद्रमण्डलादिकं निमार्णमेतदर्थं क्रियते। तस्मिन् मण्डलेऽपि देवानां स्थानं निर्धारितं भवति। आवाहनानन्तरमर्चनं क्रियते। कस्य पदार्थस्य समर्पणं केन मन्त्रेण क्रियते इति विज्ञाय मन्त्रोच्चारणपूर्वकं समर्प्यते। उद्गाता सामवेदस्य मन्त्राणामुच्चारणपूर्वकं देवान् प्रसीदयति। प्रसन्नो भूत्वा वरं प्राप्यते। तत्र विधीनां सम्पादने यत्र कुत्रापि त्रुटिर्भवति तत्र त्रुटीनां परिमार्जनाय ब्रह्मानाम्नः ऋत्विक् मन्त्राणां जपं करोति। तेनानुष्ठानं त्रुटिरहितं भूत्वा सिद्धिदायकं भवति। प्रकारेणानेन मन्त्राणां प्रयोगो भवति।

कर्मकाण्डस्य बहूनि विधानानि भवन्ति। यस्मिन् प्रत्यक्षप्रमाण मीमांसायाः दिग्दर्शनं भवति। परञ्चात्र पञ्चविधानानि ख्यातानि सन्ति– **श्रौतकर्मकाण्डम्, स्मार्त्तकर्मकाण्डम्, पौराणिककर्मकाण्डम्, तान्त्रिककर्मकाण्डम्, मिश्रकर्मकाण्डञ्च।**

---

12. तै. सं. 2.1.1
13. तै. सं 1.5.1.12

श्रौतकर्मकाण्डम्

श्रुतौ यस्य कर्मकाण्डस्य विवरणं प्राप्यते तत् श्रौतकर्मकाण्डमस्ति। यथा लिखितमस्ति श्रौतं नाम कर्मकाण्डम्, छन्दसां गायत्री, वेदेषु साम, सामसु बृहत्साम, सतीषु सीता, महाभारते गीता, मुनीनां व्यासः, वृष्णीनां वासुदेवः परमं प्राधान्यमावहति। सर्वेषां कर्मकाण्डानां मूलं श्रौतमस्ति। साक्षाच्छ्रुतिप्रतिपादितत्वात् सर्वकर्मकाण्डेषु मूर्धन्यमस्ति श्रौतकर्मकाण्डम्। अत्र दर्शपूर्णमासयागादिकर्मकाण्डम्, औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, श्रवणाकर्म, शूलगवः, अग्निहोत्रम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणियागादि कर्मकाण्डस्य स्वतः प्रामाण्यमस्ति श्रुतिः प्रामाण्यत्वात्।

स्मार्त्तकर्मकाण्डम्–चतुर्दशविद्यास्थानान्युक्तानि

[14]पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशः॥

उपर्युक्तसन्दर्भेषु **श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु स्मृतिरिति** धिया धर्मशास्त्रे यत्किमपि कर्मकाण्डं प्रतिपादितमस्ति तत्सर्वं स्मार्त्तकर्मकाण्डमस्ति। अस्य कर्मकाण्डस्य प्रामाण्यं स्मृतिग्रन्थास्सन्ति। यतो हि उच्यते–

वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम्।
एतत्त्रयं यत्र भवेत् प्रमाणं तद्वाक्ययुक्तं कुरु तत् प्रमाणम्।

तर्हि स्मृतिग्रन्थेषु यत्प्रतिपादितं तत्सर्वं प्रमाणरूपेण स्वीक्रियते। प्रमुखस्मृतिकाराणां नामान्येतादृशानि सन्ति–

[15]मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽगिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पतिः॥

पराशरव्यासशंखलिखितादक्षगौतमो।
शातापो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः॥

14. याज्ञवल्यक्यस्मृतौ 1.3
15. याज्ञवल्क्यस्मृतिः 1.4-5

एतैः स्मृतिकारैः स्वकीये स्मृतिग्रन्थे यत्कर्मकाण्डं प्रतिपादितं तत् स्मार्त्तकर्मकाण्डमस्ति। स्मृतिशब्देन हि निबन्धेषु प्रतिपादितानां स्मृतिग्रन्थानां पद्यात्मकानि गद्यात्मकानि वचांसि गृह्यसूत्रधर्मसूत्रादिग्रन्था अन्तर्भूताः भवन्ति। स्मार्त्तकर्मकाण्डे, संस्काराः, आचाराः, दानम्, श्राद्धम्, शान्तिः, व्रतम्, प्रतिष्ठा, उत्सर्गादिविषयाः वर्णितास्सन्ति। मानजीवनस्य सम्यक्तया कुशलतासम्पादनाय संस्काराणां सम्पादनमतीवावश्यकमस्ति। तत्राचारादीनामनुपालनमप्यावश्यकमस्ति। अन्यत्सर्वं सुप्रसिद्धमस्ति।

पौराणिकं कर्मकाण्डम्

येषां कर्मणां पुराणग्रन्थेषु विधेरुल्लेखः तानि कर्माणि पौराणिकानि कथ्यन्ते। पौराणिके कर्मणि देवतानां प्रतिमासु आवाहनपूर्वकं पूजनादि भवति। अत्र विविधोपचारैः देवाः प्रपूज्यन्ते। पञ्चोपचाराः, दशोपचाराः षोडशोपचाराः, त्रिंशदुपचाराः, षष्ट्युपचाराः, राजोपचाराः, शतोपचाराः इत्यादय उपचाराः भवन्ति। कर्मकाण्डेऽस्मिन् यथासामर्थ्यं स्यात् तदनुसारेण भावपूर्वकं उपचारैः पूजनं कर्त्तव्यम्।

तान्त्रिकं कर्मकाण्डम्

[16]सर्वेऽर्था येन तन्यन्ते त्रायन्ते च भयाज्जनाः।
इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः सम्प्रचक्षते॥

तन्त्रतया प्रसिद्धो यो ग्रन्थराशिः वर्तते तस्मिन् प्रोक्तानि यानि कर्माणि तानि तान्त्रिककर्माणि सन्ति। भट्टोजिदीक्षितलिखित-डामररुद्रयामलवचनानां स्वातन्त्र्ये प्रामाण्यभावेऽपि उदाहृतपुराणवचनोपबृंहिततया प्रमाणं सङ्गच्छते।[17] धर्मशास्त्रनिबन्धकृतां पुरुषार्थचिन्तामणिकारादीनां निर्णयात् तन्त्राणां तत्कर्मणां च सदाचारसमनुगृहीततया प्रामाण्यं वर्तते। तान्त्रिककर्मकाण्डे आचारादीनानुवर्णनम्, शिष्टाचाराः, सदाचाराश्च सम्पाद्यन्ते। लोकगर्हा देशिकाचारादयोऽप्यत्र विविच्यन्ते। तन्त्रभेदा इत्थं प्रतिपादिताः–

---

16. विष्णुसंहितायाम् 7 पृ.
17. पु. वि. पृ 80

[18]आचारस्त्रिविधः प्रोक्तः साधकानां मनीषिभिः।
दिव्यदक्षिणवामाश्चाधिकाराः सप्तकीर्तिताः।
सप्ताधिकारा विदुषः साधकस्य मता इमे।
दीक्षा ततो महादीक्षा पुरश्चरणमेव च।
ततो महापुरश्चर्याभिषेकस्तदनन्तरम्।
षष्ठो महाभिषेकश्च तद्भावोऽन्तिम ईरितः।
साधको येन लभते मोक्षं नास्तीह संशयः।
एषां सप्ताधिकाराणां नामानि विविधानि वै।

मिश्रं कर्मकाण्डम्

[19]**वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः** इति भगवता मखत्वेनाभिप्रेतस्य कर्मकाण्डस्य मिश्रभेदेन त्रैविध्यमाख्यातम्। यद्यपि सामान्यतया श्रौतस्मार्तपौराणिककर्मकाण्डं त्रिविधं विद्यते।

परञ्च श्रौतस्मार्तपौराणिकतान्त्रिककर्मसु यथायथमितरकर्मकाण्ड-विधानानामनुष्ठानं यदा भवति तदा मिश्रं तत्कर्मकाण्डमिति कथ्यते। वर्तमाने स्मार्तादिकर्मणां विवाहादिसंस्काराणां पौराणिकैः सहापि संमिश्रणं बहुधोपलक्ष्यते।

---

18. धर्मकल्पद्रुमे 2.316
19. श्रीमद्भागवतमहापुराणे 11.27.7

वात्स्यायनसम्मत-प्रत्यक्षप्रमाणविमर्शः

प्रो. पीयूषकान्तदीक्षितः

आन्वीक्षिकीति नाम्ना प्रथितं न्यायशास्त्रं सर्वविद्यानां प्रदीप-स्थानीयमिति विदितमेव विदुषाम्। विद्योद्देशप्रकरणे कौटिल्येनापि मुक्तकण्ठेन प्रोक्तम्—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता।। इति।

यथा प्रदीपः परितः स्थितं सम्बद्धं सर्वमेवार्थजातं प्रकाशयति तथैव न्यायशास्त्रम् अनुपदम् अन्वीक्षया प्रवर्तमानं यस्मिन् कस्मिन्नपि शास्त्रे स्थानमाविष्करोति चेत् तत्र विद्यमानं शास्त्रीयं तत्त्वं सरहस्यं प्रकाशयत्येव। या चान्वीक्षिकी विद्या सर्वविद्यानां प्रकाशिका सा आन्वीक्षिक्यां विद्यमानानां तत्त्वानां प्रकाशिका तावदाञ्जस्येन स्वतः भवत्येवेति नातिरोहितं सुधियाम्।

आन्वीक्षिक्यां महर्षिणा गौतमेन प्रमाणादीनि निग्रहस्थानान्तानि षोडशतत्त्वानि परमपुरुषार्थसाधकत्वेन स्वीकृतानि। ''**प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**'' इत्यस्मिन् प्रथमे सूत्रे परमकारुणिको मुनिः गौतमः प्रमाणस्य सर्वप्रथममुद्देशं कथं करोति? आत्मादिद्वादशप्रमेयाणां तत्त्वज्ञानस्यैव निःश्रेयसाधिगमप्रयोजकत्वादिति तु नैवाशङ्कनीयम्। प्रमाणस्य प्रमेयादिसकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् सूत्रे प्राथम्येनोद्देशस्य निराकुलत्वात्।

नव्यन्यायप्रवर्तकाः गङ्गेशोपाध्याया अपि चिन्तामणिनामके महानिबन्धे प्रामाण्यवादप्रकरणे **'अथ जगदेव दुःखपङ्कनिमग्न-**

मुद्दिधिर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते। इति ग्रन्थेन सर्वेषां प्रमेयादिपदार्थानां मोक्षोपयोगिनां व्यवस्थितिः प्रमाणायत्तैवेति निरूपयन्तः प्रमाणतत्त्वनिरूपणस्य प्राथम्ये औचित्यमेव प्रदर्शयन्ति।

'यद्यपि प्रमाणादयः पदार्थाः' इत्येवं विधेन वाक्येन, प्रथमसूत्रात्मकेन वाक्येन वा प्रमाणादीनां तत्त्वज्ञानं तु भवत्येव परं प्रमाणत्व-प्रमेयत्वादिसामान्यधर्मेण प्रमाणादीनां ज्ञानमेव तत्त्वज्ञानत्वेन नात्राभिमतं महर्षेः गौतमस्य, प्रत्युत प्रमाण-प्रमेयादितत्त्वानाम् उद्देश-लक्षण-परीक्षामुखेन यद्विशिष्य ज्ञानं तदेवात्र वस्तुतः तत्त्वज्ञानत्वेनाऽनुमतमिति विशेषतो विभावनीयम्।

न्यायदर्शने प्रथमसूत्रे प्रथमं समुद्दिष्टस्य प्रमाणतत्त्वस्य **'प्रत्यक्षानु-मानोपमानशब्दाः प्रमाणानि,** इत्येवं चतुर्धा विभजनं विधाय चतुर्धा विभक्तेषु प्रमाणेषु प्रथमोपात्तस्य प्रत्यक्षस्य लक्षणम् **'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'** इत्येवं न्यायसूत्रे गौतमः प्रस्तौति। यद्यपि प्रमायाः करणस्वरूपस्य प्रमाणस्य विभागानन्तरं प्रत्यक्षप्रमाणस्यैव लक्षणं समुपयुक्तमित्यापाततः प्रतिभाति परं लक्षणतः प्रत्यक्षप्रमाणप्रत्ययं विना प्रत्यक्षप्रमाकरणरूपस्य प्रत्यक्षप्रमालक्षणस्यापि परिज्ञानम् असम्भवीति प्रत्यक्षप्रमाया एव सर्वतः प्रथमं यल्लक्षणं निर्दिष्टं तत् सूपपद्यत इति विज्ञेयम्। लक्षणमहिम्ना ज्ञातायाञ्च प्रत्यक्षप्रमायां प्रत्यक्षप्रमाकरणत्वरूपं प्रत्यक्षप्रमाणलक्षणन्तु आञ्जस्येन विज्ञातं भवत्येवेति सर्वमवदातम्।

प्रत्यक्षलक्षणं व्याकुर्वन् मुनिः वात्स्यायनः **'इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं, तत् प्रत्यक्षम्'** इत्येवं स्वहृद्यं द्योतयति। अत्रायं प्रश्नः समवतरति यत् यथा प्रत्यक्षं जनयितुं इन्द्रियस्यार्थेन सन्निकर्षः आवश्यकः तथैव इन्द्रियार्थसन्निकर्षात् पूर्वं तावदात्मनः मनसा संयोगः मनसश्चेन्द्रियेण योगोऽपि नितरामावश्यकः। एवं सति प्रत्यक्षलक्षणे महर्षिणा गौतमेन कथन्नात्म-मनस्संयोगस्य मन इन्द्रियसंयोगस्य च समुल्लेखो प्रत्यक्षजनकत्वेन विहित इति। प्रश्नमिमं समादधता वात्स्यायनेन मुनिना

प्रोच्यते यत् प्रत्यक्षप्रमालक्षणसूत्रे 'एतावत् प्रत्यक्षे कारणम्' इति गौतमस्य नैव प्रतिपिपादयिषितं प्रत्युत प्रत्यक्षप्रमायाः यद्विशिष्टमनितरसाधारणं करणं तदेव विशेषतो विवक्षितमिति, सूत्रेऽस्मिन् प्रत्यक्षप्रमायाः विशिष्टं यत् कारणं तस्यैव निर्देशात्। एतावता आत्ममनस्संयोगस्य मन इन्द्रियसंयोगस्य च प्रत्यक्ष-प्रमाकारणत्वं तावत् कथमपि प्रतिषिद्धं न भवति।

यथा इन्द्रियस्यार्थेन सन्निकर्षात् केवलं प्रत्यक्षप्रमा जन्यते न तथा आत्मनः मनसा संयोगेन केवलं प्रत्यक्षप्रमोपजायते प्रत्युत अनुमितौ, उपमितौ शाब्दे चापि आत्मनः मनसा योगः कारणं भवतीति सर्वापरोक्षम्।

एवं सति मनसः इन्द्रियेण संयोगस्तु प्रत्यक्ष-प्रमाजनने एवोपयुज्यते, अस्य च मन इन्द्रिसंयोगस्य अनुमित्युपमितिशाब्दप्रमायामनुपयोगात् कथं न प्रत्यक्षलक्षणे समुल्लेखो विहित इति जिज्ञासाऽव्याहतैव तिष्ठति।

जिज्ञासायाः अस्याः समाधानं प्रस्तावयता वात्स्यायनेन मन इन्द्रियसंयोगस्य प्रत्यक्षप्रमाऽसाधारणकारणत्वं घ्राणज-रासन-चाक्षुष-त्वाच-श्रावणभेदेन विभिन्नेऽपि प्रत्यक्षे समानरूपेण कारणत्वान्निरस्तम्।

इन्द्रियस्य, अर्थेन गन्ध-रस-रूप-स्पर्श-शब्देन परस्परं भिन्नेन सन्निकर्षस्तु नितरां भिन्न एव फलतः इन्द्रियार्थसन्निकर्षरूपस्य प्रत्यक्ष-प्रमाकारणस्य घ्राणजादिप्रभेदभिन्नेष्वपि प्रत्यक्षेषु समानरूपेण कारणत्वं नास्तीति इन्दियार्थसन्निकर्षस्यैव प्रत्यक्षप्रमाविशिष्टकारणत्वेनासाधारणकारणत्वेन वा प्रत्यक्षसूत्रे समुल्लेखः समुचित इति सुनिश्चीयते।

एवम् **'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं'** प्रत्यक्षम् इति प्रत्यक्षप्रमालक्षणम् सूपपन्नं भवति। अत्र प्रत्यक्षप्रमालक्षणे यदि विशेष्यवाचकं ज्ञानपदं न दीयते चेत् **'इन्द्रियार्थसन्निकर्षोत्पन्नम्'** प्रत्यक्षमिति पर्यवसितं प्रत्यक्षलक्षणम् मनो स्वरूपस्य इन्द्रियस्य आत्मस्वरूपेण अर्थेन सन्निकर्षे सति उत्पन्ने सुख-दुःखादौ अतिव्याप्तं भवति। अस्याः अतिव्याप्तेः निवारणार्थं प्रत्यक्षप्रमालक्षणे ज्ञानपदसन्निवेशोऽनिवार्यः। निविष्टे च ज्ञानपदे, सुख-दुःखादौ **'मन आत्मसन्निकर्षोत्पन्नत्वस्य'** सत्त्वेऽपि ज्ञानत्वस्याभावादति-व्याप्तिः सुदूरपराहतेति ध्येयम्।

प्रत्यक्षलक्षणे ज्ञानपदसन्निवेशेन अनुपदमेवोपात्ता सुखदुःखादावतिव्याप्तिः भवतु तावन्निरस्ता परं प्रत्यक्षप्रमाभिन्नस्य सर्वस्यापि ज्ञानस्य अनुमित्युपमिति- शाब्दात्मकस्य, मनो रूपेन्द्रियस्य आत्मस्वरूपार्थेन सन्निकर्षे सत्येव जायमानत्वात् इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वरूपस्य प्रत्यक्षप्रमालक्षणस्य अनुमित्यादिज्ञानेऽतिव्याप्तिः वज्रलेपायमाना तिष्ठति, किञ्च प्रत्यक्षलक्षणमिदं नित्ये परमेश्वरप्रत्यक्षे अव्याप्तमपि भवति परमेश्वरप्रत्यक्षस्याजन्यत्वादिति तु नाशङ्कनीयम्, प्रत्यक्षप्रमालक्षणे ज्ञानपदेन साक्षात्करोमीत्यनुव्यवसायसिद्धसाक्षात्त्वजात्यवच्छिन्नस्यैवावबोधात्। एवञ्चानुमित्युपमितिशाब्दप्रमायां ईदृशसाक्षात्त्वजातेः अविद्यमानत्वाद् लक्षणसमन्वयाभावान्नातिव्याप्तिः। परमेवं परिष्कृतस्यापि प्रत्यक्षप्रमालक्षणस्याव्याप्तिस्तु परमेश्वरप्रत्यक्षे तदवस्थैव तिष्ठतीति ज्ञेयम्।

ईश्वरप्रत्यक्षे जातायाः अव्याप्तेः निवारणार्थं तु **'इन्द्रियार्थसन्निकर्षोत्पन्नमिति'** सावधारणमभ्युपेत्य इन्द्रियार्थसन्निकर्षातिरिक्तानुत्पन्नं ज्ञानं प्रत्यक्षम्' इत्येवं परिष्कृतं प्रत्यक्षप्रमालक्षणमभ्युपगन्तव्यम्। एवं प्रत्यक्षलक्षणपरिष्कारे सति ईश्वरप्रत्यक्षस्य केनाप्यनुत्पन्नत्वात् इन्द्रियार्थसन्निकर्षातिरिक्तानुत्पन्नत्वं ज्ञानत्वञ्च निराबाधमेवेति तत्र लक्षणसमन्वयान्नातिव्याप्तिः।

एवं परिष्कृतस्यास्य प्रत्यक्षप्रमालक्षणस्य अनुमित्युपमितिशाब्दप्रमायां समन्वयाभावात् अतिव्याप्तिरपि पूर्वदर्शिता निरस्ता भवति अनुमित्यादिप्रमायां इन्द्रियार्थसन्निकर्षातिरिक्तेन (मन आत्मसंयोगातिरिक्तेन) परामर्श-सादृश्यज्ञान-पदज्ञानेन समुत्पन्नत्वस्यैव सिद्धत्वेन **'इन्द्रियार्थसन्निकर्षातिरिक्तानुत्पन्न-ज्ञानत्व**रूपप्रत्यक्ष-प्रमालक्षणस्य समन्वयासम्भवादिति विशेषतोऽवधेयम्। वस्तुतः लक्षणस्यास्य एवं परिष्कृतस्य **'ज्ञानाकरणकं ज्ञानम्'** इति प्रसिद्धे प्रत्यक्षप्रमालक्षणे एव तात्पर्यमुन्नेयम्।

प्रत्यक्षलक्षणेऽस्मिन् **'अव्यपदेश्य'** पदं शाब्दे प्रत्यक्षलक्षणातिव्याप्तिनिवारणार्थमिति ध्येयम्। वात्स्यायनभाष्यानुसारं यावदर्थं वै नामधेयशब्दाः नामधेयशब्दैश्चार्थसम्प्रत्ययो आविद्वदङ्गनागोपालं जायते। अर्थात् जगतीतले यावन्तः अर्थाः पदार्थाः वा सन्ति तावन्तः नामधेया अपि प्रसिद्धाः सन्ति अथ च एभिः नामधेयात्मकैः शब्दैस्तावदर्थविज्ञानं सर्वेषां भवति। शब्देन च

अर्थविज्ञाने जाते संसारे व्यवहारोऽपि आञ्जस्येन सिद्ध्यति। वात्स्यायनदिशा इन्द्रियस्यार्थेन सन्निकर्षात् समुत्पन्नम् अर्थज्ञानं **'रूपमिति' 'रस'** इत्येवं वा विविच्यते। प्रसिद्धाः रूपरसशब्दाश्च अर्थस्य ज्ञानविषयस्य वा नामधेयम्। रूपशब्देन च **'रूपमिति जानीते'** इति ज्ञानस्य **'रस इति जानीते'** इत्याकारकज्ञानस्य च व्यपदेशो भवति। रूपरसादिशब्देन व्यपदिश्यमानस्य ज्ञानस्याकारः वात्स्यायनमुनिदिशा **'रूपमिति जानीते' 'रस इति जानीते'** इत्याद्याकारको स्वीक्रियते। अस्य विवरणं **'रूपमिति ज्ञानवान्' 'रस इति ज्ञानवान्'** इत्येवं सम्भवति। इदं ज्ञानं व्यपदिश्यमानं सत् शाब्दं प्रसज्यते इत्यस्ति वात्स्यायनस्य समुद्घोषः। यतः इदं शाब्दं इन्द्रियार्थसन्निकर्षोत्पन्नेन 'रूपमिति' 'रस इति' वा साक्षात्कारेण सम्बद्धमस्ति अतः इदमपि इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वेन सङ्ग्रहीतं भवतीति नामधेयव्यपदेश्येऽस्मिन् शाब्दज्ञानेऽतिव्याप्तिः प्रत्यक्षलक्षणस्य सुस्फीतैव, अस्याः वारणं लक्षणे अव्यपदेश्यपदप्रवेशे सारल्येन भवतीति सर्वापरोक्षम्। वात्स्यायनमहर्षिः अथापि इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यमाने ज्ञाने ज्ञानविषयनामधेयैः व्यपदिश्यमाने शाब्दे ज्ञाने विभेदं विवेचयत् निर्दिशति यत् **'अनुपयुक्ते शब्दार्थसम्बन्धे यदिदमर्थज्ञानं 'रूपमिति' 'रस इति' स्वरूपकं तत् नामधेयशब्देन नैव व्यपदिश्यते, स्यान्नाम शब्दार्थयोः मध्ये विद्यमानः वृत्तिस्वरूपः सम्बन्धः कस्यचिद्विज्ञातः अविज्ञातो वा। यदा चोपयुक्ते शब्दार्थसम्बन्धे अस्यार्थस्य अयं शब्दो नामधेयम्'** इति ज्ञानपुरस्सरम् अर्थः रूपाद्यात्मकः गृह्यते तदा यदिदमर्थज्ञानं तत् चक्षुषा जायमानेनार्थज्ञानेन न विशिष्यते अनयोः वात्स्यायनदिशा कश्चन अन्यः समाख्याशब्दो नास्ति। येन प्रतीयमानो व्यवहारः सिद्ध्येत् अप्रतीयमानेन च न व्यवहारः अतः तस्याज्ञेयस्यार्थस्य वात्स्यायनेन इतिकरणयुक्तेन संज्ञाशब्देन 'रूपमिति ज्ञानं' 'रस इति ज्ञानं' इत्येवं निर्देशः कृतः। एतावता अर्थज्ञानकाले समाख्याशब्दः न व्याप्रियते, व्यवहारकाले तु व्याप्रियत इति सुसिद्ध्यति वात्स्यायनाकूतम्।

प्रत्यक्षप्रमालक्षणे अव्यभिचारीति पदोपादानं भ्रमे दोषापाकरणार्थम्। ग्रीष्मर्तौ सूर्यरश्मयः भूमिसम्बद्धेनोष्मणा संसृष्टाः स्पन्दमाना यदा दूरस्थस्य पुरुषस्य चक्षुषा सन्निकृष्यन्ते तदा चक्षुरिन्द्रियस्यार्थेन स्पन्दमानेन रश्मिणा

सन्निकर्षे सति **'उदकम्'** इति भ्रमात्मकं ज्ञानमुत्पद्यते अत्र भ्रमात्मके ज्ञाने प्रत्यक्षप्रमालक्षणस्य समन्वयादतिव्याप्तिः स्पष्टैव। यत् अतस्मिन् तदिति तद्व्यभिचारि ज्ञानम् अर्थात् तदभाववति तत्प्रकारकं ज्ञानं व्यभिचारि भवति। एवं यत् ज्ञानं तस्मिन् तदिति तत् अव्यभिचारि भवति, अर्थात् तद्वति तत् प्रकारकं ज्ञानम् अव्यभिचारि प्रोच्यते। अथ च वात्स्यायनदिशा प्रत्यक्षम् अव्यभिचारि ज्ञानमेवानुमतम्।

प्रत्यक्षप्रमालक्षणे **'व्यवसायात्मकत्वम्'** न निवेश्यते चेत् अनवधारणात्मकस्य ज्ञानस्य संशयात्मना प्रसिद्धस्य प्रत्यक्षप्रमालक्षणाक्रान्तत्वात् अतिव्याप्तिः प्रसज्येत यस्याः निवारणार्थं प्रत्यक्षप्रमालक्षणे **'व्यवसायात्मकेति'** पदं प्रविष्टम्। यदा दूरस्थः कश्चन पुरुषः अर्थविशेषं पश्यन् **'धूम इति वा'** **'रेणुरिति वा'** अवधारयितुं क्षमो न भवति तदा इन्द्रियस्य अर्थेन सन्निकर्षात् अनवधारणज्ञानं सिद्ध्यति। इदमनवधारणात्मकं ज्ञानं तावदात्मनः संयोगादेव जायते इन्द्रियार्थसंयोगस्यात्र नास्त्युपादेयता इति तु नाऽभ्युपेयम्। यतः यदा कश्चन पुरुषः चक्षुषार्थविशेषं पश्यन् अवधारयितुं समर्थो न भवति एवञ्च इन्द्रियेणोपलब्धमर्थविशेषं मनसा नोपलभते तदा इन्द्रियेण अर्थविशेषम् अनवधारयन् मनसापि नावधारयितुं क्षमो भवति। एतत् यत् इन्द्रियेण अर्थविशेषानवधारणपूर्वकं मनसार्थविशेषानवधारणं तत् विशेषापेक्षं विमर्शमात्रं संशयः भवति अयं संशयः इन्द्रियार्थसन्निकर्षजन्यस्तु विद्यते परं अनवधारणात्मकं इदं ज्ञानं प्रत्यक्षमिति नाभ्युपगम्यते। सर्वत्र नियमेन प्रत्यक्षविषयो यो भवति तस्य इन्द्रियेण प्रमातुः प्रथमं व्यवसायः अनन्तरं पुनः मनसा व्यवसायस्य व्यवसायः अर्थात् अनुव्यवसायः जायते। एतादृश-नियमवशादेव येषां पुरुषाणाम् इन्द्रियम् उपहतं भवति तेषां तेन इन्द्रियेण ज्ञानाभावात् मनसा अनुव्यवसायोऽपि नानुभवसिद्धः।

न्यायदर्शने मनः अपि इन्द्रियं परम् अस्य पृथगुपदेशः मनोगतधर्म-भेदात् अभ्युपेयः। भूतेभ्यः समुत्पन्नानि घ्राण-रसन-चक्षुस्त्वक्श्रोत्राणि बहिरिन्द्रियाणि गन्ध-रस-रूप-स्पर्श-शब्दरूपेषु विषयेषु यथाक्रमं नियतानि भवन्ति अथ चेमानि इन्द्रियाण्यपि सगुणानि परं मनस्तु न भौतिकं नापि सगुणमिति अत्र मनसि विशेषः स्मरणीयः। आत्मनः, आत्मनि विद्यमानस्य

सुखस्य च मानसं प्रत्यक्षं स्वीक्रियते, यद्यपि न्यायदर्शने मनसः इन्द्रियत्वं नोक्तं परं तन्त्रान्तरेषु मनसः इन्द्रियत्वमभ्युपगतं न्यायदर्शने न प्रतिषिद्धमिति अनुमतमेव भवतीति सिद्धान्तात् आत्मज्ञानस्य सुखज्ञानस्यापि मनो रूपस्य इन्द्रिस्य आत्मरूपेण सुखस्वरूपेण वा अर्थेन यः संयोगः संयुक्तसमवायश्च यथाक्रमं सर्वानुभवसिद्धः तेनैव जन्यत्वात् प्रत्यक्षत्वं सूपपद्यत इति सर्वं चतुरस्रम्।

तर्कभाषाभिमतप्रत्यक्षप्रमाणविमर्शः

प्रो. हरेरामत्रिपाठी

तर्क्यन्ते तर्केण तर्कोपकृतप्रमाणेन विषयीक्रियन्ते तत्त्वतो निर्णीयन्ते इति तर्काः। तर्कविषयाणां षोडशपदार्थानां कथनं लक्षणं यत्र विद्यते सा तर्कभाषा। अस्य ग्रन्थस्य प्रणेता श्रीकेशवमिश्रो वर्तत इति। तर्कभाषा-भिमतप्रत्यक्षप्रमाणविमर्शो मम विषयो विद्यते। प्रमायाः[1] करणत्वमिति प्रमाणस्य लक्षणम्। प्र-उपसर्गस्यार्थः प्रकृष्टः 'मा'इत्यस्यार्थः ज्ञानं यद्वा यथार्थज्ञानं प्रमावाच्यार्थ इति। यथार्थानुभवत्वं[2] प्रमायाः लक्षणमिति केशवमिश्रैरुच्यते। इदमेव लक्षणं तत्त्वचिन्तामणिकारोऽपि स्वीकरोति। तेनोक्तम्– यत्र यदस्ति तत्र तस्यानुभवः प्रमा,[3] तद्वति तत्प्रकारकानुभवो वा।[4] यत्र यदस्ति इत्यत्र अस्तित्वं सम्बन्धित्वमात्रं न तु आधेयत्वमिति। अस्तित्वस्य अधिकरणत्वरूपत्वे आधेयत्वस्य वृत्त्यनियामकसम्बन्धतया तत्सम्बन्धावच्छिन्नाधिकरणत्वाप्रसिद्ध्या "गगने शब्दः" इति ज्ञानस्य प्रमात्वानुपपत्तिः। अतः अस्तित्वं न आधेयत्वमपि तु सम्बन्धित्वमात्रम्। तत्र इति निरूपितत्वं सप्तम्यर्थः तस्यान्वयः षष्ठ्यर्थविषयतायाम्। तथाच तत्सम्बन्धिनिरूपिततन्निष्ठविषयता प्रतियोग्यनुभवत्वं तत्र तत्प्रमात्वम्। घटे घटत्वं विद्यते अतः घटनिष्ठसम्बन्धितानिरूपिता या घटत्वनिष्ठा सम्बन्धिता विषयता च प्रमात्वनियामकसम्बन्धेन ग्राह्या। तथा च पर्वतो वह्निमान् इत्यत्र संयोगसम्बन्धेन वह्न्यधिकरणे पर्वतादौ समवायसम्बन्धेन वह्न्यादिभ्रमे नातिव्याप्तिः। न वा इत्यनेन चिन्तामणिकारैः तद्वति तत्प्रकारकानुभवत्वमिति लक्षणं प्रतिपादितम्।

यत्र यदस्ति तत्र तत्प्रकारकानुभवत्वं प्रमात्वमित्यस्मात् वाक्यात्

---

1. तर्कभाषा पृ. 6
2. तदेव पृ. 7
3. तत्त्वचिन्तामणिः प्रत्यक्षखण्डः प्रथमभागः पृ. 401
   प्रकारता तादृशप्रकारताश्रयत्वं प्रमात्वम् आश्रयता च निरूपकतासम्बन्धेन आधेयत्वसम्बन्धावच्छिन्नगगनत्वावच्छिन्नप्रतियोगिताकाभाववान्

प्रथमघटपदेन धर्मीभूतः घटः गृह्यते द्वितीयेन यत् पदेन प्रकारीभूतो धर्मः घटत्वं गृह्यते अग्रे च प्रथमतत्पदेन घटस्य ग्रहणं द्वितीयतत्पदेन घटत्वस्य ग्रहणं भवति तथा च यतः घटे घटत्वं विद्यते अतः घटनिष्ठविशेष्यता निरूपितघटत्वनिष्ठप्रकारताशाली–अनुभवत्वमेव प्रमात्वम्, तदनन्तरं प्रमात्वस्य द्वितीयं लक्षणं प्रदर्शितम्, तस्योद्भावने बीजं प्रदर्शितम् मथुरानाथवागीशेन–

"नन्वेवं तद्विशेष्यकज्ञानस्यापि तत्प्रमात्वापत्तिः। न चेष्टापत्तिः, तत्प्रकारकज्ञान एव तत्प्रमाव्यवहारादित्यस्वरसात् लक्षणान्तरमाह"[1] तद्–वति अत्र विशेष्यित्वं सप्तम्यर्थः। विशेष्यित्वस्य सप्तम्यर्थस्य अवच्छिन्नता–सम्बन्धेन तत्प्रकारतायामन्वयः। एवञ्च तद्विशेष्यकत्वावच्छिन्नतत्प्रकारता–शाल्यनुभवत्वं तत्प्रमायाः लक्षणम्। अर्थात् विशेष्यितासम्बन्धेन तदवच्छिन्ना या तत्प्रकारिता तच्छाल्यनुभवत्वं तत्प्रमायाः लक्षणम्। प्रमा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। प्रमाणमपि चतुर्विधं प्रत्यक्षानुमानोपमान–शब्दभेदाच्च। प्रत्यक्षस्य स्वरूपं निरूपयन्नाह केशवमिश्रः "साक्षात्कारि–प्रमाकरणं प्रत्यक्षम्। साक्षात्कारिणी च प्रमा, सा एवोच्यते या इन्द्रियजा।"[3] गङ्गेशोपाध्यायस्यानुवादमात्रं तेनोक्तं तत्त्वचिन्तामणिग्रन्थे प्रत्यक्षस्य साक्षात्कारित्वं लक्षणं चाक्षुषादिज्ञाने साक्षात्करोमीत्यनुगतबुद्धेर्बाधकं विना जातिविषयत्वात्।"[4]

यद्यपि साक्षात्करोमि इत्यनुव्यवसायस्य विषयताविशेष एव विषयोऽस्तु किं जात्या? अनुव्यवसायसिद्धं साक्षात्कारत्वं लाघवात् जातिरूपमेव न तु विषयताविशेषः। प्रत्यक्षशब्दस्य प्रयोगः इन्द्रियजन्यप्रमायां, प्रत्यक्षप्रमाकरणे, प्रमाविषयीभूतपदार्थे च भवति। प्रति विषयं प्रतिगतमक्षमिन्द्रियं यस्मै प्रयोजनाय तत्प्रत्यक्षमनया व्युत्पत्त्या प्रत्यक्षशब्दार्थः प्रत्यक्षप्रमा। अक्षमक्षं प्रति इति प्रत्यक्षमत्र अक्षशब्दः ज्ञानेन्द्रियपरः, यद्वा प्रतिगतमक्षम् वा प्रतिगतं विषयं प्रति गतम्=विषयसन्निकृष्टमक्षम् अनया व्युत्पत्त्या प्रत्यक्ष–वाच्यार्थः प्रत्यक्षप्रमाकरणम् इन्द्रियमिति।[1] प्रति=यं विषयं प्रति गतमक्षं तत्

---

1. तत्त्वचिन्तामणिप्रत्यक्षखण्डप्रथमभागः पृ. 403
2. तदेव पृ. 3
3. तर्कभाषा पृ. 59 हिन्दी अनु. सहित श्री बदरीनाथशुक्ल मोति. लाल बनारसीदास
4. तत्त्वचिन्तामणिप्रत्यक्षखण्डप्रथमभागः पृ. 543

प्रत्यक्षम् अनया व्युत्पत्त्या प्रत्यक्षप्रमाविषयीभूतपदार्थपरं प्रत्यक्षम्। प्रत्यक्षप्रमा द्विविधा सविकल्पकनिर्विकल्पकभेदात्। विकल्प्यते विशिष्यते वस्तु येन स विकल्पः=विशेषणम्, तेन सहितं सविकल्पं, सविकल्पमेव सविकल्पकम्[2] अथवा विकल्पयति विशिनष्टि वस्तु यत् तद् विकल्पकं विशेषणम्, तेन सहितं सविकल्पकं सविशेषणम् इति व्युत्पत्त्या सविकल्पकवाच्यं विशेषणयुक्तपदार्थावगाही ज्ञानम्। यस्य ज्ञानस्य तज्ज्ञानस्य विषयभूतार्थस्य बोधकशब्देन कथनं भवति तज्ज्ञानं सविकल्पकं शब्दोऽयं विशेषणयुक्त-पदार्थावगाही प्रत्यक्षात्मकज्ञाने योगरूढो वर्तते। नामजात्यादियोजनात्मकं सविकल्पकमिति केशवमिश्रैरुक्तम्। अभिलापसंसर्गयोग्यप्रतिभासं सविकल्पकमित्यपि केचित् वदन्ति। यथा अयं गौः, गौः शुक्लः, गौः गच्छति, गौर्न महिषः इति। अखिलव्यवहारस्य मूलं[3] सविकल्पकमित्यपि वदन्ति दार्शनिकाः।

विकल्पेभ्यो विशेषणेभ्यो निर्मुक्तं निर्विकल्पं निर्विकल्पकमेव निर्विकल्पकमथवा विकल्पेभ्यो विशेषणेभ्यो निर्मुक्तं निर्विकल्पकम्। तर्कभाषाकारैः उच्यते "नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि[4] किञ्चिदिदं ज्ञानं।" बालमूकादिज्ञानसदृशं निर्विकल्पकमित्यपि केचित् वदन्ति।

यदि निर्विकल्पकज्ञानमनभिलाप्यमप्रवर्तकं विशिष्टवस्तूनामग्राहकं भवति तर्हि तत्र प्रमाणं किम्? सविकल्पकं प्रत्यक्षं मानसप्रत्यक्षसिद्धं वर्तते तदेवानुमापकं निर्विकल्पकज्ञाने। यथा गामहं पश्यामि इति मानसप्रत्यक्षं भवति। अत्र गोत्वविशिष्टस्य गोः सविकल्पकं ज्ञानं जायते। विशिष्टबुद्धौ विशेषणज्ञानं कारणमिति नियमात् ततः पूर्वं गोत्वस्य ज्ञानमावश्यकमिति अतः सविकल्पकज्ञानात् पूर्वं निर्विकल्पकज्ञानं अवश्यमभ्युपेयम्। अत्र श्रद्धेयैः बदरीनाथशुक्लमहोदयैः उक्तम्[1]-निर्विकल्पकप्रत्यक्षे पदार्थस्य विशेषणरूपेण, विशेष्यरूपेण, वा संसर्गरूपेण भानं न जायते। अतः

1. तर्कभाषा हिन्दी अनु. सहित श्री बदरीनाथशुक्ल पृ. 6
2. तदेव पृ. 62
3. तदेव पृ. 62
4. तदेव पृ. 70

विशेषणता विशेष्यता वा संसर्गताख्यविषयता निर्विकल्पकज्ञाने नास्ति। परन्तु तुरीया विषयता निर्विकल्पकज्ञाने विद्यते। अतः विशेषणताशून्यं ज्ञानं वा विशेष्यताशून्यं ज्ञानं, वा संसर्गताशून्यं ज्ञानं वा विलक्षणविषयताशालिज्ञानं निर्विकल्पकमित्यपि वक्तुं शक्यते। प्रत्यक्षप्रमायाः करणं त्रिविधं भवति। यदा निर्विकल्पकं ज्ञानं फलं तदा इन्द्रियार्थसन्निकर्षः अवान्तरव्यापारः इन्द्रियं[2] करणं भवति। यदा सविकल्पकं ज्ञानं फलं तदा निर्विकल्पकं ज्ञानमवान्तरव्यापारः, इन्द्रियार्थसन्निकर्षः[3] करणम्। यदा हानोपादानोपेक्षाबुद्धयः फलं तदा सविकल्पकं ज्ञानमवान्तरव्यापारः निर्विकल्पकं ज्ञानं[4] करणं च भवति। केचन विद्वांसः त्रिविधां प्रत्यक्षप्रमां मन्वाना अपि न तस्य त्रिविधकरणत्वं मन्वते अपि तु सर्वत्र इन्द्रियमेव करणं भवति।[5] यदा निर्विकल्पकं ज्ञानं फलं तदा इन्द्रियार्थसन्निकर्ष एव करणम्, यदा सविकल्पकं ज्ञानं फलं तदा इन्द्रियार्थसन्निकर्षः, निर्विकल्पके ज्ञाने द्वे अवान्तर-

व्यापारे भवतः। यदा हानोपादानोपेक्षाबुद्धयः फलं तदा इन्द्रियार्थ-सन्निकर्षः, निर्विकल्पकं, सविकल्पकञ्च ज्ञानम् एतानि त्रीणि अवान्तर-व्यापाराणि भवन्ति सर्वत्र इन्द्रियमेव करणमित्यपि केचिद् वदन्ति।

इन्द्रियार्थयोः सन्निकर्षत्वे सति साक्षात्कारिप्रमाहेतुत्वं[6] सन्निकर्षस्य लक्षणं। स च षड्विधो भवति लौकिकसन्निकर्ष इति। संयोगः, संयुक्त-समवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्य-विशेषणभावश्चेति। यदा इन्द्रियेण द्रव्यस्य प्रत्यक्षं क्रियते तदा संयोग-सन्निकर्षः इन्द्रियद्रव्ययोरयुतसिद्धसम्बन्धाभावात्। यदा चक्षुरिन्द्रियेण घटरूपं गृह्यते तदा चक्षुषा घट-संयोगे, घटे च रूपस्य समवायात् संयुक्तसमवाय-

---

1. तर्कभाषा हि. टी. पृ. 65
2. तर्कभाषा पृ. 70
3. तदेव पृ. 71
4. तदेव पृ. 71
5. तर्कभाषा - अत्र कश्चिदाह- सविकल्पकादीनामपीन्द्रियमेव करणम्। यावन्ति आन्तरालिकानि सन्निकर्षादीनि तानि सर्वाणि अवान्तरव्यापारः इति। पृ. 77।
6. तर्कभाषा पृ. 73

सन्निकर्षो भवति। यदा घटरूपनिष्ठं रूपत्वं गृह्यते तदा चक्षुसंयुक्ते घटे समवेतं रूपं तत्र रूपत्वस्य समवायात् संयुक्तसमवेतसमवायसन्निकर्षो भवति। यत्र चेन्द्रियग्राह्यो विषयः प्रथमत एव स्वाश्रये समवेतो भवति तत्र प्रथममेव समवायसम्बन्धो भवति यथा श्रोत्रेन्द्रियेण शब्दस्य प्रत्यक्षे समवायसन्निकर्ष इति। यदा श्रोत्रेन्द्रियेण शब्दत्वजातेः ग्रहणं भवति तदा समवेतसमवायसन्निकर्षो[1] भवति।

चक्षुषा घटाभावादिग्रहे विशेष्यता वा विशेषणता सन्निकर्षो भवति। यथा घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावो विशेषणं तत्र विशेषणतासन्निकर्षो वर्तते।

यदा भूतले घटाभावः इत्युच्यते तदा चक्षुःसंयुक्ते भूतले घटाभावः विशेष्यः तर्हि विशेष्यता घटाभावे विद्यते। संख्यात्वादौ रूपाभावः इत्यत्र स्वसंयुक्तसमवेतसमवेतविशेष्यता सन्निकर्षो भवति। यद्यपि अलौकिक-सन्निकर्षस्य स्वरूपं तर्कभाषायां नोपलभ्यते।

अलौकिकसन्निकर्षस्य भेदं प्रतिपादयन्नाह विश्वनाथः

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा।।[2]

सामान्यं जातिः घटादिव्यक्तिश्च तदेव लक्षणं स्वरूपम् आत्मा यस्य इति व्युत्पत्या जात्यात्मकः व्यक्त्यात्मकश्च सन्निकर्षः एकः। ज्ञानमेव लक्षणं स्वरूपं यस्य सः ज्ञानात्मकः सन्निकर्षः द्वितीयः। चित्तवृत्तिनिरोधस्तज्जन्यः संयमः धारणाध्यानसमाध्यात्मकः सन्निकर्षः तृतीयो भवति। इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं धूमत्वं प्रत्यासत्तिः। यत्र इन्द्रियसंयुक्तो धूमादिः तद् विशेष्यकं धूमः इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः, धूमत्वेन सन्निकर्षेण धूमाः इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते।

"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः" सामान्यलक्षणा

1. तर्कभाषा पृ. 76
2. इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यज्ञानमेव प्रत्यासत्तिः

प्रत्यासत्तिः तदाश्रयज्ञानं जनयति। ज्ञानलक्षणासन्निकर्षस्तु यद्विषयकं ज्ञानं भवति तस्यैव सन्निकर्षः यथा सुरभिचन्दनमित्यत्र सौरभस्य भानं ज्ञानलक्षणा-प्रत्यासत्या भवति। सौरभत्वस्य भानं तु ज्ञानलक्षणया एव।

योगजो द्विविधः प्रोक्तः युक्तयुञ्जानभेदतः।
युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः॥

इत्यनेन अलौकिकस्य सन्निकर्षस्य तृतीयः यः भेदः योगज सन्निकर्षो वर्तते तस्य स्वरूपं विश्वनाथपञ्चाननभट्टाचार्येण प्रतिपादितमिति।

व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः तत्करणमनुमास्य लक्षणम्। हेतुव्यापकसाध्यसामानाधिकरण्यं व्याप्तिः वा साध्याभावव-दवृत्तित्वमिति। सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता। संज्ञासंज्ञिसम्बन्ध ज्ञानत्वमुपमितिः तत्करणत्वमुपमानस्य लक्षणम्। पदजन्यपदार्थोपस्थितिजन्यत्वे सति ज्ञानत्वं शाब्दबोधस्य लक्षणं तत्करणत्वं शब्दप्रमाणस्य लक्षणमिति।

न्यायवार्त्तिकसम्मतप्रत्यक्षप्रमाणविमर्शः

डॉ. विष्णुपदमहापात्रः

शास्त्रं हि शिष्याकांक्षाक्रमेण प्रवर्तते। निःश्रेयसं कुतोऽधिगम्यते इत्याकांक्षायां प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगमः इत्यभिहितम्। ततः कथमधिगम्यते इति जिज्ञासायां "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः"[1] द्वितीयसूत्रं प्रवृत्तम्। ततः प्रमाणादयः के, कति, किं लक्षणम् इति, ततः कथमिति च जिज्ञासा जायते। अतः प्रमाणादीनां स्वरूपं तेषां विभागः लक्षणं च निरूप्यन्ते। ततः तद्विषयिणी परीक्षा च क्रियते शास्त्रे। यदाहुः भाष्यकाराः ''त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेति''[2] इति। प्रथमसूत्र एव षोडशपदार्थाः प्रमाणादयः नाम्ना संकीर्त्तिताः। तत्रोद्देशक्रमानुसारेण प्रमाणस्य प्रभेदः लक्षणञ्च तैः निरूपितम्। तत्र प्रमीयते अनेनेति व्युत्पत्त्या प्रामाणशब्देनैव प्रमाकरणं प्रमाणमिति प्रमाणलक्षणं सर्वैरवगमितम्। प्रमाणं चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। इन्द्रियस्यार्थेन सम्बन्धादुत्पद्यमानमर्थाव्यभिचारि ज्ञानं प्रत्यक्षं प्रमा। तच्च द्विविधं सविकल्पकनिर्विकल्पकभेदात्। ईदृशं प्रत्यक्षज्ञानं यस्मात्करणाज्जायते तत् प्रत्यक्षप्रमाणमिति सूत्रकाराणामाशयः।

तत्र प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि''[3] इति प्रमाणचतुष्टयस्य संकीर्तनेनापि तदतिरिक्तं किमपि प्रमाणान्तरमस्ति न वा इत्याकारक-संशयस्योत्पत्तिर्भवत्येव। सजातीयविजातीयाभ्यां व्यावर्त्तमानात्मकलक्षणस्य सप्रयोजनत्वेऽपि प्रमाणसंख्यायाः निर्णयः नैव सम्भवति इत्यतः सूत्रकारेण महर्षिणा गौतमेन आदौ विभागमुखेनैव तृतीयसूत्रस्य निर्वचनं कृतम्। सूत्रकाराभिमतं स्पष्टयति उद्योतकरः ''तस्मात् संशयनिर्वृत्यर्थं युक्तो विभागोद्देश

1. न्या. सू. 1/1/2
2. न्या. भा. पृ 17
3. न्या. सू. 1/1/3

इति''।[4] सामान्यज्ञानमन्तरा विशेषजिज्ञासानुदयाद् आदौ प्रमाणसामान्यलक्षणं वक्तव्यमासीत् सूत्रकारैः तथा नोक्तमिति सूत्रकारस्य न्यूनता इति ये खलु वदन्ति, तेषां मतनिराकरणार्थं तात्पर्यटीकाकाराः उक्तसूत्रस्य विभागवचनपरत्वेऽपि चरमतः ''प्रमाणम्'' इति शब्देन प्रमाणसामान्यलक्षणं पर्य्यवस्यति। सूत्राणां वह्वर्थसूचनात्। निगदितञ्च शांकरभाष्यस्य भामतीव्याख्यायां सूत्रञ्च वह्वर्थसूचनाद्भवति। यथाहुः–

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः।।[5]

मिश्रमतमभ्युपेत्य जयन्तभट्टः कथयति–

एकेनानेन सूत्रेण द्वयञ्चाह महामुनिः।
प्रमाणेषु चतुःसंख्यां तथा सामान्यलक्षणम्।।[6]

अर्थात् प्र + माधातुना करणार्थे ल्युट्प्रत्ययकृते सति निष्पन्नोऽयं प्रमाणशब्दः प्रमाकरणार्थकः, तदेव प्रमाणसामान्यलक्षणम्। प्रमाणशब्दस्य करणार्थकत्वमभ्युपगम्यं उपलब्धिसाधनानि प्रमाणानीति'' प्रामाणसामान्यलक्षणं भाष्यकारैः अभिहितम्। तादृशं सन्दर्भं गृहीत्वा "उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्व"[7] मिति प्रमाणसामान्यलक्षणं वार्त्तिककारैरुद्घोषितम्। प्रमाणसामान्यलक्षणनिर्वचनानन्तरं प्रमाणचतुष्टये प्रत्यक्षस्य सर्ववादिसम्मतत्वात्। अर्थविशेषप्राबल्यात्''[8] "पूर्वप्राधान्यात् सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वात्''[9] च आदौ प्रत्यक्षसूत्रं प्रतिपादयति अक्षपादगौतमः ''इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्''[10] इति। अर्थाद् इन्द्रियेण सह अर्थस्य सन्निकर्षाद् यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षम्। सूत्रकाराभिमतं स्पष्टयति उद्योतकरः "इन्द्रियेणार्थस्य सन्निकर्षाद्यदुत्पद्यते ज्ञानं तत्प्रत्यक्षम् इति"[11]।।

4. न्यायवार्त्तिकम् पृ. 28
5. भामती ब्रह्मविचारप्रकरणम् पृ. 25
6. न्यायमञ्जरी प्रमाणप्रकरणम् पृ. 25
7. न्यायवार्त्तिकम् पृ. सं 05
8. न्या. सू. 2/1/29
9. न्यायवार्त्तिकम् पृ. 30
10. न्या. सू. 1/1/4

प्रत्यक्षशब्दस्य व्युत्पत्तिपक्षः–

लोके तावत् प्रत्यक्षं ज्ञानं, प्रत्यक्षा क्रिया, प्रत्यक्षो घटः इति प्रत्यक्षपदस्य ज्ञानपरतया विषयपरतया साधनपरतया च बहुधा प्रयोगाः समुपलभ्यन्ते तर्हि कथं प्रत्यक्षशब्दोऽस्माभिर्व्युत्पादनीयः? यतो हि अत्र अव्ययीभावसमासः पक्षः गतिसमासपक्षश्चेति पक्षद्वयमुपलभ्यते। तत्र यद्यपि प्रथमतः वार्त्तिककारटीकाकाराभ्यां अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति[12] भाष्यव्याख्यानावसरे अव्ययीभावसमास एवोक्तः। तद्यथा ''अयं च सूत्रविवक्षायां अव्ययीभावः समासः[13] ''अक्षमक्षं प्रति वर्तत इति विगृह्याव्ययीभावे कृते सर्वेन्द्रियावरोधो भवति।"[14] तथापि पश्चात् ताभ्यामपि गतिसमासपक्षः वार्त्तिककारैः तात्पर्यटीकाकारैश्च समर्थितः। प्रतिपादितञ्च "कः पुनरत्र समासः? प्रादिसमासोऽयं द्रष्टव्यः प्रतिगतमक्षं प्रत्यक्षमिति। यथोपगतो गोभिरुपगुरिति"[15] "प्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गताप्रतिषेधादभिधेय–लिङ्गोपादानात् प्रत्यक्षोऽर्थः प्रत्यक्षा बुद्धिः प्रत्यक्षं ज्ञानमित्यभिधेयलिङ्गता सिद्धा भवति"[16] टीकाकारस्तु प्रादिसमासपक्षं यद्यपि समाश्रितवान् तथापि अक्षं अक्षं प्रति वर्तते'' इत्याकारकविग्रहवाक्यं स्वीकृत्य प्रत्यक्षप्रमाणार्थे अव्ययीभावसमासपक्षं अङ्गीकृतवान् इदमेव टीकाकाराणां वैशिष्ट्यं यतः ''अक्षस्य अक्षस्य'' इति भाष्यकारैः यद् भाषितं तत्र विग्रहवाक्यार्थस्य बोधः न तु विग्रहवाक्यस्य यतः तस्य विग्रहवाक्यत्वे षष्ठीविभक्तेः प्रयोगः न स्यात्। प्रतियोगे द्वितीयायाः विधानात्। एवञ्च निरुक्तविग्रहवाक्यान्तर्गतं वर्तते इति क्रियापदात् "वृत्ति" अर्थः बोध्यते। अतः भाष्यकारैः वृत्तिशब्दस्य प्रयोगः कृतः। "वृत्तिस्तु सन्निकर्षो ज्ञानं वा"[17] अर्थाद् वृत्तिपदेन सन्निकर्षस्य ज्ञानस्य वा ग्रहणमिति भाष्यकारै उररीकृतम्। उद्योतकरैस्तु समुच्चयार्थे वृत्तिशब्दस्य प्रयोग इति अङ्गीकृतः। "सन्निकर्षो ज्ञानञ्चेति"[18]।। समुच्चयार्थे

11. न्यायवार्त्तिकम् पृ. 17
12. न्यायभाष्यम् पृ. 17
13. न्यायवार्त्तिकम् पृ. 28
14. न्यायवाार्त्तिकतात्पर्यटीका. प्रत्यक्षसूत्रव्याख्या।
15. न्यायवार्त्तिकम् पृ. 28
16. न्यायवार्त्तिकतात्पर्यटीका प्रत्यक्षप्रकरणम्।
17. न्यायभाष्यम् पृ. 17
18. न्यायवार्त्तिकम् प्रत्यक्षसूत्रव्याख्याप्रकरणम्।

कथमिति जिज्ञासायां प्रमाणं प्रदर्शयितुं शक्यते यत् प्रत्यक्षप्रमाण-व्याख्यानावसरेऽस्मिन् "अथवा" इत्यादि सन्दर्भेण यथार्थप्रत्यक्षज्ञानमपि प्रत्यक्षप्रमाणमिति प्रशस्तपादाचार्यैरुक्तम्। प्रशस्तपादाचार्यसम्मतार्थमभ्युपगत्य किरणावलीकारः उदयनाचार्यः भणति- "अथवेति वा शब्दः समुच्चये न विकल्पे। हेयादिज्ञानोत्पत्तावपि द्रव्यादिज्ञानं प्रमाणमिति वाक्यार्थः"[19]। अक्षस्य इन्द्रियार्थकत्वाद् वृत्तिशब्दस्य समुच्चयार्थकत्वाच्च तर्कभाषाकाराभिमतम् इन्द्रियं, इन्द्रियार्थसन्निकर्षः ज्ञानञ्चेति करणत्रैविध्यं प्रसिद्ध्यति। मिश्रास्तु वृत्तिरिति हि व्यापारः इति प्रतिपादितवन्तः। इन्द्रियजन्यप्रत्यक्षज्ञानस्य व्यापारभूता इयमिन्द्रियवृत्तिः। व्यापारार्थस्तु प्रत्यक्षशब्दव्युत्पत्तिमात्रलभ्योऽर्थः। न तु प्रत्यक्षप्रमाणस्य लक्षणम्।

सन्निकर्षः

प्रत्यक्षं प्रति इन्द्रियं करणम्, इन्द्रियार्थसन्निकर्षः व्यापारः, अर्थाद् विषयेण सह इन्द्रियस्य सम्बन्ध एव व्यापारः सन्निकर्ष उच्यते। स च सन्निकर्षः संयोगादिभेदेन षड्विधः। उक्तं च आदौ वार्त्तिककारेण ''सन्निकर्षः पुनः षोढा भिद्यते। संयोगः संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभाव श्चेति। तत्र इन्द्रियं चक्षुः, रूपवद्द्रव्यप्रत्यक्षे संयोगसन्निकर्षः, द्रव्यगतरूपप्रत्यक्षे संयुक्तसमवायः, द्रव्यगतरूपगतरूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः। यद्यपि वैशेषिकनये समवायः अनुमानगम्यो भवति ''तत्र प्रमाणं तु गुणक्रियादिविशिष्ट-बुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवद्। तथापि विशेषणविशेष्यभाव सन्निकर्षेण समवायस्य अभावस्य च प्रत्यक्षं भवति इति वार्त्तिककाराः निगदन्ति। तथाहि ''समवाये चाभावे च विशेषणविशेष्यभावादिति, सोऽयं सन्निकर्षशब्दः संयोगसमवायविशेषण-विशेष्यभावव्यापकत्वादुपात्त इति।"[23] एतादृशः सन्निकर्षः प्रत्यक्षस्य मुख्यं

19. किरणावली, गुणप्रकरणम्।
20. तात्पर्यटीका प्रत्यक्षप्रकरणम्।
21. न्यायवार्त्तिकम् पृ. 31
22. न्यायसिद्धान्तमुक्तावली, समवायप्रकरणम्।
23. न्यायवार्त्तिकम् पृ. 31

कारणं भवतीत्यत तस्य सन्निकर्षस्य लक्षणत्वेनोपादानम्। ''सोऽयं सन्निकर्षः प्रत्यक्षस्य कारणं भवतीति लक्षणत्वेनोच्यते।''[24]

प्रत्यक्षकारणत्वव्यवस्थापनम्

यदि प्रत्यक्षं प्रति इन्द्रियार्थसन्निकर्षमात्रस्य कारणत्वमुच्यते तर्हि आत्ममनः संयोगस्य, इन्द्रियमनः संयोगस्य, विषयप्रकाशसंयोगस्य, विषय-स्थरूपस्य, विषयसंयोगिस्थमहत्त्वस्य च कारणसमुदायस्य सूत्रभाष्यादौ अनुल्लेखात् प्रत्यक्षलक्षणस्य न्यूनता स्यात्। एतत्प्रसंगे भणतिवार्त्तिककारः ''यदीन्द्रियार्थसन्निकर्षः प्रत्यक्षस्य कारणत्वादुपदिश्यते अत्यल्पमिदमुच्यते अन्यान्यपि बहूनि तान्यपि वक्तव्यानि।''[35] तथा नोक्तमिति नैव भाति। यतः प्रत्यक्षस्य यद्विशिष्टं कारणं तदेवात्र उच्यते। अर्थाद् आत्ममनः संयोगस्य ज्ञानमात्रावच्छिन्नं प्रति कारणत्वात्तस्य कारणत्वस्वीकारे अनुमितावतिव्याप्तिस्तदपाकरणाय इन्द्रियार्थसन्निकर्ष इति पदमुपात्तं सूत्रकारैः। अत एव प्रत्यक्षस्य यदसाधारणकारणं भवति तदेवात्र उच्यते न तु साधारणकारणम्। उक्तं च "यत्प्रत्यक्षस्यासाधारणं कारणं तदभिधीयते न पुनः साधारणं कारणं निवर्त्यत।"[26] अर्थाद् इन्द्रियमनः संयोगस्य यत्कारणत्वं तदपि असाधारणकारणं, तस्य इन्द्रियार्थसंयोगवाक्यात् लाभः सम्भवतीत्यतः पृथगुपन्यासः न विहितः, न वा तस्य आभ्यन्तरप्रत्यक्षमात्रस्य कारणत्वं न वा सूत्रकारीयं लक्षणं बाह्यप्रत्यक्षमात्रस्य। प्रतिपादितं वार्त्तिककारेण ''इन्द्रियमनः संयोगस्तर्ह्यसाधारणत्वादुपसंख्येयः न ह्ययमनुमानादिज्ञानानां कारणं भवति। न; अनेनैव तस्योक्तत्वात्। इन्द्रियार्थसन्निकर्षग्रहणेनेन्द्रियमनः संयोग उक्तो वेदितव्यः। किं कारणम्? उभयोरसाधारणत्वात्। न च यावदसाधारणं कारणं तावत्सर्वमभिधातव्यमित्यर्थ''[22] इन्द्रियमनः संयोगस्य यत् कारणत्वं तद्वक्तव्यमितिजिज्ञासायां भाष्यकारैः प्रोक्तं "भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यते इति समानत्वान्नोक्त इति।"[28] भाष्यकारोक्तभिद्यमानपदमालोक्य वार्त्तिककारः प्रवदति "अपि त्वन्यतरेणापि भिद्यत इति अन्यतरोपादानम्।"

24. न्यावार्त्तिकम् पृ. 30
25. न्यावार्त्तिकम् पृ. 32
26. न्या. वा. पृ. 32
27. न्या. वा पृ. 32
28. न्या. भा. पृ. 26

एवञ्च टीकाकाराः निगदन्ति प्रत्यक्षज्ञानस्य रूपज्ञानस्य रूपज्ञानमिति वा चक्षुर्विज्ञानमिति वा व्यपदेशेन भिद्यमानस्य आत्मनः संयोग इवायमिन्द्रियमनः संयोगो 'न भिद्यते' एवं हि स भिद्यते यदि स्वसम्बन्धिवाचकेन व्यपदेशेन स्वमन्यतो व्यावर्त्यते।"[29]

तत्रेदमवधातव्यं प्राचीनाचार्यैः अर्थविशेषे ''भिद्यते'' इति शब्दस्य प्रयोगः कृतः इति भाष्याज्ज्ञायते। परन्तु नव्याचार्यैस्तु "पृथिवी इतरेभ्यो भिद्यते" इत्याकारकप्रयोगः कृतः। गदाधरस्तु अस्य विचारप्रसंगे इत्थं प्रतिपादयति ''भिद्यते'' इति कर्मवाच्ये प्रयोगः। भिन्नत्वज्ञापनमेव भिद्धातोरर्थः, तथा हि "कर्त्तरि यगात्मनेपदासम्भवात्।"[30] अतो भिन्नत्वेन ज्ञापनं भिद्धातोरर्थः इति।

एतेन सिद्धं भवति यत् प्रत्यक्षस्य विशिष्टं कारणं इन्द्रियार्थसंयोगो भवति। तस्यैवोच्चार्यमाणत्वात् तनैव इन्द्रियमनः संयोगस्यापि चरितार्थत्वात् न कश्चन दोषः। एवञ्च असाधारणकारणं व्यपदेश्यमिति वार्त्तिककारैः यत्प्रतिपादितं तत्साधु संगतं भाति। दृष्टान्तं प्रतिपादयति वार्त्तिककारः यदात्वात्ममनः संयोगान्मानस्यो बुद्धयः प्रवर्तन्ते तदात्मना व्यपदिश्यन्ते मनसा च। यच्चासाधारणं तद्व्यपदेशभाग् भवति। तथाहि ऋत्वादिकारण-सन्निधानात् प्रादुर्भवन्नङ्कुरो र्नत्वादिभिर्व्यपदिश्यते, अपि त्वसाधारणेन बीजेन व्यपदिश्यते यवाङ्कुर इति तथेहापीत्यदोषः। इन्द्रियमनः संयोगस्य वाऽग्रहणं भेदेऽभेदात्। यस्मात् प्रत्यक्षज्ञानभेदे इन्द्रियमनः संयोगो न भिद्यते। एवञ्च भाष्यकारैः समानत्वान्नोक्त इति यत् प्रतिपादितं तत्कथं संगच्छते इत्यभिप्रायेण वार्त्तिककारः प्रकारत्रयं भणति अतीन्द्रियाधारता वा सामान्यम्, यथाऽऽत्ममनः संयोगोऽतीन्द्रियाधार एवमिन्द्रियमनः संयोगोऽपीति। विषयावृत्तित्वं वा-यथाऽऽत्ममनः संयोगो विषयावृत्तिः तथेन्द्रियमनः संयोगोऽपीति। मनोवृत्तित्वं वा यथाऽऽत्ममनः संयोगो मनोवृत्तिरेवमिन्द्रियमनः संयोगोऽपीति, तस्मादिन्द्रियमनः संयोगस्याऽऽत्ममनः संयोगेन सामान्यादन्यतराभिधानेन वा चरितार्थात्वादनभिधानमिति।[31]

---

29. तात्पर्यटीका प्रत्यक्षसूत्रव्याख्याप्रकरणम्।
30. व्युत्पत्तिवादः पञ्चमीप्रकरणम्।
31. न्या. वा. पृ. 33

इन्द्रियाणां प्राप्यकारित्वप्रतिपादनम्

प्रत्यक्षं प्रति इन्द्रियाणि करणानि भवन्ति। तानि कानीति जिज्ञासायां सूत्रकारैः सूत्रितं यत् ''घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः।[32] एतेषां पञ्चानामिन्द्रियावाच्यत्वेऽपि मनसश्चापि इन्द्रियत्वं विद्यत एव। यतः स्मृतिर्हि आत्मन आन्तरज्ञानलक्षणा क्रिया सा चेन्द्रियलक्षणं करणमन्तरा नैव सम्भवति, तस्मात् स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः। अतः प्रशस्तपादाचार्यैः प्रोक्तं "अक्षाणीन्द्रियाणि, घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट्[33] इति। अक्षपादनये इन्द्रियं प्राप्यकारित्वमर्थात् इन्द्रियाणि ग्राह्यविषयं सम्प्राप्य प्रत्यक्षमुत्पादयन्ति। तेषामिन्द्रियाणां प्राप्यकारित्वसाधनाय तृतीयाध्याये प्रतिपादयन्ति प्रदीपवत् चक्षुः तैजसम्। अर्थात् चक्षुरश्मेः पदार्थेन सह संयोगविशेषात् महदणुग्रहणं सम्भवति। रश्म्यर्थसंयोगश्चेन्द्रियाणां भौतिकत्वेऽपि सम्भवति यथा भौतिकस्य प्रदीपस्य रश्मेः पदार्थेन सह संयोगो भवत्येव, रश्म्यर्थ संयोगं विना प्रकाशकत्वे व्यवहितस्यापि प्रकाशकत्वं नैव सम्भवति। रश्मेश्च संकोचविकासशालित्वात् महदणुव्यापकत्वं नानुपपन्नम् तथा च सूत्रम् "रश्म्यर्थसन्निकर्षविशेषात् तद् ग्रहणम्" इति। एवञ्च यथा चक्षुरिन्द्रियस्य प्राप्यकारित्वं तथैव श्रवणेन्द्रियमपि ग्राह्यविषयेण सह संयुज्य शब्दप्रत्यक्षं जनयतीति तस्य प्राप्यकारित्वम्। वेदान्तिनस्तु शब्दोत्पत्तिस्थानविशेषे श्रवणेन्द्रियस्य गतिमभ्युपगत्य शब्देन सह तस्य सम्बन्ध इति स्वीकुर्वन्ति। न्यायनये च आकाशात्मकस्य श्रवणेन्द्रियस्य निष्क्रियत्वात् तत्र गतिः कथं सम्भवतीत्याशंकायामुच्यते–जलतरंगन्यायात्, तेनैव श्रवणेन्द्रिये उत्पन्नशब्देन सह समवायसन्निकर्षात् शब्दस्य प्रत्यक्षं सम्भवति।

तत्र इन्द्रियाणां प्राप्यकारित्वं यत्सूत्रकारैरभिहितं तत्कथं संगच्छते इत्यभिप्रायवान् वार्त्तिककारः बौद्धमतमवलम्ब्य भणति "इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तम् इन्द्रियस्याप्राप्यकारित्वात्। अप्राप्यकारिणी चक्षुश्रौत्रे इत्येके।"[35] अर्थाद् बौद्धाः वदन्ति चक्षुरिन्द्रियस्य श्रवणेन्द्रियस्य च प्राप्यकारित्वं नैव

32. न्या. सू. 1/1/12
33. प्रशस्तपादभाष्यम्।
34. न्या. सू. 3/1/32
35. न्या. वा. पृ. 33

सम्भवति ग्राह्यविषयेण सह इन्द्रियसन्निकर्षाभावात् यतः जीवदेहस्य यत्स्थानमिन्द्रियाधिष्ठानं तदेव इन्द्रियं तदतिरिक्तं किमपि इन्द्रियं नास्ति। यतः कृष्णसारः चक्षुः कर्णगोलं श्रोत्रम्। नेत्ररोगस्य कर्णरोगस्य जाते सति तत्स्थानविशेषस्य चिकित्सा भवति, अतः यदा चक्षुरिन्द्रियेण सान्तरग्रहणं अर्थाद् दूरस्थविषयाणां ग्रहणं पृथुतरग्रहणं अर्थात् चक्षुरिन्द्रियात् बृहद्द्रव्यस्य ग्रहणं भवति तदा तद्विषयेण सह इन्द्रियाणां संयोगो नैव भवतीत्यतः विषयेण सह अप्राप्यकारित्वं भूत्वा इन्द्रियाणि प्रत्यक्षमुत्पादयन्ति इति इन्द्रियाणामप्राप्यकारित्वं समीचीनम्। तथाह वार्त्तिककारः "अप्राप्यकारिचक्षुः सान्तरग्रहणात् पृथुतरग्रहणाच्चेति। सान्तरस्यार्थस्य विप्रकृष्टदेशावस्थितस्य ग्रहणं दृष्टम्। तस्मात् सान्तर ग्रहणादप्राप्यकारीति।''[36]

प्रमाणसमुच्चये यथा

> **सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च।**
> **अधिष्ठानाद्बहिर्नाक्षं तच्चिकित्सादियोगतः॥**
>
> **सत्यपि च बहिर्भावे न शक्तिर्विषयेक्षणे।**
> **यदि च स्यात्तदा पश्येदप्युन्मील्य निमीलनात्॥**[37]

इन्द्रियाणामप्राप्यकारित्वमिति बौद्धैः यद्भाषितं तन्न युक्तं यतः यद्यप्राप्यकिारिचक्षुर्भवति न कुड्यकटादेरावरणस्य सामर्थ्यमस्तीति आवरणस्यानुपपत्तिर्नास्ति। व्यवहितार्थस्य साक्षात्कारित्वाभावाद् इन्द्रियाणामप्राप्यकारित्वं नास्ति। एवञ्च दूरान्तिकानुविधानं चानुपलब्ध्युपलब्ध्योर्न स्यात्, अप्राप्य चक्षुरर्थं गृह्णातीति यदिदमस्य दूरे अग्रहणमन्तिके च ग्रहणमुभयमेतन्न स्यात्। दृश्यते खलु इत्यत इन्द्रियाणामप्राप्यकारित्वं नैव सम्भवति। चक्षुषः प्राप्यकारित्वे प्रमाणमपि प्रदर्शयति वार्त्तिककारः "इन्द्रियत्वमेव। प्राप्यकारिचक्षुरिन्द्रियत्वात् घ्राणादिवत्। घ्राणादीन्द्रियं प्राप्यकारिदृष्टं तथा च चक्षुस्त स्मात् प्राप्यकारीति। अथ पुनर्न किञ्चिदिन्द्रियं प्राप्यकारि प्रतिपद्यते तदा सर्वाणि पक्षीकृत्य करणत्वादिति वाच्यम्। करणं वास्यादिप्राप्यकारिदृष्टं तथा चेन्द्रियाणि तस्मात् प्राप्यकारीणिति।[38] कुमारिलभट्टपादैरपि बौद्धाभि–

36. न्या.वा. पृ. 34
37. प्रमाणसमुच्चयः प्रमाणप्रकरणम्।
38. न्या. वा. पृ 36

मतेन्द्रियाणामप्राप्यकारित्वनिराकरणावसरे प्रोक्तं यत्

''ततश्चाप्राप्यकारित्वाद् यद्बौद्धैः श्रोत्रचक्षुषोः . . . .।

चिकित्सादिप्रयोगश्च योऽधिष्ठाने प्रयुज्यते।
सोऽपि तस्यैव संस्कार आधेयस्योपकारकः।।[39]

अत एव महर्षिणा इन्द्रियाणां प्राप्यकारित्वं प्रसाध्य अभ्युपगम्य च इन्द्रियार्थसन्निकर्षोत्पन्नमिति पदं प्रत्यक्षसूत्रे उपात्तम्।

तत्रेदमवधार्यम्–इन्द्रियग्राह्यविषयेण सह इन्द्रियाणां यादृशः सन्निकर्षः प्रत्यक्षजनको भवति स एव इन्द्रियार्थसन्निकर्षः। ''पश्यत्यचक्षुः सशृणोत्यकर्णः'' इत्यादिश्रुतिवाक्यदर्शनाद् ईश्वरप्रत्यक्षे इन्द्रियजन्यत्वस्या-भावात् तत्राव्याप्तिवारणाय तत्त्वचिन्तामणिकारैः उभयसाधारणं ज्ञानाकरण-कं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं प्रतिपादितम्। एतेषामिन्द्रियाणामेव कारणत्वं न तु ज्ञानस्य, अत तर्कभाषाकारैः यद् इन्द्रियम् इन्द्रियार्थसन्निकर्षः ज्ञानञ्चेति त्रिविधं करणमुपपादितं तन्न युक्तमिति मणिकारस्याशयः। एवञ्च सूत्रकारनये ईश्वरप्रत्यक्षस्य लक्ष्यत्वमेव नास्तीति विश्वनाथः प्रवदति।

वस्तुतः प्रत्यक्षप्रमाणलक्षणमित्युक्ते प्रमाणस्य फलं जन्यप्रत्यक्षं तस्य लक्षणमिति सूत्रस्याभिप्रायः। प्रमाणशब्दात् कर्त्तरि यदि ल्युट्प्रत्ययक्रियते तर्हि तस्यार्थो भवति सर्वदा सर्वविषयकप्रमावान् अर्थाद् ईश्वरे कदापि सर्वविषयकयथार्थप्रत्यक्षात्मकसर्वज्ञाताया: अभावो एव नास्ति। उक्त नित्यसर्वज्ञता हि ईश्वरस्य प्रामाण्यमिति गौतमः। गौतममतप्रतिपादनाय आचार्यः कथयति–''तदयोगव्यवच्छेदः प्रामाण्यम् गौतमे मते।।''[40]

तत्रैव स गदति ''इन्द्रियार्थसन्निकर्षोत्पन्नत्वस्य च लौकिकमात्र-विषयत्वात्।'' एतेन ज्ञायते यत् प्राचीनानां ज्ञानाकरणकत्वप्रत्यक्षलक्षणे सम्मतिरेव नास्ति। यतः प्रत्यक्षज्ञानमपि हानादिबुद्ध्यात्मकस्य प्रत्यक्षस्य करणं भवति।

39. श्लोकवार्तिकम् प्र. सू. 40-45
40. न्यायकुसुमाञ्जलिः का. 4/5

प्रत्यक्षसूत्रान्तर्गतपदप्रयोजनप्रतिपादनम्-

पञ्चपदविशिष्टं सूत्रकारस्य प्रत्यक्षसूत्रं भवति। तत्र अनुमितावति-व्याप्तिवारणाय इन्द्रियार्थसन्निकर्षोत्पन्नेति पदस्य सार्थक्यम्। ज्ञानमिति द्वितीयपदानुपादानेन सुखादीनां इन्द्रियार्थसन्निकर्षजन्यत्वात्तत्रातिव्याप्तिवारणाय ज्ञानपदस्योपादानम्। उक्तं च वार्त्तिककारेण-''अथ ज्ञानग्रहणं किमर्थं? सुखादिव्यवच्छेदार्थम्। इन्द्रियार्थसन्निकर्षात् सुखदु:खे अपि भवत: तद्व्युदासार्थमाह ज्ञानमिति।[41]

एवञ्च ''यावदर्थं वै नामधेयशब्दा:'' इति भाष्यान्तर्गत यावदर्थ-पदस्य ''यावन्तोऽर्था:'' यावदर्थमिति अव्ययीभावसमास:। वैशब्द: अवधारणार्थक: ''यावदर्थं वै'' यावदर्थमेव। अर्थात् जगति यावन्तो पदार्था: विद्यन्ते समेषां पदार्थानां वाचका: शब्दा अपि विद्यन्ते, तादृशसंज्ञाशब्देन तस्यार्थस्य प्रतीतिबलाद् व्यवहार: प्रचलति। रूपादिविषयेण सह इन्द्रियसन्निकर्षजन्यं यद्रूपादिज्ञानं भवति तदपि तेनैव नामधेयशब्देनैव व्यपदिष्टो भवति। तत्र रूपादिज्ञानानां शब्दविषयकत्वात्तत्रातिव्याप्तिवारणाय शाब्दभिन्नमिति अव्यपदेश्यमितिपदमुपात्तम्। प्रशस्तपादाचार्योऽपि न्यायभाष्यानु-मतमव्यपदेश्यपदप्रयोजनमुररीकृतवान्। न्यायकन्दलीकारस्तु स्वीयव्याख्याना-वसरे इत्थं प्रवदति ''अव्यपदेश्यं नाम शब्दाजन्यम्। व्यपदेशे भवं व्यपदेश्यं, न व्यपदेश्यमव्यपदेश्यं शब्दाजन्यमिति।[42] वार्त्तिककारोऽपि भाष्यकारमतं पोषयति ''तच्चेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं विषयनामधेयेनाभिधीयते इति भाष्यम्। तत्प्रतिषेधार्थमाह-अव्यपदेश्यम्''[43] इति।

जयन्तभट्टस्तु भाष्याभिमतं नानुकरोति। तथाह-''तस्मात् प्रत्यक्षस्य लक्ष्यस्यासद्भावात् कस्येदं लक्षणमुपक्रान्तमित्यसम्भवदोषमाशंक्याह सूत्रकार: ''अव्यपदेश्य'' मिति।।[44]तेषामयामाशय:–समेषां ज्ञानानां शाब्दत्वे लक्ष्यात्मकस्य प्रत्यक्षज्ञानस्य उच्छेदत्वापत्ति: स्यात् अत: तस्य प्रत्यक्षस्य लक्षणमेव नैव करणीयम्। तादृशलक्षणस्य लक्ष्यत्वसाधनाय असम्भवदोषवारणाय च

---

41. न्या. वा. पृ0. 36
42. न्यायकन्दली, प्रत्यक्षप्रकरणम्।
43. न्या. वा. पृ. 36
44. न्यायमञ्जरी प्रत्यक्षपरिच्छेद:।

प्रत्यक्षमशाब्दं भवतीति सूचनाय च अव्यपदेश्यमिति पदमुपात्तम्। रूपादि-विषयकप्रत्यक्षे कदापि रूपादयः शब्दविषयाः न भवन्ति। कारणभेदप्रयुक्तत्वात् प्रत्यक्षशाब्दयोः वैचित्र्यं भिन्नं सिद्ध्यति। एवञ्च कस्यापि विषयस्य प्रत्यक्षात्प्राक् तस्याः संज्ञायाः स्मरणेऽपि सा संज्ञा न प्रत्यक्षबाधिका, यतः सा संज्ञा तस्याः संज्ञायाः स्वरूपं आच्छादयितुं नैव समर्था, अर्थात् प्रत्यक्षसामग्रीसमवधाने प्रत्यक्षस्यैवोत्पत्तिः। तत्र कस्यापि न बाधकत्वं सम्भवति। उक्तं च–

संज्ञाहि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते।
संज्ञिनः सा तटस्थाहि न रूपाच्छादनक्षमा॥[45]

मन्ये अन्येषामाचार्याणां मतमभ्युपगत्य जयन्तभट्टेण इत्थं प्रतिपादितम्। तथाहि–

इत्याचार्यमतानीह दर्शितानि यथाऽऽगमम्।
यदेभ्यः सत्यमाभाति सभ्यास्तदवलम्ब्यताम्॥[46]

टीकाकारस्तु अव्यपदेश्यपदेन निर्विकल्पकं व्यवसायात्मकपदेन च सविकल्पकप्रत्यक्षं स्वीकृतवान्। विश्वनाथोऽपि तन्मतमवलम्ब्य प्रतिपादितवान्। "तस्य विभागः, अव्यपदेश्यं व्यवसायात्मकमिति, निर्विकल्पकं सविकल्पकञ्चेति द्विविधं प्रत्यक्षमित्यर्थः।[47]

मन्ये वस्तुतः बौद्धमतापाकरणाय त्रिलोचनगुरोः उपदेशवशात् टीकाकारैः अव्यपदेश्यं व्यवसायात्मकमिति पदद्वयस्य इत्थं व्याख्यानं कृतम् इति हेमचन्द्रग्रन्थादवलोक्यते–''अत्र च पूर्वाचार्यकृतव्याख्या वैमुख्येन संख्यावद्भिस्त्रिलोचनगुरुवाचस्पतिप्रमुखैरयमर्थः समर्थितो यथा इन्द्रियार्थसन्नि-कर्षोत्पन्नं ज्ञानमव्यभिचारि प्रत्यक्षमित्येवं प्रत्यक्षलक्षणं, ''यतः'' शब्दाध्याहारेण च इत्यादि। उद्योतकरस्तु तथानाङ्गीकरोति अपि च भाष्यानुमतं निगदति-''पञ्चपदपरिग्रहणप्रत्यक्षलणमुक्तं, यत्रान्यतरपदपरिग्रहो नास्ति तत्प्रत्यक्षाभा-समिति।

---

45. न्यायम. प्र. परि
46. न्या. म. प्र. परि
47. न्य. सू. वृत्तिः प्र. सू व्याख्या।

शाब्दभिन्नत्वविशिष्टं प्रत्यक्षलक्षणमभ्युपेयते चेत्तर्हि भ्रमविषयेऽतिव्याप्तिः, यतः ग्रीष्मऋतौ चक्षुः सन्निकृष्टेषु मरुमरीचिषु जायमानस्य उदकमिति ज्ञानस्य भ्रमात्मकस्य प्रत्यक्षत्वव्यवच्छेदाय अव्यभिचारीति पदं सूत्रकारेण विशेषितम्। तथा च शाब्दभिन्नत्वे सति भ्रमभिन्नत्वे सति इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति। तथासति संशयेऽतिव्याप्तिः, यतः चक्षुरिन्द्रियेण सन्निकृष्टमप्यर्थं पश्यन् दूरस्थपुरुषःनावधारयति धूमो वाऽयं रेणुरिति यत्संशयात्मकं ज्ञानं तस्य च शाब्दभिन्नत्वाद् भ्रमभिन्नत्वाद् इन्द्रियार्थसन्निकर्षत्वाच्च तत्र संशये प्रत्यक्षलक्षणस्यातिव्याप्तिः। तद्व्यवच्छेदार्थं तल्लक्षणे व्यवसायात्मकमिति पदं विशेषणीयम्। तथा च इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति प्रत्यक्षलक्षणं फलितं भवति। इत्यलमतिविस्तरेण।

48. प्रमाणमीमांसा पृ. 36

49. न्या. वा. पृ. 37

न्यायशास्त्रदिशा प्रत्यक्षलक्षणम्

डॉ. सुधांशुभूषणपण्डाः

तत्र प्रेक्षावतां विवेचकानां प्रवृत्तये "लक्षणप्रमाणाभ्यां वस्तुनिर्णयाः" इति प्राचीनन्यायोक्तिं हृदि निधाय प्रमाणाधीना समेषां पदार्थानां व्यवस्थितिरित्यतः प्रमाणप्रमेयादिषोडशपदार्थान्तर्गतेषु प्रमाणपदार्थस्य प्रधानत्वाद् भगवता अक्षपादगौतमेन ''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इत्यस्मिन् सूत्रे प्रमाणानां चतुष्टयत्वं प्रतिपादितम्। परन्तु न्यायसारकारस्य भासर्वज्ञस्य मते उपमानस्य शब्देऽन्तर्गतत्वात् त्रिविधमेव प्रमाणमिति सूचितमस्ति। उक्तं च- त्रिविधं प्रमाणम्। प्रत्यक्षानुमानमागमश्चेति।।[2] उपमितिं प्रति सादृश्यज्ञानस्य करणत्वाद् अतिदेशवाक्यार्थस्मरणस्य च व्यापारत्वाद् उपमितिप्रमा प्रत्यक्षाद्यतिरिक्ता। तत्करणस्यापि प्रमाणान्तरत्वं सिद्ध्यति। अतः सूत्रकारस्य मतं समीचीनं प्रतिभाति। न्यायशास्त्रे प्रमाणशब्दः प्रमीयते इति भावव्युत्पत्त्या प्रमापरत्वेन, प्रमीयते अनेन इति करणव्युत्पत्त्या प्रमाणपरत्वेन चोपलभ्यते। अनधिगतार्थगन्तृत्वं प्रमाणमिति प्रमाणलक्षणे प्रमाणशब्दः प्रमापरतया प्रदर्शितः। न्यायसूत्रे प्रदर्शितं प्रमाणपदं प्रमाकरणत्वार्थकम्। तस्य लक्षणं प्रतिपादयति तर्कभाषाकारः केशवमिश्रः ''प्रमाकरणं प्रमाणमिति।[3] सम्यगनुभवसाधनं प्रमाणम्''[4] इति भासर्वज्ञः। सम्यक् चासावनुभवश्चेति सम्यगनुभवः। तस्य साधनं करणं प्रमाणम्। प्रमीयते येन तत् प्रमाणमिति करणव्युत्पत्तेरिह विवक्षितत्वात् करणभूतस्य प्रमाणस्य लक्षणाभिधानमिति[5] पदपञ्चिकाकारः सूरिवासुदेवः प्रवदति। न्यायसारकारोक्तप्रमाणलक्षणे संशयविपर्ययादिज्ञानवारणाय सम्यग्

---

1. न्या. सू. 1//1/3
2. न्या. सा. पृ. से 79
3. त. भा. पृ. स. 16
4. न्या. भूषणं. पृ. सं. 11
5. पद. पंचि. पृ. स. 3

पदम्। ''सम्यग्ग्रहणं संशयविपर्ययापपोहार्थम्।''[6] स्मरणज्ञानव्यवच्छेदाय अनुभवपदं प्रमाणलक्षणमुपात्तम्। ''स्मरणज्ञानव्यवच्छेदार्थमनुभवग्रहणम्''[7] सम्यगनुभवः प्रमाणमित्युक्ते फलभूतस्यानुभवस्य प्रमाणत्वापत्तिः तथापि सम्यगनुभवहेतुरिति सिद्धेः साधनमिति गुरुकरणे प्रमातृप्रमेयव्यवच्छेदाय साधनपदमुपात्तं न्यायसारकारेण भासर्वज्ञेन। ''प्रमातृप्रमेयव्यवच्छेदार्थं फलाद् भेदज्ञानज्ञापनार्थं च साधनग्रहणम्।''[8]

प्रत्यक्षानुमानोपमानशब्दात्मकप्रमाणचतुष्टये प्रत्यक्षप्रमाणस्य वरिष्ठत्वात् सर्ववादिसम्मतत्वाच्च आदौ प्रत्यक्षसामान्यलक्षणं वक्तव्यम् अस्ति।

सामान्यज्ञानमन्तरा विशेषजिज्ञासानुदयाद् आदौ प्रत्यक्षसामान्यलक्षणं वक्तव्यमित्याकाङ्क्षायां सूत्रकारेण महर्षिणा गौतमेन सूत्रितं यत् ''इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्। प्रत्यक्षसूत्रे अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकमिति पदत्रयं व्यभिचारवारकत्वेन विशेषणम्। लक्षणं तावत् इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वमर्थाद् इन्द्रियस्यार्थेन सह सन्निकर्षाद् यज्ज्ञानुमुत्पद्यते तत्प्रत्यक्षमिति सिद्धान्तः। चक्षुःश्रोत्रत्वगादिबाह्यपञ्चेन्द्रियगोचरैः पदार्थैः सह तत्तदिन्द्रियसन्निकर्षाज्जायमानं तत्तदर्थविषयकज्ञानं प्रत्यक्षं भवति।

यदि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणमभ्युपेयते चेत्तर्हि आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियमर्थेन साकं संयुज्य प्रत्यक्षं प्रसज्यते इत्येषा या न्यायशास्त्रसम्मता प्रक्रिया तस्याः अपलापो भविष्यतीति वक्तुं न शक्यते। यतः सूत्रकारेण यदिदं प्रत्यक्षलक्षणमुक्तं तदिन्द्रियार्थसन्निकर्ष एव प्रत्यक्षस्य कारणम्, तन्न इतरकारणानां व्यवच्छेदकम्। अर्थात् इदमेव न कारणमेतदतिरिक्तमपि कारणमस्तीत्यवधारणमेव, येन इन्द्रियार्थसन्निकर्षातिरिक्ताऽऽत्ममनःसंयोगादौ प्रत्यक्षव्यवच्छेदः स्यात् किन्तु प्रत्यक्षस्य यद्विशिष्टं कारणं इन्द्रियार्थसन्निकर्षः स एव अत्रोच्यते न तु ज्ञानमात्रसामान्यस्य। आत्ममनःसंयोगादीनामनुमानादिज्ञानसाधारणतया च

6. न्या. भू. पृ. सं 11
7. न्या. भूष. पृ. सं. 43
8. न्या. भूष. पृ. सं. 46

नानुमानादिस्थले अनुमेयादौ इन्द्रियसंयोगः सम्भवति, अपि च प्रत्यक्षमात्रे इन्द्रियसंयोगस्य कारणत्वमवश्यम्भवतीति प्रत्यक्षमात्रावच्छिन्नं प्रति इन्द्रियार्थसन्निकर्षस्य विशिष्टकारणत्वं सुवचम्। न्यायशास्त्रे चत्वारि प्रमाणानि स्वीकृतानि। यथोक्तं न्यायसूत्रे–''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'' (न्यायसूत्रम् 1/1/3) तत्र 'साक्षात्कारिप्रमाणं प्रत्यक्षमित्यभिधीयते। तद्विग्रहस्तु अक्षमक्षं प्रति इति प्रत्यक्षम्। अक्षशब्दोऽत्र ज्ञानेन्द्रियपरः। अतः तत्तज्ज्ञानेन्द्रियं प्रति नियतं तत्तत् प्रत्यक्षं भवति। ततश्च चाक्षुषत्वादिभेदेन अनेकविधम्। साक्षात्कारश्च इन्द्रियार्थसंयोगः। तत एव प्रमोत्पद्यते। ततश्च पदार्थः प्रमीयते इति। प्रत्यक्षमपि द्विविधं भवति। एकं सविकल्पकम्, अपरं निर्विकल्पकमिति। तस्याः साक्षात्कारिण्याः प्रमायाः करणं त्रिविधं भवति। कदाचिदिन्द्रियम् कदाचिदिन्द्रियार्थसम्बन्धः कदाचिच्च ज्ञानम्।

अत्रोक्ते भेदत्रये यदा निर्विकल्पकं ज्ञानं फलं तदेन्द्रियमेव केवलं करणं भवति। ज्ञानस्यायमस्ति नियमः। प्रत्यक्षेच्छया प्रथममात्मा मनसा युज्यते, मनस्तदिन्द्रियेण, इन्द्रियं च पदार्थेन, ततश्च प्रथमं निर्विकल्पकं ज्ञानं जन्यते। तच्चेदं किञ्चिदित्याकारकं नामजात्यादियोजनारहितं भवति। तस्य निर्विकल्पकस्य ज्ञानस्येन्द्रियमेव करणं भवति।

पूर्वमुक्तमादाविन्द्रियेण पदार्थग्रहे निर्विकल्पकम् अर्थात् विशेषणविशेष्याद्यनवगाहि इदं किञ्चिद् इत्याकारकमेव ज्ञानं जायते। तदा केवलमिन्द्रियमेव करणं भवति, इत्यपि प्रागुक्तम्। अनन्तरं च यदा विशिष्य ज्ञातुमुपक्रमते तदा इन्द्रियस्यार्थेन विशेषसम्बन्धे सति विशेषणविशेष्यादिरूपं यज्ज्ञानमुत्पद्यते 'अयं घटोऽयं पटः 'इत्याकारकम्, तदेन्द्रियार्थसन्निकर्षः करणं भवति इन्द्रियेणार्थसम्बन्धे पूर्वमुक्तं निर्विकल्पज्ञानमिन्द्रियव्यापाररूपतामावहति, तच्च सविकल्पकज्ञानस्य अवान्तरव्यापाररूपम्। अर्थादाभ्यन्तरव्यापाररूपमस्ति, सविकल्पकज्ञानं तस्य फलं भवति।

इन्द्रियमिन्द्रियार्थसन्निकर्षश्च करणमुक्तम्। ज्ञानस्यार्थाद् निर्विकल्पकज्ञानस्य करणत्वमुच्यते। तथा हि इन्द्रियार्थसन्निकर्षजन्यपदार्थबोधे तात्त्विकविचार उत्पद्यते। अर्थाद् इन्द्रियगोचरे पदार्थे किं वास्तविकं

किमवास्तविकमिति। यद्वास्तविकं तदेवात्र ग्राह्यम्। यच्चावास्तविकं तदुपेक्षणीयं त्याज्यं वेत्यादिरूपेण पूर्वज्ञातपदार्थेन हानोपादानादिबुद्धयो जायन्ते, तदा ज्ञानमेव करणं भवति। तत्र च सविकल्पकज्ञानमवान्तरव्यापारो भवति। सविकल्पकज्ञानस्य च फलं तदा हानादिबुद्धय एव भवन्ति।

अवान्तरव्यापारस्य लक्षणम् ''तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः' इति। यथा कुठारदारुसंयोगः कुठारजन्यो भवति। अर्थात् कुठारः प्रथमं दारुणा सह संयुनक्ति ततश्च छिदा जायते अर्थात् दारुभेदनं भवति। यच्च कुठारदारुसंयोगस्य फलम्। तस्मिन् फले प्राथमिककुठारदारु संयोगादिरवान्तरव्यापारो भवति। स चावान्तरव्यापारजन्यः (कुठारजन्यः) तेन जन्या या छिदा तस्या जनको भवति।

अस्मिन्विषये मतभेदोऽप्याचार्याणां दृश्यते, यथा तर्कभाषाया अस्मिन् वाक्ये लक्ष्यते ''सविकल्पकादीनामपीन्द्रियमेव करणम्। अथ च-''यावन्ति त्वान्तरालिकानि सन्निकर्षादीनि तानि सर्वाणि, अवान्तरव्यापार इति''। अर्थात् वस्तुसाक्षात्काराय प्रसृतमिन्द्रियं यावत्पूर्ववस्तु साक्षात्कारं यद्यदनुभवति यद्यत्करोति, यद्यद्ज्ञानमुपपादयति तत्तत्सर्वमेवावान्तरव्यापारपदेन व्यपदेष्टुं शक्यते इति। अत एतेन सिद्ध्यति यत् प्रत्यक्षविषये द्विविधं मतं प्रचलितमासीत्। आद्यं प्रत्यक्षं त्रिविधकारणान्वितम्। द्वितीयम् एकविधमेव। संक्षेपेण त्रिविधकरणव्यापारादीनां वक्ष्यमाणं स्वरूपम्–

करणम्	**अवान्तव्यापारः**	**फलम्**
(क) इन्द्रियम्	इन्द्रियार्थसन्निकर्षः	निर्विकल्पकप्रमा
(ख) इन्द्रियार्थसन्निकर्षः	निर्विकल्पकज्ञानम्	सविकल्पकप्रमा
(ग) निर्विकल्पकज्ञानम्	सविकल्पकज्ञानम्	हानोपादानोपेक्षाबुद्धिः

तात्पर्यटीकाभितप्रत्यक्षप्रमाणविमर्शः

डॉ. महानन्दझा

सुविदितमेवेदं तत्र भवताम्, यदिदं भारतवर्षं सुचिरात् प्रशस्तमायतनं विविधविद्यानाम्। यासां किल–

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चर्तुदश॥

तत्र न्यायविस्तरपदेन गोतमीयन्यायवैशेषिकन्यायादिवैदिकतन्त्राण्येव गृहीतानि भवन्ति। तत्र वेदसाहचर्येण वैदिकानामेव तन्त्राणां परिग्रहस्य सर्वथौचित्यात्। ताः सर्वा अपि विद्याः वेदमनुवर्तमानाः साक्षात् परम्परया वा परमपुरुषार्थं मोक्षमेव समुपलक्ष्य प्रवर्तन्त। गौतमीयन्यायदर्शने प्रमाणादि-षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति महता संरम्भेण महर्षिणा उपपादितम्। तच्च प्रमाणं तत्तद्दार्शनिकाभिमतमेकमनेकं वेति भिन्ना वार्ता। तत्र प्रत्यक्षप्रमाणं पुरस्कृत्य किञ्चिद् वच्मि।

सर्वप्रमाणोपजीव्यत्वात् सर्वसिद्धान्तसम्मतत्वाच्च प्रत्यक्षप्रमाण-मङ्गीकृतं सर्वैरपि दार्शनिकैः। आस्तिकनास्तिकोभयसम्मतं च प्रत्यक्षप्रमाणम्। तत्र चार्वाकोऽपि व्यतिरिक्तान् प्रमाभेदानस्वीकृत्य सर्ववादिप्रतिवादिनां मध्ये मतैक्यमादधाति, तस्य प्रत्यक्षैकप्रस्तावत्वात्। प्रत्यक्षमेकं हि चार्वाकमिति तस्याभिमतमुपस्थापयन्ति दार्शनिकाः। बौद्धदर्शने कल्पनापोढमभ्रान्तं प्रत्यक्षमिति स्वीक्रियते।[4] आर्हताः प्रत्यक्षपरोक्षभेदेन प्रत्यक्षमपरोक्षकोटौ संस्थाप्य विशदः प्रत्यक्षमिति[5] तल्लक्षयन्ति। सांख्यदर्शने प्रतिविषयाध्यवसायो दृष्टमिति

1. स्मृतिः
2. न्यायसूत्रम् 1.1.1।
3. सर्वदर्शनसंग्रहः।
4. न्यायबिन्दुः पृ. 8
5. प्रमाणमीमांसा पृ. 24।

तल्लक्षणम्[6], इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषत्वधारणप्रधाना वृत्तिः प्रत्यक्षमिति योगभाष्यकर्तुर्मतम्।[7] इन्द्रियसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि-व्यवसायात्मकं प्रत्यक्षम् इति नैयायिकानामभिमतम्। परवर्तिनैयायिकाः वैशेषिकाश्च ईश्वरजीवप्रत्यक्षसाधारणं तथा अनुमानादिषु चातिव्याप्तिवारणाय ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति[8] प्रत्यक्षलक्षणं प्राहुः अनुमित्यादिषु ज्ञानाकरणकज्ञानविरहात्।

साक्षात्प्रतीतिः प्रत्यक्षमिति प्राभाकरमीमांसकानां मतम्[9]। पार्थसारथिमिश्रस्तु प्रत्यक्षमिन्द्रियसम्प्रयोगजन्यत्वेनैव स्वीकरोति[10]। कुमारिलमतमनुसृत्य मानमेयोदये इन्द्रियसन्निकर्षजं प्रत्यक्षं ग्रन्थकारो मन्यते।[11] वैयाकरणानां मतेऽपि अपरोक्षे च इत्यादिना प्रत्यक्षं सूत्रितम्।[12] अद्वैतवेदान्तिनां यत्साक्षादपरोक्षाद् ब्रह्म इति श्रुतेः चैतन्यमेव प्रत्यक्षप्रमा[13] विशिष्टाद्वैतिनः साक्षात्प्रतीतिरेव प्रत्यक्षप्रमाणमितिवदन्ति।[14] लक्षणभेदेऽपि सर्वतन्त्रसम्मतं हि प्रत्यक्षप्रमाणम्।

''इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेशमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति हि न्यायसम्मतं प्रत्यक्षलक्षणम्।[15] अत्र प्रस्तूयते आचार्यवाचस्पति मिश्रविरचितं टीकाभिमतं व्याख्यानम् (सन्निकर्षः संयोगसमवायादिभेदेन षड्विधः)। अत्र सूत्रस्य एकदेशः ज्ञानपदम्, तज्ज्ञानपदं किमर्थमिति वार्तिककाराणां श्रीमतामुद्योतकराणां प्रश्नः तत्रैव समाधानवाक्यमपि सुखादिव्युदासार्थमिति प्रोक्तम् यतोऽहि इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि

6. सांख्यतत्त्वकौमुदी क्षरिक्ष 5, पृ. 102।
7. योगदर्शनम् तत्त्ववैशारदी व्यासभाष्य 1.1.7।
8. न्यायसिद्धान्तमुक्तावली पृ. 2.7
9. प्रकरणपञ्चिका पृ 146
10. शास्त्रदीपिका पृ. 54
11. मानमेयोदयः पृ. 11।
12. पाणिनिसूत्रम् 3.2.119।
13. वैदान्तपरिभाषा पृ. 20।
14. न्यायपरिशुद्धिः पृ. 68
15. न्यायसूत्रम् 1.1.4।

भवतः तद्व्युदासार्थमाह ज्ञानमिति। अत्र टीकाकाराः तदेव हि लक्षणवाक्यमुच्यते यस्य लक्ष्यानपेक्षोऽतिव्याप्त्यव्याप्तिव्युदासो लक्षणपदेभ्य एव प्रतीयते। सुखादीनां विज्ञानाभिन्नहेतुजत्वेन विज्ञानत्वादशक्यं व्यावर्तनमिति चेन्न अभिन्नहेतुजत्वासिद्धेः। ''नखलु या चन्दनस्पर्शज्ञानस्योत्पत्तौ सामग्री सैव सुखस्यापि। अस्ति हि चन्दनेन्द्रिसंयोगात् शीतस्पर्शज्ञानं तद्वदेव अस्य सुखमपि भवेत्। अवान्तरसामग्रीभेदेपीन्द्रियार्थमनस्कारजत्वात् ज्ञानजातीयत्वमिति चेत् न; किञ्चित् कारणाभेदेऽपि कार्यभेदस्याकस्मिकत्वोप- पत्तेः। तदर्थत्वाच्च कारणभेदानुसरणप्रयासः। न च उपादानाभेदादभेद इति युक्तम्, भिन्नानामपि ज्ञानानामेकसमनन्तरप्रत्ययोपादानत्वस्य अभ्युपगतत्वात् अपि च उपादानाभेदश्च कुतश्चित् कारणभेदात् कार्यभेदः इत्यत्र को विरोधः? अत एव उपादानस्य पिठरस्य अभेदे पूर्वरूपादिप्रध्वंसानां कारणानां भेदात् भिन्नजातीया जायन्ते गन्धरूपरसस्पर्शाः इत्यस्माकं सिद्धान्तः। तस्मादर्थप्रवणेभ्यो ज्ञानेभ्यः तदप्रवणतया भिन्नजातीयाः सुखादयो यथास्वमनुकूलवेदनीयत्वादिभिर्लक्षणैः मानसप्रत्यक्षवेदनीयाः।

एवञ्च असत्यपीन्द्रियार्थसन्निकर्षे ज्ञानमात्रादेव सुखदुःखयोः स्वप्नान्तिके दर्शनात् यत्रापीन्द्रियार्थसन्निकर्षस्तत्रापि ज्ञानमस्तीति तदेव सुखदुःखयोः कारणम्। इन्द्रियार्थसन्निकर्षस्य तु ज्ञानमात्रोपयोगादन्यथा-सिद्धौ भावाभावौ इति तदयुक्तम्, स्वप्नान्तिके सुखदुःखोत्पादस्यासिद्धेः तज्ज्ञानस्य अर्थज्ञानस्येव मिथ्यात्वात्। तस्मात् इन्द्रियार्थसन्निकर्षोऽपि सुखदुःखोत्पादहेतुः स्वीकर्तव्यः। स च सत्यप्यर्थसाक्षात्कारे नास्ति सिद्धानामिति न तेषां सुखदुःखोत्पादः। अपि च चरमभाविकारणं गृहीत्वा पूर्वभाविनामकारणत्वापादने तन्तूनामपि पटं प्रत्यकारणत्वप्रसङ्गः। संयोगभेदादेव तादृशपटोत्पत्तेः तन्तूनां च संयोगभेद एवोपयोगात्। तत्सहितस्य तु तत्कारणत्वं सन्निकर्षस्याप्यालोचनसहितस्येति समानम्। यथाहुराचार्याः प्रशस्तपादभाष्ये स्रगाद्यप्रेतविषयसान्निध्ये सतीष्टोपलब्धि इन्द्रियार्थसन्निकर्षधर्माधर्माद्य-पेक्षादात्ममनसोः संयोगात् यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत्सुखम् इति। तस्मात् साधूक्तं सुखादिनिवृत्त्यर्थं ज्ञानग्रहणमिति।

इदानीं प्रत्यक्षे प्रयोजकं किमिति जिज्ञासायाम् इन्द्रियमेव प्रत्यक्षे प्रयोजकमिति न्यायसिद्धान्तः, तस्य प्राप्यकारित्वनियमात्। प्रत्यक्षप्रमास्थले

आत्मा मनसा युज्यते, मनः इन्द्रियेण इन्द्रियं विषयेण एतावता प्रत्यक्षोत्पत्तिः[16]। आत्ममनसः सन्निकर्षस्तु असाधारणं कारणम्। न्यायभाष्यकारेणापि मन इन्द्रियार्थसन्निकर्षः विशिष्टकारणत्वेन गृहीतम्[17]। मनः सम्बन्धापेक्षा तु सर्वप्रमासाधारणम् इन्द्रियमनःसंयोगस्तु प्रत्यक्षमात्रं प्रति असाधारणम् किन्तु, इन्द्रियार्थसन्निकर्षस्तु असाधारणरूपेण प्रत्यक्षप्रमायामेव सम्भवति।

ईश्वरप्रत्यक्षे लक्षणसंगतिं विधातुं ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति ईश्वरप्रमासाधारणलक्षणं नैयायिकाः वैशेषिकाश्च मन्यन्ते। नैयायिकमते चक्षुरादीन्द्रियाणि शरीरसंयुक्तानि न तु तदवयवानि। तेषां मते इन्द्रियाणि षडेव। तत्र चक्षुस्तेजोरूपम्, श्रोत्रमाकाशरूपम्, घ्राणेन्द्रियं पार्थिवम्, रसनेन्द्रियं जलरूपम्, त्वगिन्द्रियं स्पर्शरूपं चेति मन्यन्ते। तत्र चक्षुषैव रूपज्ञानम् स्पर्शेनैव स्पर्शज्ञानम्, घ्राणेनैव गन्धज्ञानम्, रसनेनैव रसज्ञानम् मनसैव सुखादिज्ञानमिति न्यायाचार्यभासर्वज्ञस्यापि सम्मतिः[18] अत्रोपस्थातुं शक्यते। तथा च चक्षुस्थितं मध्यकृष्णश्वेतपिण्डात्मकं न नेत्रेन्द्रियम् अपितु तस्मादेव निर्गत्य विषयदेशसन्निकृष्टरश्मय एव हि तत् चक्षुषस्तत्रैव प्राप्यकारित्व नियमात्। दूरस्थितान् विषयानपि वेगातिशयादेव रश्मयो व्याप्नुवन्ति तदैव प्रत्यक्षं भवति।[19]

न्यायमञ्जरीकारः श्रीजयन्तभट्टः सर्वेन्द्रियाणां प्राप्यकारित्वं समर्थितवान् तथैव न्यायमतेऽपि। महषिगौतमेनापि दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः[20] इत्यस्मिन् सूत्रे प्राप्यकारित्वं स्पष्टमुक्तम्। भाष्यकारेणापि प्रमाणस्य तत्त्वविषयादितिग्रन्थे "व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातः, व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति भाष्ये चक्षुषः प्राप्यकारित्वं निःसन्देहं मतम्[21]। वैशेषिकदर्शनेऽपि इन्द्रियाणां प्राप्यकारित्वं साधितम्। चक्षुरिन्द्रियस्यैव अर्थदेशगमनम्, अन्येन्द्रियाणां

16. तर्कसंग्रहदीपिका पृ. 119।
17. न्यायभाष्यम् पृ 27
18. न्यायभाष्यम् पृ. 12
19. न्यायभाष्यम् पृ 14।
20. मानमेयोदयः पृ. 14
21. न्यायभाष्यम् पृ. 51

तु स्वदेश एव विषयग्रहणसामर्थ्यम्। तत्र घ्राणस्य स्वदेशस्थस्यैव भवति सन्निकर्षः, रसनेन्द्रिये रसस्य भवति सन्निकर्षः, स्पर्शनमपि त्वगिन्द्रिय-देशप्राप्यम्। श्रावणप्रत्यक्षे कदम्बमुकुलन्यायेन, वीचीतरङ्गन्यायेन वा शब्दधारा जायते इति श्रावण प्रत्यक्षप्रकारः[22]। सुखदुःखादिप्रत्यक्षे तु आत्मनः सन्निकर्ष एव, मनसापि इन्द्रियत्वात् प्रत्यक्षज्ञानं जायते। लौकिकालौकिकभेदेन सन्निकर्षः द्विविधः। तत्र संयोगसंयुक्तसमवायादिभेदेन लौकिकसन्निकर्षः षड्विधः न्यायशास्त्रे प्रसिद्धः[23]। सामान्यलक्षणज्ञानलक्षणयोगजभदेन अलौकिकसन्निकर्षः त्रिविधः[24]। पुनरपि सर्वे सविकल्पकनिर्विकल्पभेदेन अन्तर्भूता इति मन्यन्ते। इन्द्रियार्थसन्निकर्षातिरिक्तमपि आलोकमुद्भूतरूपत्वञ्च प्रत्यक्षे कारणम्।

प्रत्यक्षोत्पत्तौ कः क्रमः इति जिज्ञासायां श्रीजयन्तभट्टः चतुष्टयत्रयद्वय-सन्निकर्षानभिवदति। तत्र बाह्ये रूपादिप्रत्यक्षे प्रथमक्षणे आत्ममनः सन्निकर्ष ततः मनः इन्द्रियसन्निकर्षः ततश्च इन्द्रियार्थसन्निकर्षः चतुर्थक्षणे ज्ञानोत्पत्तिः। सुखादिप्रत्यक्षे त्रिसन्निकर्षापेक्षा, तत्र चक्षुरादिव्यापाराभावात्। आत्मनि तु योगिनो द्वयोरात्ममनसोरेव संयोगाज्ज्ञानमुपजायते।[25]

नैयायिकानां मते मनः परमाणुरूपं नित्यद्रव्यञ्चाभितम्। तस्मादेव अस्मिन् मते प्रत्यक्षात्मिकावृत्तिर्परिणामो वा नाङ्गीक्रियते। मनसो विषयाकार-परिणामाभावात्[26] एवमेव बुद्धिपरिणामोऽपि नाभिमन्यते तस्य ज्ञानरूपगुणत्वात्।[27] न्यायमते इन्द्रियं हि प्रत्यक्षाय असाधारणं कारणं तस्मादेव इन्द्रियषट्कजन्यं ज्ञानं प्रत्यक्षं, तत्करणमिन्द्रियं तस्मादिन्द्रियमेव प्रत्यक्षप्रमाणमिति सिद्धम्।[28]

---

22. न्यायकन्दली पृ. 23।
23. संग्रहदीपिका पृ. 119।
24. तर्कभाषा पृ. 73
25. कारिकावली कारिका सं 63।
26. न्यायमञ्जरी पृ. 70।
27. तर्कसंग्रहः प्रत्यक्षखण्डः।

न्यायसिद्धान्तमुक्तावलीसम्मतप्रत्यक्षप्रमाणविमर्शः

डॉ. रामचन्द्रशर्मा

प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इति सिद्धान्तः[1]। तत्र प्रमाणाधीना सर्वेषां व्यवस्थितिः[2]। अतः प्रमाणतत्त्वं विशेषतो विज्ञेयमेव। तत्र ''प्रमाकरणं प्रमाणम्''–इति प्रमाणसामान्यलक्षणम्। प्रमा चात्र यथार्थज्ञानमेव। यथोक्तम्–

भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्, तत्प्रमा।।[4] इति

न च स्मृतेरपि भ्रमभिन्नज्ञानत्वेन तत्करणस्यापि प्रमाणत्वं स्यादिति चेन्न, यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षित्वात्। अत एव आचार्येण यथार्थानुभवस्यैव प्रमात्वं विज्ञापितम्। तद्यथा–

यथार्थानुभवो मानमनपेक्षतयेष्यते[5]। इति

यद्यपि यथार्थानुभवजन्यस्मृतेरपि सफलप्रवृत्तिजनकत्वेन अर्थवत्त्वं विद्यते तथापि तस्याः जनकानुभवसमानविषकतया तत्प्रामाण्याधीन–प्रामाण्यकतया सापेक्षत्वात् तत्र न प्रमात्वव्यवहारस्तान्त्रिकाणामिति बोध्यम्।[6]

स च यथार्थानुभवश्चतुर्विधः। तद्यथा–

स्यादनुभूतिश्चतुर्विधा। प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।[7] इति

---

1. न्यायसूत्रम् 1/1/1
2. प्रामाण्यवादः प्रारभ पृ. 7
3. न्यायभाष्यम् पृ. 3
4. कारिकावली का. 134-35
5. न्याकुसुमाञ्जलिः 4/1
6. न्या.कु. हरिदासी पृ. 156
7. कारिकावली 51-52

तत्करणान्यपि चत्वारि–''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[8] इति गौतमसूत्रोक्तानि वेदितव्यानि। करणञ्च व्यापारवदसाधारणं कारणम्। इत्थञ्च सन्निकर्षादिव्यापारमाध्यमेन प्रत्यक्षादीनां प्रमाकरणत्वं बोध्यम्। एष्वपि प्रत्यक्षस्य सर्वोपजीव्यत्वात्प्राधान्यमिति तस्य स्वरूपं विशेषेण विज्ञेयम्।

तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्। इन्द्रियार्थसन्निकर्षजं ज्ञानं प्रत्यक्षम्। ईश्वरप्रत्यक्षन्तु न लक्ष्यम्।'' इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्य-मव्यभिचारि व्यवसायात्मकं प्रत्यक्षमि[9]तिगौतमसूत्रे तथैवोक्तत्वात्। अथवा ''ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्[10] इति प्रत्यक्षलक्षणमङ्गीकरणीयम्। ज्ञानं नास्ति करणं यत्र तज्ज्ञानाकरणकं, तादृशं ज्ञानं प्रत्यक्षमिति तात्पर्यम्। अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य करणत्वात्तेषु नातिप्रसङ्गः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्, तस्य नित्यत्वेनाकरणकत्वात्तत्संग्रहः। अस्मत्प्रत्यक्षे च व्याप्तिज्ञानादीनामकरणत्वात्तत्र लक्षणसमन्वयः। जन्यप्रत्यक्षस्य व्यापारवदसाधारणकारणानि घ्राण-रसन-चक्षुस्त्वक्-श्रोत्र-मनोरूपाणि इन्द्रियाणि इति तान्येव प्रत्यक्षप्रमाणत्वेनाङ्गीकरणीयानि। तच्च प्रत्यक्षं पूर्वोक्तषड्विधेन्द्रियजन्यत्वात् षड्विधम्। तद्यथोक्तम्–

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।[12] इति

तथा च–''घ्राणजं, रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसञ्चेति षड्विधं प्रत्यक्षं वेदितव्यम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वमिति वाच्यम्। जन्यप्रत्यक्षस्यैव विभजनात् पूर्वाक्तसूत्रानुसारात्। अत्र तत्तदिन्द्रियाणां विषयं ग्राहयन्नाह ग्रन्थकारः–

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः।।

---

8. न्यायसूत्रम् 1/1/3
9. न्यायसूत्रम् 1/1/4
10. न्यासिद्धान्तमुक्तावली पृ. 183
11. कारिकावली 51
12. कारिकावली53.56

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम्।

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः।।

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्।। द्रव्याध्यक्षे[13]

तथा च गन्धत्वादिसहिताः गन्धादयो गुणा उद्भूताः तत्तदिन्द्रियग्राह्याः। उद्भूतत्वञ्च प्रत्यक्षप्रयोजकसन्निकर्षयोग्यत्वम्। एवमुद्भूतरूपं रूपत्वादिसहितं, उद्भूतरूपवन्ति द्रव्याणि, एवं प्रत्यक्षविषयेऽधिकरणे विद्यमानाः पृथक्त्वादयः, तादृशः समवायः एतान् सर्वान् चक्षुः आलोकसंयोगोद्भूतरूपसम्बन्धाद् गृह्णाति। तथा चालोकसंयोग उद्भूतरूपञ्च चाक्षुषप्रत्यक्षे कारणमिति बोध्यम्। तत्र द्रव्यचाक्षुषं प्रति तयोः "समवायसम्बन्धेन" द्रव्यसमवेतरूपादिप्रत्यक्षे ''स्वाश्रयसमवायसम्बन्धेन", द्रव्यसमवेतसमवेतरूपत्वादिप्रत्यक्षे "स्वाश्रयसमवेतसमवायसम्बन्धेन" च कारणत्वं बोध्यम्। एवमेव उद्भूतस्पर्शवद्द्रव्यं, स्पर्शत्वादिसहितः तादृशस्पर्शः त्वचो ग्राह्यः। अत्रेदं बोध्यं यद् रूपभिन्नं रूपत्वादिभिन्नं यत् चक्षुषः प्रत्यक्षविषयं तत् त्वगिन्द्रियस्यापि ग्राह्यं भवति। तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणाः योग्यवृत्तयश्च क्रियाजातयस्ते त्वचोऽपि ग्राह्या भवन्ति। अत्र त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षेऽपि रूपं समवायेन कारणं भवति इति प्राचीनमतं, तन्मते वायुर्न प्रत्यक्षः किन्त्वनुमेय एव, तथा च पृथिव्यप्तेजांसि त्रीण्येव प्रत्यक्षविषयाणि। तथा बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति मन्तव्यम्। नवीनास्तु बिहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे न रूपं न वा स्पर्शः कारणं प्रमाणाभावात्, किन्तु चाक्षुषप्रत्यक्षे रूपं, स्पार्शनप्रत्यक्षे स्पर्शः कारणम्, अन्वयव्यतिरेकात्। बहिरिन्द्रजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत्, न किञ्चित्! अत्र शंका समुदेति यत्-कार्याभावे कारणाभावस्य प्रयोजकतया गगनादौ बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभावस्पर्शाभावयोः प्रयोजकत्वकल्पने गौरवात् तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा तदवच्छिन्नाभावत्वेनैव

13. न्यायसिद्धान्तमु. 190

तादृशप्रत्यक्षाभावे प्रयोजकत्वमङ्गीकरणीयमिति। अत्र ग्रन्थकारेण समाहितं यत्–''आत्माऽवृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु[15] इति। अस्येदन्तात्पर्यं यत्–आत्मन्यवृत्तयः शब्दभिन्ना ये रूपादयो विशेषगुणाः तद्वत्त्वं बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे प्रयोजकत्वेनाङ्गीकरणीयम्। तद्वत्त्वस्य पृथिव्यादिचतुर्षु सत्त्वात् तेषां प्रत्यक्षं समुपपन्नम्, गगनादौ चाभावान्न तत्प्रत्यक्षमिति। रूपस्य कारणत्वे लाघवामिति चेन्न, वायोस्त्वगिन्द्रियेणाग्रहण–प्रसङ्गात्। अत्रेष्टापत्तिरेव, वायोर्न प्रत्यक्षत्वमपित्वनुमेयत्वमेवेत्यत्र ग्रन्थकारेण प्रतिबन्द्युत्तरेण समाहितं यत्–उद्भूतस्पर्श एव लाघवात् कारणमस्तु, प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किन्न स्यात्! तस्मात् ''प्रभां पश्यामि'' इतिवत् वायुं स्पृशामि'' इति प्रत्ययस्य सम्भवाद् वायोरपि प्रत्यक्षं सम्भवत्येव[15]। अतः बहिरिन्द्रियजन्यद्रव्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम्। वायु–प्रभयोरेकत्वं गृह्यत एव। तथा च ''अयमेकः पौरस्त्यो वायुः'' ''इयमेका सौरी प्रभा''– इत्यादिप्रत्ययेन तद्गतसंख्याप्रत्यक्षे प्रभाचाक्षुषवत् वायोरपि त्वाचप्रत्यक्षं सम्भवत्येव। अत्रेदं विशेषेण बोध्यं यत्–त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणम्। तद्यथोक्तम्–

'त्वचो योगो मनसा ज्ञानकारणम्।[16]

अत्र किम्प्रमाणमिति जिज्ञायामुक्तम्–

''सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननम्''[18] इति। अत्रेदं बोध्यम् गाढनिद्रानाड्यवच्छिन्नात्ममनोयोगो सुषुप्तिः, गाढनिद्रानाडी पुरीतत्। अत्रश्रुतिः–''**हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततम- भिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेत्य** (बृहदारण्यक॰ 5/1/21) इति। तथा च कारणाभावो कार्याभावप्रयोजकः, ज्ञानाभावं प्रति त्वङ्मनः संयोगाभावस्य प्रयोजकत्वे युक्तितः सिद्धे सति ज्ञानसामान्यं प्रति त्वङ्मनोयोगस्य प्रति कारणत्वं सिद्धम्। यदि त्वङ्मनोयोगो

14. तत्रैव
15. कारिकावली का 57
16. न्या. सि. मु. पृ 181
17. कारिकावली का. 57
18. कारिकावली का 50/4

ज्ञानत्वावच्छिन्नं प्रति कारणं न भवेत् तदा सुषुप्त्यवस्थायामपि ज्ञानं भवेत्, न तु तदा किमपि ज्ञानं भवति तस्मात् सुषुप्तौ ज्ञानानुत्पत्तिरेव त्वङ्मनोयोगस्य ज्ञानसमान्यकारणत्वे प्रमाणमिति भावः। न च ज्ञानसामान्यकारणसामग्यभावादेव सुषुप्तौ न किमपि ज्ञानम्, न तु त्वङ्मनोयोगाभावादिति वाच्यम्, सुषुप्तिप्राक्कालोत्पन्नस्य ''अहं सुखी'' इत्यादिज्ञानस्य विशेषगुणस्य विशेषणतया आत्मनः प्रत्यक्षे कारणीभूतस्य सुषुप्तिप्रथमक्षणे वर्तमानस्य बलाद् आत्मनः प्रत्यक्षापत्तिः स्यात्! त्वङ्मनोयोगस्य ज्ञानसामान्यकारणत्वे तु स्वप्नान्तिमक्षणपर्यन्तमात्रस्थायिनस्तस्य सुषुप्तिप्रथमक्षणे नाशात् सामान्यकरणाभावान्नात्मविषयकप्रत्यक्षापत्तिरिति बोध्यम्। अत्र शंका सञ्जायते यत् त्वङ्मनःसंयोगस्य यदि ज्ञानमात्रे कारणत्वं तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात् विषयत्वक्संयोगस्य त्वङ्मनसंयोगस्य च सत्त्वात्, परस्परप्रतिबन्धादेकमपि न स्यादिति। अत्र कैश्चित्समाधीयते यत् पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसाम्ग्र्याः स्पार्शनादिप्रतिबन्धकत्वम् अनुभवानुरोधात्कल्प्यते इति। मनोमात्रजन्यमानसप्रत्यक्षस्थले तद्विषयं दर्शयन्नाह ग्रन्थकारः–

'मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः[23]। इति

आत्मा ''मनोमात्रस्य गोचरः''[22] सुखादिविशेषगुणसम्बन्धात्तस्य प्रत्यक्षत्वम्, सुखादीनाञ्च। इत्थं षड्विधेऽपि प्रत्यक्षे भावविषायाणां स्वरूपस्थितिर्बोध्या। अभावोऽपि विशेषणताविशेषसम्बन्धेन प्रत्यक्षविषय एवेति बोध्यम्।

तच्च प्रत्यक्षं सविकल्पक-निर्विकल्पकभेदेन द्विविधम्। तत्र सप्रकारकं ज्ञानं सविकल्पकं यथा घटोऽयं ''पटोऽयम्'' इत्यादि घटत्वपटत्व-प्रकारतावगाहिज्ञानं, तच्च व्यवसायात्मकम् अनुव्यवसायेन'' घटमहञ्जानामि'' इत्याकारकेण गृह्यते। ''निष्प्रकारकं ज्ञानं निर्विकल्पकं ''यथा'' किञ्चिदिदम्''

---

19. कारिकावली का 58
20. तत्रैव
21. न्या. सि. मु. प्रत्यक्षखण्डः
22. तत्रैव पृ. 197

इति। तच्च सविकल्पककारणं, तथाहि चक्षुसंयोगाद्यनन्तरं ''घट'' इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतः घटघटत्वयो-र्वैशिष्ट्यानवगाह्येव ज्ञानं जायते, तच्च न प्रत्यक्षं, तथा हि वैशिष्ट्यानवगाहि ज्ञानस्य प्रत्यक्षं न भवति, ''घटमहं जानामि'' इति ज्ञानप्रत्यक्षस्य स्वरूपाव-गाहनात्। तत्रात्मनि समवायेन ज्ञानं प्रकारीभूय भासते, ज्ञाने विषयितया घटः, घटे समवायेन घटत्वं, यः प्रकारः स एव विशेषणमित्युच्यते, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विकल्पके च घटत्वादिकं न प्रकारः तेन घटत्वादिविशिष्ट-घटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति। घटत्वाद्य-प्रकारकञ्च घटादिविशिष्टज्ञानं न सम्भवति, जात्यखण्डोपाध्यति-रिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्। अत एवोक्तम्–

''ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।''।[3] इति

षड्विधेऽपि प्रत्यक्षे महत्त्वं कारणमस्ति। यथोक्तम्–''महत्त्वं षड्विधे हेतुः'' इति। तच्च महत्परिमाणमेव, तस्य च द्रव्यप्रत्यक्षे "समवायेन" द्रव्यसमवेतगुणकर्मसामान्यप्रत्यक्षे ''स्वाश्रयसमवायेन,'' द्रव्यसमवेतसमवेत गुणत्वकर्मत्वादीनां प्रत्यक्षे 'स्वाश्रयसमवेतसमवायेन कारणत्वं बोध्यम्।

षड्विधेऽपि प्रत्यक्षे इन्द्रियं कारणमिति पूर्वोक्तम्। इन्द्रियत्वं तु न जातिः, पृथिवीत्वादिना साङ्कर्यात्। ''परस्परात्यन्ताभावसमानाधिकरणयो-र्धर्मयोरेकत्रसमावेशः साङ्कर्यम्'', तच्चजातिबाधकम्। यथोक्तम्–

''व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।[1]
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥ इति

तथा च–''इन्द्रियत्वं'' विहाय ''पृथिवीत्वं'' घटादौ ''पृथिवीत्वं विहाय ''इन्द्रियत्वं'' जलीयादीन्द्रिये उभयोरेकत्रसमावेशः पार्थिवघ्राणेन्द्रिये। अत इन्द्रियत्वस्य जातित्वमङ्गीकृत्य तल्लक्षणं न सम्भवति। तर्हि किन्नामेन्द्रियत्वमित्यत्रोक्तम्–

---

23. कारिकावली का. 59-62
24. कारिकावली का 63-65, 66

"शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वम्।[2] शब्देतरोद्भूतविशेषगुणा ये रूपादयः तदनाश्रयत्वं चक्षुरादीन्द्रियेष्वस्ति, एवं ज्ञानकारणमनःसंयोगाश्रयत्वमप्यस्ति इति लक्षणसमन्वयो ज्ञेयः। कारणत्वञ्च "व्यापारवदसाधारणकारणत्वम्।" तत्र को व्यापारः इति चेत्, सन्निकर्ष एव, स च षड्विधः। तद्यथा–

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः॥
द्रव्येषु समवेतानां तथा तत्समवायतः।
तत्रापि समवेतानां शब्दस्य समवायतः॥

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।
विशेषणतया तद्वदभावानां ग्रहो भवेत्॥

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते।
प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥[3]

तथा च द्रव्यप्रत्यक्षम् इन्द्रियसंयोगजन्यम्। द्रव्यसमवेतगुणादि-प्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्। द्रव्यसमवेतसमवेतगुणत्वादिप्रत्यक्ष-मिन्द्रियसंयुक्तसमवेतसमवायजन्यमिति बोध्यम्। अत्रेयं शंका समुदेति यत्–द्रव्यप्रत्यक्षे यदि इन्द्रियसंयोगो हेतुस्तदा त्वक्प्रभासंयोगाच्चाक्षुषं स्यात्! इति, अतः ग्रन्थकारेण विशिष्यैव कार्यकारणभावो निरूपितः। तद्यथा–"वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणं, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्त-समवेतसमवायः कारणमिति। एवमन्यत्रापि विशिष्यैव कार्यकारणभावो बोध्यः।

अत्रेदं बोध्यं यत्–पृथिवीपरमाणुनीले नीलत्वं पृथिवीपरमाणौ "पृथिवीत्वं चक्षुषा कथन्न गृह्यते? तत्र परम्पराया स्वाश्रयसमवेतसमवेतत्व-समबन्धेन उद्भूतरूपसम्बन्धो विद्यते। तथाहि–नीले नीलत्वजातिरेकैव घटनीले परमाणुनीले च, तथा च महत्त्वसम्बन्धो घटनीलमादाय, एवमुद्भूतरूप-सम्बन्धस्तूभयमादाय वर्तते। एवमेव पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसम्बन्धो बोध्यः। इत्येवं सामग्र्यां सत्यां कार्येणावश्यं भाव्यम्, न च भवति। अतः "उद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसयुक्तसमवायस्य द्रव्यसमवेतचाक्षु-

षप्रत्यक्षे'', तादृशचक्षुःसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे'' कारणत्वं वाच्यम्। इत्थञ्च परमाणुनीले न नीलत्वादिचाक्षुषं, तत्र चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात्। एवमेव वायौ न सत्तादिचाक्षुषं तत्र सन्निकर्षस्य रूपावच्छिन्नत्वाभावादिति ध्येयम्।

एवमेव यत्र घटस्य पृष्ठावच्छेदेन आलोकसंयोगः चक्षुःसंयोगस्तु अग्रावच्छेदेन तत्र घटप्रत्यक्षाभावात् ''आलोकसंयोगावच्छिन्नत्वं'' चक्षुःसंयोगे विशेषणं देयम्। इत्थञ्च उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगादीनां तत्र-तत्र सन्निकर्षत्वं बोध्यम्। एवमन्यत्रापि। आत्ममानसप्रत्यक्षे मनःसंयोगः, आत्मसमवेतसुखादिमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतसुखत्वादिमानसप्रत्यक्षे मनःसंयुक्त-समवेतसमवायः सन्निकर्षो बोध्यः। अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसम्बद्धविशेषणता सन्निकर्षत्वेन ग्राह्या। तथाहि'' घटाभाववद्भूतलम्''-इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्। विशेषणतेत्युपलक्षणं ''भूतले घटाभावः'' इत्यत्र प्रतीतिवैलक्षण्येन प्रथमान्तार्थस्य मुख्यविशेष्यत्वात् चक्षुःसंयुक्तविशेष्यतापि सन्निकर्षत्वेन ग्राह्या। अत एव ''अभावप्रत्यक्षे विशेषणविशेष्यभावसन्निकर्षः इत्यपि व्याख्यानमस्ति। एवमेव'' इह तन्तुषु पटसमवायः इति प्रतीत्या चक्षुःसंयुक्तविशेषणतादिना समवायस्य प्रत्यक्षता बोध्या, वैशेषिके तु समवायो न प्रत्यक्षः किन्त्वनुमेय एव। सा च विशेषणता नानाविधा, तत्तत्सन्निकर्षग्राह्यतत्तत्पदार्थाधिकरणकाभावप्रत्यक्षे तत्तत्सन्निकर्षसंश्लिष्टविशेषणतायाः सन्निकर्षत्वं बोध्यम्। तथा च द्रव्याधिकरणकाभावप्रत्यक्षे संयुक्तविशेषणता, गुणाधिकारणकाभावप्रत्यक्षे संयुक्तसमवेतविशेषणता, गुणत्वाद्यधिकारणकाभावप्रत्यक्षे संयुक्तसमवेत-समवेतविशेषणता, अभावाधिकरणकाभावप्रत्यक्षे तादृशविशेषणविशेषणता सन्निकर्षत्वेन ग्राह्या।

अत्र अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथाहि भूतलादौ घटादिग्रहे जाते घटाभावादिग्रहो न जायते, तेन अभावोपलम्भे प्रतियोग्युप-लम्भाभावः कारणम्। तत्र योग्यतापि अपेक्षिता, साच-''प्रतियोगिसत्त्वप्रसञ्जन-प्रसञ्जितप्रतियोगिकत्वरूपा, तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या

प्रसञ्जित उपलम्भरूपप्रतियोगी यस्य स उपलम्भाभावः अभावप्रत्यक्षे हेतुः। इत्थञ्च यत्र आलोकसंयोगादिकमस्ति, तत्र ''यदि अत्र घटः स्यात् तर्हि उपलभ्येत, नोपलभ्यते अतो नास्ति" इत्यापादनपूर्वकं घटाभावादेः प्रत्यक्षं भवति। अन्धकारे तु नापादयितुं शक्यते, तेन न तत्राभावचाक्षुष-प्रत्यक्षं, स्पार्शनन्तु भवति, तथापादयितुं शक्यत्वात्। अत्रेदं बोध्यं यत्-संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अपेक्षिता, अन्योन्याभावप्रत्यक्षे तु अधिकरणयोग्यता, अतः स्तम्भादौ पिशाचादिभेदो चक्षुषा गृह्यत एव। इत्थं लोकानुभवसिद्धलौकिकसन्निकर्षैरिदं लौकिकप्रत्यक्षस्वरूपं बोध्यम्।

अलौकिकसन्निकर्षैरलौकिकप्रत्यक्षमपि जायते। अलौकिकसन्निकर्षश्च त्रिधा भवति। तद्यथा-

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥

आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते।
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः॥

अयं भावः-समानानां भावः सामान्यं, तदेव लक्षणं विषयः य स सामान्यलक्षणः सामान्यविषयकं ज्ञानं, तदेव प्रत्यासत्तित्वेन गृह्यते। तथाहि-''अयं घट'' इति एकघटप्रत्यक्षानन्तरम् इन्द्रियसम्बद्धविशेष्यकज्ञान-प्रकारीभूतघटत्वसामान्यस्य ज्ञाने जाते, तस्यैव सन्निकर्षत्वं परिगृह्य उत्तरकालं "घटाः" इत्याकारकं घटत्वाश्रयसकलघटविषयकम् अलौकिकप्रत्यक्षात्मकं ज्ञानं जायते। अत्र न यथाकथञ्चित् सामान्यज्ञानस्य प्रत्यासत्तित्वमपितु एकत्र तदिन्द्रियजतद्धर्मबोधसामग्री अपेक्षिता भवति। सा च चक्षुः-संयोगालोकसंयोगादिकं तेन अन्धकारादौ न तादृशप्रत्यक्षम्।

द्वितीयसन्निकर्षः ज्ञानलक्षणः। ज्ञानमेव लक्षणं स्वरूपं यस्य सः ज्ञानलक्षणः अर्थात् यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः। यथा यत्र प्रथमदिने

सौरभयुक्तस्य चन्दनखण्डनस्य चाक्षुषप्रत्यक्षं तद्गतसौरभस्य च घ्राणजप्रत्यक्षं जातं, तत्रापरदिने दूरतोऽपि चन्दनखण्डं दृष्ट्वा ''सुरभिचन्दनम्'' इति सौरभ-विषयकमलौकिकप्रत्यक्षं जायते। तत्र सौरभविषयकं पूर्वगृहीतं ज्ञानमेव सन्निकर्षतया ग्राह्यम्। अत एवोक्तम्-''विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षण''- इति।

तृतीयः सन्तिकर्षः योगजः, योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृति-पुराणादिप्रतिपादितः। स च युक्तयुञ्जानरूपयोगिद्वैविध्याद् द्विविधः, युक्तः योगारूढः, युञ्जानः योगारुरुक्षुः। तत्र युक्तस्य तावद्योगजधर्मसाहाय्येन ध्यानाद्यभावेपि आकाशपरमााण्वादिसकलपदार्थविषयकज्ञानं सर्वदैव भवितु-मर्हति। यथोक्तम्-''ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवा-विशन्ति। (मु. 3 ख. 2 मं. 5) इति। युञ्जानस्य साधकस्य चित्तैकाग्र्यपूर्वकतद्विषयकध्यानविशेषोऽपि सहकारिकारणतया अपेक्षितो भवति।

इत्थं न्यायसिद्धान्तमुक्तावलीसम्मतं प्रत्यक्षप्रमाणस्वरूपं विज्ञेयमिति शम्।

न्यायशास्त्रे प्रत्यक्षप्रमाणसौन्दर्यम्

डॉ. वेङ्कटेशशर्मा

यमाश्रित्य समस्तप्राणीनां व्यवहारो जायते तादृशव्यवहारस्यासाधारणं कारणं ज्ञानम्। तदेव ज्ञानं बुद्धिपदवाच्यम्। मानवो यत्किमपि कार्यं करोति तत्र ज्ञानमपेक्षितम्। मन्दमतयो जना: किमपि ज्ञात्वैव तत्तत्कार्ये प्रवर्तन्ते। यतो हीष्टसाधनताज्ञानं प्रवृत्तिसामान्ये एवमनिष्टसाधनताज्ञानं निवृत्तौ कारणं भवति। अत: समस्तप्रवृत्तिनिवृत्तौ ज्ञानस्यैव कारणता सर्वजनानुभवसिद्धा, अत: ज्ञानस्य समस्तव्यवहाराऽसाधारणकारणत्वं सर्वमतसिद्धम्।[1] इयञ्च बुद्धिरात्मनो विशेषगुणरूपा गुणान्तरवर्तिनी। केचन-बुद्ध्यते अनया इति बुद्धिरिति व्युत्पत्या अन्त:करणस्यैव बुद्धिपदवाच्यत्वं प्रतिपादयन्ति, परन्तु मतमिदं न हि समीचीनं विद्यते। अन्त:करणस्य द्रव्यरूपतया गुणात्मकबुद्धि-स्वरूपता भवितुं नार्हति। तार्किकमते प्रथमं वस्तुविषयकं ज्ञानं भवति तदनन्तरं तद्विषयिणीच्छा जायते, तदनन्तरमात्मनि प्रयत्नो जायते। तेन च प्रयत्नेन शरीरे चेष्टा जायतेऽत: इच्छा प्रयत्नो ज्ञानञ्च आत्मन एव गुणा:। एतेषां ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यात्। ज्ञानवत एव इच्छा जायते इच्छावत एव प्रयत्नो जायते। इत्थं प्रकारेण ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यं सिद्ध्यति। अतो ज्ञानमात्मगुण एव। केचन आत्मनो गुणत्वं नाभ्युपगच्छन्ति किन्तु अन्त:करणधर्म एव ज्ञानम्, किन्तु एवमपि प्रतिपादयितुं न शक्यते। यत: घटमहं जानामीत्याकारिका प्रतीतिर्भवति, एवं घटमहं न जाना-मीत्याकारिकापि प्रतीति: सर्वेषां जनानां जायते। अतोऽहंपदबोध्ये आत्मन्येव ज्ञानं तिष्ठति न तु अन्त:करणे, यतो हि मदीयमन्तकरणमित्याकारिका प्रतीति: सर्वजनानुभवसिद्धा। अतोऽन्त:करणधर्म: न ज्ञानमपितु आत्मन

1. सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्-तर्कसंग्रह:।

एव।[2] किञ्च एकस्मिन्काले नानाज्ञानानामनुत्पत्या मनसः अणुत्वमभ्युपेयते[3] एवञ्च अन्तःकरणे मनसि यदि ज्ञानं जायेत तदा मनोवर्ति ज्ञानसुखादेः कथमपि प्रत्यक्षं न स्यात्। अतः न हि मनोगुणः ज्ञानादिकं सम्भवति। यतो हि तेषामेव गुणानां प्रत्यक्षं भवति यदाधारीभूतं द्रव्यं महत्वपरिमाणवत् स्यात्। गुणप्रत्यक्षे गुणाश्रयप्रत्यक्षस्य कारणत्वात्। अत एव परमाणुरूपादीनां प्रत्यक्षं न भवति। किन्तु 'अहं जाने' इत्याकारिका ज्ञानप्रत्यक्षविषयिणी प्रतीतिः सर्वजनानुभवसिद्धा। अतः ज्ञानाश्रयः कश्चन महत्परिमाणवानभ्युपेयः। मनसि च महत्वाभावात् तत्र ज्ञानात्मकगुणस्वीकारे तद्वृत्तेर्ज्ञानस्य कथमपि प्रत्यक्षं न स्यात्। अतः अन्तःकरणस्य मनसो न ज्ञानादिकं गुणोऽपितु महत्परिमाणवत आत्मन एव विशेषगुणः ज्ञानादिकम्। एतच्च ज्ञानं क्षणिकं भवति। क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्।[4] ज्ञानं प्रथमक्षणे उत्पद्यते तृतीयक्षणे नश्यति। अतो द्विक्षणावस्थायित्वं सिद्ध्यति। ज्ञानस्य विनाशः स्वोत्तरवर्तिविशेषगुणेन जायते। अर्थात् एकज्ञानानन्तरं यदपरज्ञानमुत्पद्यते तेनैव परवर्तिज्ञानेन पूर्ववर्तिज्ञानस्य विनाशो भवति। तच्च ज्ञानमनुभवस्मरणभेदेन द्विविधम्। तत्र संस्कारमात्रजन्यत्वविशिष्टज्ञानत्वं स्मृतित्वम्[5] तथैव स्मृतिभिन्नत्वविशिष्टज्ञानत्वं अनुभवत्वम्।[6] अनुभवोऽपि यथार्थायथार्थभेदेन द्विविधः। तत्र यथार्थानुभव एव प्रमा शब्देन व्यवह्रियते। तथा अयथार्थानुभव एव भ्रमशब्दाभिलप्यो भवति। तत्रापि तद्वन्निष्ठविशेष्यतानिरूपित-तन्निष्ठप्रकारताशाल्यनुभवत्वं यथार्थानुभवस्य लक्षणं भवति।[7] स च यथार्थानुभवः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् चतुर्विधः। तत्रापि प्रमीयते अनेन इति व्युत्पत्या प्रमाकरणं प्रमाणमिति लभ्यते। प्रमाणमपि प्रत्यक्षानुमानोपमानशब्दभेदात् चतुर्विधम्।[8] तत्र प्रमाचतुष्टयमध्ये प्रत्यक्षात्मिका

---

2. ज्ञानाधिकरणमात्मा-तर्कसंग्रहः।
3. अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते - कारिकावली- 85
4. तर्कसंग्रहसर्वस्वम्।
5. तर्कसंग्रहः।
6. तदेव।
7. न्यायबोधिनी।
8. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि-न्यायसूत्रम् - 1.1.3

प्रमा इन्द्रियार्थसन्निकर्षजन्या[9] भवति। यद्यपीश्वरीयप्रत्यक्षप्रमाया नित्यत्वेन तत्र इन्द्रियार्थसन्निकर्षजन्यत्वविशिष्टज्ञानत्वात्मकप्रत्यक्षप्रमालक्षणमव्याप्तं तथापि महर्षिणा गौतमेन "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति[10] सूत्रेण जन्यप्रत्यक्षमेव लक्षितं भवति। तदनुसारमेव उत्तरवर्तिना जन्यप्रत्यक्षलक्षणमेव विहितमस्ति। तथा च इन्द्रियार्थसन्निकर्ष-जन्यत्वविशिष्टज्ञानत्वं प्रत्यक्षत्वमिति प्रत्यक्षलक्षणं निष्पद्यते। एतच्च लक्षणं जन्यप्रत्यक्षस्यैव। ईश्वरप्रत्यक्षसाधारणं लक्षणन्तु ज्ञानाकरणकत्वे सति ज्ञानत्वम्। अत्र ज्ञानं न विद्यते करणं यत्र इति व्युत्पत्या लक्षणमिदमिन्द्रियार्थसन्निकर्षजन्ये एवमीश्वरप्रत्यक्षे च समन्वितं भवति। यतो हि अनुमितौ व्याप्तिज्ञानं करणम्,[11] उपमितौ च सादृश्यज्ञानं करणम् शाब्दबोधे च पदज्ञानं करणम्, स्मृतौ चानुभवकरणम्। अत अनुमित्युपमितिशाब्दस्मृतिषु ज्ञानकरणकत्वमेव विद्यते, न तु ज्ञानाकरणकत्वम्। अतो न तेषु अस्य प्रत्यक्षलक्षणस्यातिव्याप्तिः ईश्वरप्रत्यक्षस्य केनापि करणेन अजन्यत्वाद् भवति तत्रापि ज्ञानाकरण-कत्वविशिष्टज्ञानत्वस्य सम्भवः। इदञ्च लक्षणं जीवेश्वरप्रत्यक्षसाधारणम्। एतच्चप्रत्यक्षज्ञानं निर्विकल्पकसविकल्पकभेदेन द्विविधम्। यथा घटचक्षुः संयोगात् प्रथमं घटस्य निर्विकल्पकं ज्ञानं जायते यत्किञ्चिदिदम् इत्याकारकं, तदनन्तरं 'अयं घटः' इति घटत्वप्रकारकघटविशेष्यकं ज्ञानं जायते तदेव सविकल्पकमिति कथ्यते। तत्रेयमाशंका जायते निर्विकल्पकं ज्ञानं हि अतीन्द्रियम्, तद्सद्भावे किं प्रमाणमिति। तत्र समाधेयं यत् विशिष्टबुद्धौ यावत्कालपर्यन्तं विशेषणस्य दण्डस्य ज्ञानं न स्यात् तावत्कालपर्यन्तं 'दण्डी पुरुषः' इत्याकारकविशिष्टज्ञानं कर्तुं केनाऽपि न शक्यते। तथैव चक्षुः संयोगाद्यनन्तरम् 'अयं घटः' इत्याकारकं सविकल्पकप्रत्यक्षं तावत्कालपर्यन्तं भवितुं नार्हति, यावत्कालपर्यन्तं अयं घटः इत्याकारकप्रत्यक्षविशेषणीभूतस्य घटत्वस्य प्रत्यक्षं न स्यात्। 'अयं घटः' इत्याकारकबुद्धौ घटत्वस्य विशेषणत्वात्, अतः घटत्वात्मक- विशेषणपरिज्ञानार्थं निर्विकल्पकज्ञानमवश्यं स्वीकार्यम्। निर्विकल्पकस्वीकारे च प्रथमं

9. इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।

10. न्यायसूत्रम् - 1.1.4।

11. व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेद् अनुमायाम् - कारिकावली-66।

घटादिविषयेण साकं चक्षुरादीन्द्रियस्य संयोगात्मकः सन्निकर्षो जायते। तदनन्तरं यत्किञ्चिदिदमिति निर्विकल्पकं ज्ञानं जायते। तस्मात् ज्ञानात् सविकल्पकं विशिष्टज्ञानं 'घटः' इत्याकारकं जायते तदेव सविकल्पकम्। अत्र पुनः प्रत्यक्षं तावत् घ्राणज-रासन चाक्षुष-त्वाच-श्रावण-मानसभेदेन षड्विधम्। तत्रेन्द्रियाणां षड्विधतया तज्जन्यस्य प्रत्यक्षस्यापि षड्विधत्वमभ्युपेयम्। इदं सुगन्धितम् इत्याकारकं ज्ञानं घ्राणेन जायते। इदं मधुरमित्यादिप्रत्यक्षं रसनया जायते। इत्थं प्रकारेण तत्तदिन्द्रियैः जायमानस्य प्रत्यक्षस्य षड्विधत्वं जायते। इदं नीलं वस्त्रमित्याकारकं ज्ञानं चाक्षुषप्रत्यक्षम्। तत्र चक्षुः रश्मिरूपेण यदा नीलवस्त्रेण सह संयुक्तो भवति तदा तादृशसंयोगसन्निकर्षात् नीलं वस्त्रमित्याकारकं चाक्षुषं प्रत्यक्षं जायते। एतद्विषये केचनैवं वर्णयन्ति—चक्षुर्हि विषयसन्निधौ न गच्छति। किन्तु चक्षुषि विषयस्य प्रतिफलनात् प्रत्यक्षं जायते इति किन्तु मतमिदं न हि समीचीनम्, काचकामलादिदूषिते नयने शुक्लमपि वस्तु पीतं प्रतिभाति। तत्रैतत् प्रतिपादयितुं न शक्यते यतः बिम्बभूतस्य वस्तुनः शुक्लत्वात् तत्प्रतिफलनमपि शुक्लमेव स्यात्। यदि पीतिमाक्रान्ते चक्षुर्गोलकरूपाधिकरणे वस्तुनः प्रतिफलनं भवति अतस्तत्र पीतरूपमेव गृह्यते। इदमपि न समीचीनम्। स्फटिकसन्निधौ जपापुष्पे स्थापिते प्रतिबिम्बस्य आधारभूतं स्फटिकमेव जपापुष्पात्मकप्रतिबिम्बस्य रूपेण प्रभावितं भवति। तत्र स्फटिकमेव रक्तत्वेन भासते न तु जपापुष्पं शुक्लत्वेन भासते। तथैव पीतिमाक्लान्तः चक्षुर्गोलक एव श्वेतत्वेन भासेत। न तु शङ्खादयः पीतत्वेन भासेरन्। अतः चक्षुर्गोलकात् निर्गत्य विषयसमीपं गत्वा चक्षुरेव विषयेन सम्बध्यते न तु विषयस्य प्रतिफलनम् चक्षुषि भवति। एवं चाक्षुषप्रत्यक्षं द्रव्यगुणकर्मादीनां भवति। एवमेव त्वाचप्रत्यक्षमपि अतीन्द्रियभिन्नद्रव्यगुणादीनां भवति। यथा चक्षुः गोलकात् निःसृत्य विषयसमीपं गच्छति तथा त्वगिन्द्रियं शरीराद्बहिः विषयसमीपं न गच्छति। अपितु त्वक्सन्निधौ विषये समागते सति त्वचा त्वाचप्रत्यक्षं जायते। श्रवणप्रत्यक्षं श्रोत्रेन्द्रियेण जायते। एतत् श्रावण-प्रत्यक्षं शब्दस्य शब्दत्वस्य च प्रत्यक्षं भवति। एवं मनोरूपेन्द्रियेण आत्मन एकमात्मगुणानां प्रत्यक्षं भवति। यथाऽहं सुखी, दुःखीत्याति प्रतीत्या सुखविशिष्टस्यात्मन एवं सुखादेरपि प्रत्यक्षं भवति। इत्थञ्च इन्द्रियाणां

षड्विधत्वात् प्रत्यक्षमपि घ्राणजरासनचाक्षुषत्वाचश्रौत्रमानसभेदात् षड्विधं भवति। एतत्सर्वं प्रत्यक्षं लौकिकसन्निकर्षजन्यमलौकिकसन्निकर्षजन्यञ्च भवति। तत्र लौकिकसन्निकर्षः संयोग-संयुक्तसमवायः संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावभेदेन षड्विधः। एवमलौकिक-प्रत्यक्षमपि सामान्यलक्षणज्ञानलक्षणयोगजभेदेन त्रिविधं भवति। तच्च प्रत्यक्षं धर्मप्रत्यक्षमूलकधर्मविशिष्टधर्मिसमुदायप्रत्यक्षं, विशेषणस्मरणमूलक-विशिष्टप्रत्यक्षं, योगजसन्निकर्षजन्यञ्च।

तत्र प्रथममलौकिकप्रत्यक्षं सामान्यलक्षणजन्यं यथा एकस्य घटस्य चाक्षुषप्रत्यक्षानन्तरं 'घटः' इत्याकारकं यत् प्रत्यक्षं तत्र प्रकारीभूतं यत् घटत्वरूपं सामान्यं तेन सामान्येन यावतां भूतभाविवर्तमानघटानां घटाः इत्याकारकमलौकिकप्रत्यक्षं सकलघटविषयकं सामान्यलक्षणाजन्यं भवति। ननु घटाः इत्याकारकोऽलौकिको बोधः समवायेनात्मनि जायते घटत्वरूप-सामान्यसन्निकर्षस्तु घटे विद्यतेऽतस्तयोर्व्यधिकरणयोर्बोधसन्निकर्षयोः कथं कार्यकारणभाव इति चेदित्थम्- अलौकिकमुख्यविशेष्यतासम्बन्धेन घटत्वावच्छिन्नचाक्षुषं प्रति समवायसम्बन्धेन चक्षुः सम्बद्धघटविशेष्यक-ज्ञानप्रकारतापन्नघटत्वं कारणमिति। तत्र हि अलौकिकमुख्यविशेष्यतासम्बन्धेन 'घटाः' इत्याकारकं घटत्वावच्छिन्नचाक्षुषप्रत्यक्षं घटे तिष्ठति तत्रैव चक्षुः सम्बद्धघटविशेष्यक ज्ञानप्रकारतापन्नघटत्वं समवायसम्बन्धेन तिष्ठतीति विषयनिष्ठप्रत्यासत्त्या तयोः कार्यकारणभावः सम्भवति। सामान्यविषयकज्ञानस्य प्रत्यासत्तित्वे कार्यकारणभावश्चेत्थम्-समवायसम्बन्धेन इन्द्रियसम्बद्ध-घटविशेष्यकज्ञानप्रकारतापन्नघटत्वविषयकं ज्ञानं कारणम्। तथाहि 'घटाः' इत्याकारकमलौकिकमुख्यविशेष्यकघटत्वावच्छिन्नचाक्षुषप्रत्यक्षं समवाय-सम्बन्धेन आत्मनि तिष्ठति तत्रैवात्मनि चक्षुः सम्बद्धघटविशेष्यक-ज्ञानप्रकारतापन्नघटत्वविषयकं ज्ञानं समवायसम्बन्धेन तिष्ठतीति भवति कार्यकारणभावः।

द्वितीयमलौकिकप्रत्यक्षं तावत् ज्ञानलक्षणाजन्यम्। यथा दूरतः कञ्चनचन्दनकाष्ठं वहन्तं दृष्ट्वा दूरताप्रयुक्तघ्राणेन्द्रियसम्बन्धाभावे चक्षुषा तत्र 'चन्दनमिदं सुरभि इत्याकारकं यत् प्रत्यक्षं जायते तत्र सुगन्धस्मरणमेव

सुगन्धविशिष्टचन्दनप्रत्यक्षे कारणं भवति। अत्र ज्ञानलक्षणासन्निकर्षस्य ज्ञानरूपत्वेन फलीभूतस्यालौकिकप्रत्यक्षस्यापि ज्ञानरूपत्वेन आत्मनिष्ठ-प्रत्यासत्याऽत्र कार्यकारणभावो ज्ञेयः।

तृतीयमलौकिकप्रत्यक्षं योगजसन्निकर्षेण योगिनां जायते। योगिनां सर्वदा अबाधितरूपेण भूतभविष्यवर्तमानानां सर्वेषां विषयाणां प्रत्यक्षं भवति।

न्यायनये प्रत्यक्षप्रमाणविमर्शः

डॉ. अरविन्दकुमारः

न्यायशास्त्रे चत्वारि प्रमाणानि स्वीकृतानि। यथोक्तं न्यायसूत्रे- ''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'' (न्यायसूत्र 2/2/3 तत्र 'साक्षात्कारि प्रमाणं प्रत्यक्षमित्यभिधीयते। तद्विग्रहस्तु, अक्षमक्षं प्रति इति प्रत्यक्षम्। अक्षशब्दोऽत्र ज्ञानेन्द्रियपरः। अतः तत्तज्ज्ञानेन्द्रियं प्रति नित्यं तत्तत् प्रत्यक्षं भवति। ततश्च चाक्षुषत्वादिभेदेन अनेकविधम्। साक्षात्कारश्च इन्द्रियार्थसंयोगः, तत एव प्रमोत्पद्यते। ततश्च पदार्थः प्रमीयते इति। प्रत्यक्षमपि द्विविधं भवति। एकं सविकल्पकम् अपरं निर्विकल्पकमिति। तस्याः साक्षात्कारिण्याः प्रमायाः करणं त्रिविधं भवति कदाचिदिन्द्रियम्, कदादिन्द्रियार्थसम्बन्धः, कदाचिच्च ज्ञानम्। अत्रोक्तभेदत्रये यदा निर्विकल्पकं ज्ञानं फलं तदेन्द्रिमेव केवलं करणं भवति। ज्ञानस्यायमस्ति नियमः। प्रत्यक्षेच्छया प्रथममात्मा मनसा युज्यते, मनस्तदिन्द्रियेण, इन्द्रियं च पदार्थेन, ततश्च प्रथमं निर्विकल्पकं ज्ञानं जन्यते। तच्चेदं किञ्चिदित्याकारकं नामजात्यादियोजनारहितं भवति। तस्य निर्विकल्पकस्य ज्ञानस्येन्द्रियमेव करणं भवति।

पूर्वमुक्तमादाविन्द्रियेण पदार्थग्रहे निर्विकल्पकम् अर्थात् विशेषणविशेषाद्यनवगाहि, इदं किञ्चिद् इत्याकारकमेव ज्ञानं जायते। तदा केवलमिन्द्रियमेव करणं भवति, इत्यपि प्रागुक्तम्। अनन्तरं च यदा विशिष्यं ज्ञातुमुपक्रमते तदा इन्द्रियस्यार्थेन विशेषसम्बन्धे सति विशेषण-विशेष्यादिरूपं यज्ज्ञानमुत्पद्यते 'अयं घटोऽयं पटः' इत्याकारकम्, तदेन्द्रियार्थसन्निकर्षः करणं भवति इन्द्रियेणार्थसम्बन्धे पूर्वमुक्तं निर्विकल्पज्ञानमिन्द्रियव्यापाररूपतामावहति, तच्च सविकल्पज्ञानस्य अवान्तरव्यापाररूपम् अर्थादाभ्यन्तरव्यापाररूपमस्ति, सविकल्पकज्ञानं तस्य फलं भवति।

इन्द्रियमिन्द्रियार्थसन्निकर्षं च करणमुक्त्वा ज्ञानस्यार्थाद् निर्विकल्पकज्ञानस्य करणत्वमुच्यते। तथा हि इन्द्रियार्थसन्निकर्षजन्यपदार्थबोधे तात्विकविचार उत्पद्यते। अर्थात् इन्द्रियगोचरे पदार्थे किं वास्तविकं किमवास्तविकमिति। यद्वास्तविकं तदुपेक्षणीयम्, त्याज्यं वेत्यादिरूपेण पूर्वज्ञातपदार्थेन हानोपादानादिबुद्धयो जायन्ते, तदा ज्ञानमेव करणं भवति। तत्र च सविकल्पकज्ञानमवान्तरव्यापारो भवति। सविकल्पकज्ञानस्य च फलं तदा हानादिबुद्धय एव भवन्ति।

अवान्तरव्यापारस्य लक्षणम्–''तज्जन्यः तज्जन्यजनकोवान्तरव्यापारः'' इति। यथा कुठारदारुसंयोग आदौ कुठारजन्यो भवति। अर्थात् कुठारः प्रथम दारुजिस्वं संयुक्ति। ततश्च छिदा जायते अर्थात् दारुभेदनं भवति। यच्च कुठारदारुसंयोगस्य फलम्। तस्मिन् फले प्राथमिकः कुठारदारुसंयोगाद्यिवान्तर व्यापारो भवति। स चावान्तरव्यापारतज्जन्यः (कुठारजन्यः) तेन जन्या या छिदा तस्याः जनको भवति। अस्मिन्विषये मतभेदोप्याचार्याणां दृश्यते, यथा तर्कभाषाया अस्मिन् वाक्ये लक्ष्यते–''सविकल्पकादीनामपीन्द्रियमेव करणम्।'' अथ च ''यावन्ति त्वान्तरालिकानि सन्निकर्षादीनि तानि सर्वाणि, अवान्तरव्यापार इति,'' अर्थात् वस्तुसाक्षात्काराय प्रसृतमिन्द्रियं यावत्पूर्ववस्तु साक्षात्कारं यद्यदनुभवति यद्यत्करोति, यद्यद्ज्ञानमुपपादयति तत्तत्सर्वमेवावान्तर व्यापारपदेन व्यपदेष्टुं शक्यते इति। अत एतेन सिद्धयति यत् प्रत्यक्षविषये द्विविधं मतं प्रचलितमासीत्। आद्यं सारं प्रत्यक्षं त्रिविधकारणान्वितम्। द्वितीयम् एकविद्यमेव। संक्षेपेण त्रिविधकरणव्यापारादीनां वक्ष्यमाणं स्वरूपं

करणम्	अवान्तव्यापारः	फलम्
(क) इन्द्रियम्	इन्द्रियार्थसन्निकर्षः	निर्विकल्पकप्रमा
(ख) इन्द्रियार्थसन्निकर्षः	निर्विकल्पकज्ञानम्	सविकल्पकप्रमा
(ग) निर्विकल्पकज्ञानम्	सविकल्पकज्ञानम्	हानोपादानोपेक्षाबुद्धिः

साङ्ख्ययोगदिशा प्रत्यक्षप्रमाणविचारः

आचार्यः सुधाकरदीक्षितः

साङ्ख्यदर्शने बुद्धिः एव महत्तत्त्वमन्तःकरणं सत्त्वं चित्तमादिशब्दैः अभिधीयते। इयं बुद्धिः तैजसद्रव्यसदृशी एव इन्द्रियप्रणालिकया बहिः विद्यमानविषयं यावत् प्रसरति। अत एव साङ्ख्यमतानुसारं बुद्धिः इन्द्रियप्रणालिकया बाह्यविषयैः सह सम्बद्धा सती यथायथं विषयाकारेणाकारिता भवति। बुद्धेरयं विषयीकारपरिणाम एव बुद्धिवृत्तिशब्देनोच्यते। इयमेव विषयाकाराबुद्धिवृत्तिः ज्ञानम्। **परिणामस्पष्टाकाराः परिणमद्** वस्तु एव भवति अत एवेदमर्थाकारपरिणामात्मकं ज्ञानम् परिणममानं बुद्धिमेवाश्रित्य तिष्ठति तेन ज्ञानं न आत्मगुणः आत्मधर्मो वा किन्तु बुद्धिधर्म एव साङ्ख्ययोगमते। अयं बुद्धेः अर्थाकारपरिणामः यदा परोक्षप्रमाणस्य अनुमानस्य शब्दस्य वा साहाय्येन जायते किं वा शरीराद् बहिः गन्तुं शक्ता घ्राण रसनत्वगादीन्द्रिणां सहायेन प्रादुर्भवति तदा शरीरान्तर्गतमेव तिष्ठति। यदि हि अयम् अर्थाकारो बुद्धेः परिणामः चक्षुः साहाय्येनोत्पद्यते तदा शरीराद् बहिः विद्यमानवस्तुदेशे चक्षुः किरणैः सह बुद्धेः अपि गमनात् बहिः वस्तुदेशे एव बुद्धेः विषयीकारपरिणामो जायते।

विषये साकारे सति विषयसमानाकार एव परिणामो जायते। यथा विषयस्य त्रिकोणतायां बुद्धेः परिणामोऽपि त्रिकोणो भवति। यदि हि विषयो निराकारो भवति यथा गुणक्रियादि तदा तेन सम्बद्धा बुद्धिः यथायथं परिणाममासाद्य ज्ञानमित्याख्यां भजते तथापि बुद्धेः विषयाकारपरिणाम एव ज्ञानमित्येवोच्यते परं तत्राकारशब्दः आकृतिपरस्तु नैव सम्भवति अतः विषयेण साकं बुद्धेः सम्बन्धविशेष एव तथा आकारशब्दस्यार्थ इत्येव मन्तव्यं भवति। अत्रेदमवधेयम् बुद्धे विषयाकारपरिणाममात्रेण विषयो नावगम्यते किन्तु तदर्थं प्रकाशात्मकस्य चैतन्यस्य संसर्गः अपेक्ष्यते। अत एव मन्यते

साङ्ख्ययोगयोः विषयाकारपरिणतायां स्वभावतो जडायां बुद्धौ चैतन्यघनस्य प्रकाशपुञ्जात्मकस्य प्रतिबिम्बः फलति तेन च स्वतः प्रकाशमाना इव बुद्धिः यस्य विषयस्याकारेणाकारिता विद्यते तं विषयं प्रकाशयति। अत एव कस्यापि विषयस्यावगतये बुद्धेः विषयाकारपरिणामः विषयाकारपरिणतायां च बुद्धौ चैतन्यात्मकस्य प्रकाशपुञ्जस्य प्रतिबिम्बश्चापेक्ष्यते। अत्र यदि बुद्धेः विषयाकारपरिणामः प्रमा तर्हि परिणामस्यास्योत्पादकम् इन्द्रियं लिङ्गं शब्दो वा प्रमाणम्। यदि विषयाकारबुद्धौ पुरुषस्य प्रतिबिम्बनं प्रमा तदा बुद्धेः विषयाकारपरिणामः प्रमाणम्।

बुद्धिगतः अर्थाकारः परिणामः प्रमाणम्, तेन परिणामेन सह पुरुषस्य स्वप्रतिबिम्बमूलकः सम्बन्धश्च प्रमेति पक्षःप्रबलो बहुसम्मतश्च। योगदर्शनस्य व्यासभाष्ये (1/7) अयमेव पक्षोऽभ्युपगतः–तथाहि इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्यविशेषात्मनः अर्थस्य विशेषावधारणप्रधानावृत्तिः प्रत्यक्षं प्रमाणम्। फलम् विशिष्टः पौरुषेयश्चित्तवृत्तिनिरोधः।

अत्रेदं चिन्त्यम्–पुरुषे बुद्धितत्त्वं प्रतिबिम्बते बुद्धितत्त्वे पुरुषो वेति। वाचस्पतिमिश्रस्तु बुद्धितत्त्वे पुरुषः प्रतिबिम्बत इति मतमेव स्वीकरोति। अस्मिन् वाचस्पतिमिश्रमते प्रामुख्येन युक्तिरियंदीयते–

बुद्धितत्त्वे एव कर्त्तृत्वं साङ्ख्ययोगयोः स्वीक्रियते अतः तस्मिन्नेव प्रतिबिम्बग्रहणकर्त्तृत्वं युक्तम्। पुरुषस्तु कूटस्थः अकर्त्ता तेन तस्मिन् बुद्धितत्त्व-प्रतिबिम्बग्रहणकर्त्तृत्वस्वीकारो न समीचीन इति।

इदं मिश्रमतं साङ्ख्यतत्त्वकौमुद्यां स्पष्टम्। तथाहि सोऽयं बुद्धितत्त्ववर्तिना ज्ञानसुखादिना तत्प्रतिबिम्बितस्तच्छायापत्त्या ज्ञानसुखादिमान् भवति" इति[1]। 1. सा.का. 5

उक्त "तत्प्रतिबिम्बितः"– "तच्छायापत्त्या" इत्यत्र तच्छब्देन बुद्धितत्त्वमेव गृह्यते। 'तच्छायापत्त्या' इत्यस्य तत्सादृश्यापत्त्या इत्यर्थो बोध्यः। तत्तादात्म्यापत्त्या, तदभेदापत्त्या इत्यप्यर्थौ व्याख्याकारैः विधीयते। वार्तिककारो विज्ञानभिक्षुस्तु पुरुषे बुद्धितत्त्वं प्रति बिम्बत इत्येवाभ्युपैति। एतन्मतमेव

समर्थ्यते पुरुषो निर्मलः नितान्तं स्वच्छः बुद्धितत्त्वं तु विकारि तस्मिन् पुरुषवत् नैर्मल्यं स्वच्छतातिशयो वा नास्ति। किञ्च तदेव प्रतिबिम्बितुं समर्थो यस्मिन् केचन धर्माः आकारगुणादयो वा भवन्ति। पुरुषस्तु निर्धमकः तस्य प्रतिबिम्बः कथं सम्भवति इति अस्य स्वमतस्य समर्थने विज्ञानभिक्षुः साङ्ख्यप्रवचनभाष्ये पद्यमिदमुद्धरति–

कस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः॥ इति।

एतेनेदमेव स्फुटं प्रतिपद्यते–यथा स्वच्छे सरसि तटद्रुमाः प्रतिबिम्बन्ते तथैव चिदात्मके अति स्वच्छे पुरुषे दर्पणस्थानीये बुद्धितत्त्वस्य विभिन्नविषयिण्यो वृत्तयो प्रतिबिम्बन्ते इति। अत्रायं निष्कर्षः – वृत्तौ अर्थावगाही चित्तिशक्तेः प्रतिबिम्बः चित्तिशक्तौ वृत्तेः प्रतिबिम्बो वा प्रमा। तत्करणं वृत्तिः प्रमाणम्। चक्षुरादिद्वारा व्यक्तिविशेषनिर्धारणीयचित्तवृत्तिः प्रत्यक्षप्रमाणम्। विषयाकारवृत्तौ चितिशक्तेः प्रतिबिम्बः, चितिशक्तौ विषयाकारवृत्तेः प्रतिबिम्बो वा प्रत्यक्षप्रमा। एवं ध्यानसमाधिद्वारा चितिशक्तिविशेषावद्योतिका सम्प्रज्ञाताख्या चित्तवृत्तिः प्रत्यक्षं प्रमाणम्। ज्ञाता चितिशक्तिः प्रमा–फलम् इति।

धारणाध्यानसमाधीनामेकविषयकत्वम्

डॉ. आर्. कृष्णमूर्त्तिशास्त्री

देहार्धयोगः शिवयोः स श्रेयांसि तनोतु वः।
दुष्प्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते॥

पतञ्जलिमुनेरुक्तिः काव्यपूर्वाजयत्यसौ।
पुंप्रकृत्योर्वियोगोऽपि योग इत्युदितो यथा॥

अष्टाङ्गयुक्तस्य योगस्य असम्प्रज्ञातसमाध्याख्यस्य आत्मसाक्षात्कारस्वरूपज्ञानसाधनत्वं श्रुतिस्मृतिभ्यामनुमतं वर्णितञ्च–

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्[1]॥

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि॥[2]

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् इत्याद्याः श्रुतयः पठ्यन्ते। गीतारूपा स्मृतिश्च।

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥[3]

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छन्ति॥

इत्यादीनि वचनानि च योगस्य विशिष्य समाधेः आवश्यकतां कथयन्ति।

विशिष्य विवेकचूडामणिग्रन्थे एवं पठ्यते सार्वात्म्यसिद्धये भिक्षोः कृतश्रवणकर्मणः समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः।।

तस्मात् योगसूत्रेषु द्वितीयपादे यमनियमासनप्राणायामप्रत्याहाराख्यानि पञ्चाङ्गानि उक्त्वा तृतीयपादे धारणाध्यानसमाधयः विव्रियन्ते। प्राणायामान्तानां चतुर्णां प्रत्याहारद्वारा धारणादिसाधनत्वं च तत्रोक्तं धारणासु च योग्यतामनसः इति। प्रत्याहारश्च गीतायामुक्तः-

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।। इति।

ततः परम् आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् इत्येवं असम्प्रज्ञातसमाधिं निरूपयति। अत्र च श्लोकव्याख्याने शाङ्करभाष्ये अन्तिमं वाक्यमिदं 'एष योगस्य परमो विधिः' इति। एवंरीत्या आत्मतत्त्वसाक्षात्कारस्य अत्यन्तमुपयोगिता संयमस्य वर्तते इति तद्विषये किञ्चिद्विचारयामः।

धारणा

योगाङ्गेषु षष्ठमिदम्। तृतीयपादारम्भे इयम् एवं सूत्रिता- देशबन्धश्चित्तस्य धारणा (यो. 3.1) इति। नाभिचक्रहृदयनासाग्रादौ देशे संप्रज्ञातसिद्धये चित्तस्य यो बन्धः स्थिरीकरणं सा धारणेत्युच्यते। योगियाज्ञवल्क्ये देशेषु आत्मापि परिगणितः

यमादिगुणयुक्तस्य मनसः स्थितिरात्मनि।
धारणेत्युच्यते सद्भिः योगशास्त्रविशारदैः।। इति।

इदं धारणादित्रयं कैवल्योपायभूतायाः पुरुषाख्यातेः अन्तरङ्गं यमादिपञ्चकं च बहिरङ्गम् इति योगसुधाकरे सदाशिवब्रह्मेन्द्रैः उक्तम्।

ध्यानम्

इदन्तु एवं सूत्रितम् तत्र प्रत्ययैकतानता ध्यानम् (यो. 3.2) इति। यस्मिन् देशे विषये वा धारणा कृता तत्रैव ध्येयाकारवृत्तिप्रवाहः वृत्त्यन्तराव्यवहितः ध्यानमुच्यते। तदुक्तं विष्णुपुराणे-

तद्रूपप्रत्ययैकाग्रसन्ततिश्चान्यनिस्स्पृहा ।

तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप॥ इति॥

समाधिः

अयं समाधिः द्वेधा संप्रज्ञातः असंप्रज्ञातश्च। तत्र प्रथमः द्वितीयस्याङ्गम्। अत एव अष्टाङ्गत्वं समाधेः चितवृत्तिनिरोधस्य योगाख्यस्य उक्तम्। अयं च चित्तस्य धर्म एकाग्रनिरुद्धाख्ययस्य चित्तस्य भूमिकाद्वयस्य भवति। विषयोऽयं योगसुधाकरे स्पष्टमुक्तः एवम्–

संप्रज्ञातोऽसम्प्रज्ञातश्चेति। स च चित्तस्य धर्मः। चित्तं हि त्रिगुणात्मकत्वात् पञ्चभूमिकोपोतम्। ताश्च भूमयः विक्षिप्तं मूढम् अविक्षिप्तमेकाग्रं निरुद्धं चेति।

1 क्षिप्तं रजसा विषयेषु क्षिप्यमाणं क्षिप्तम्

2. मूढं तमसा निद्रालस्यादिमत् मूढम्

3. विक्षिप्ताम् ईषद्रजस्संस्पृष्टेन सत्वेन कादाचित्कध्यानयुक्तम् क्षिप्ताद्विशिष्टं विक्षिप्तं

4. एकाग्रं विधूतरजस्तमस्केन शुद्धसत्वेन एकाग्रमेकतानम्।

5. निरुद्धम् प्रशान्तसकलवृत्तिकं संस्कारशेष्यं निरुद्धम्। एवं च आद्यभूमित्रयपरित्यागेन अवशिष्टभूमिद्वयोपेतस्य चित्तस्य इदं समाधिद्वयं धर्मः। ध्येयातिरिक्तवृत्तिनिरोधः संप्रज्ञातः। सर्ववृत्तिनिरोधः असंप्रज्ञातः। इति भावगणेशवृत्तौ उक्तम्

5. सम्प्रज्ञातसाधनम्[1]

अभ्यासः [2]वैराग्यं च द्वयं साधनम्। उक्तं हि अभ्यासवैराग्याभ्यां तन्निरोधः। **अभ्यास**जयादौ आवृतिलक्षणाभ्यासवत् अत्र क अभ्यास इति प्रश्ने एवमुक्तं योगसुधाकरे स्वत एव बहिः प्रवाहशीलं चित्तं सर्वथा निरोत्सामि इत्येवं विधः उत्साहः आवर्त्यमान अभ्यासः इति। अत्र च सूत्रं "तत्र स्थितौ यात्नो अभ्यासः" (यो. 1.13) इति।

शङ्का

अद्यतनः अभ्यासः स्वयमदृढः सन् अनादिसञ्चितव्युत्थानसंस्कारान् कथमभिभवेत्।

समाधानं

दिवसैर्मासैर्वा समाधिं यदि वाञ्छेत तर्हि स योगी एतादृश एव भवेत्। यः एवं चिन्तयति विद्यमानाश्चत्वार एव वेदाः तानध्येतुं गतस्य माणवकस्य पञ्च दिवसा अतीताः, न अद्याप्यसौ समागतः इति। तस्मात् संवत्सरैः जन्मभिर्वा दीर्घकालम् अभ्यासः आसेवितव्यः। स्मर्यते हि 'अनेकजन्मसंसिद्धः ततो याति परां गतिं'' इति। दीर्घकालः– अभ्यासोऽपि निरन्तरं कर्तव्यः। करणसमये च आदरोऽपि आवश्यकः। तदैव समाधेः दृढभूमित्वं स्यात्। अत्र च सूत्रं स तु दीर्घकालादरनैरन्तर्यसत्कारासेवितो दृढभूमिः इति। (यो.1.4)

1. **वैराग्यम्**– इदं द्विविधम्। अपरं परं चेति। तत्राद्यमपि चतुर्विध म्– यतमान–व्यतिरेक–एकेन्द्रिय–वशीकराणि इति।

अ. यतमानं– जगति किं सारं किमसारं इति गुरुशास्त्राभ्यां जिज्ञासामि इत्येवम् उद्योगः।

आ. व्यतिरेकं– स्वचित्ते विद्यमानानां दोषाणां मध्ये अभ्यस्यमानविवेकेन एतावन्तः नष्टाः एतावन्तोऽवशिष्टाः इति विवेचनम्।

(इ) एकेन्द्रियं– दृष्टादृष्टसुखभोगेषु दुःखात्मकत्वबोधेन तत्र प्रवृत्तिं परित्यज्य मनसि औत्सुकतामात्रेण तृष्णास्थापनं एकेन्द्रियम्।

(ई) वशीकरणम्– ऐहिकामुष्मिकविषयभोगेषु सर्वथा वितृष्ण त्वम्। अत्र सूत्रं दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् इति।

इदं च वैराग्यमपरमित्युच्यते। इदं सम्प्रज्ञातसमाधेः अन्तरङ्गम्। असम्प्रज्ञातसमाधेश्च बहिरङ्गम् **परंवैराग्यम्** सम्प्रज्ञातसमाध्यभ्यासे पाटवेन गुणात्रयात्मकात् प्रधानात् विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कारः। तद्वारा अशेषगुणत्रयव्यवहारे यत् वैतृष्ण्यं तत् परं वैराग्यम्।

समाधिलक्षणम्

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः इति सूत्रे समाधिः लक्षितः। अस्यायमर्थः (यो. 3.3) ध्यानस्य प्रकर्षात् एकविषयप्रवाहश्चित्तस्य यो भवति स एव समाधिः। तदेव ध्यानमेव ध्येयैकगोचरतया निर्भासमानं ध्यानस्वरूपशून्यमिव स्थितं समाधिर्भवति इति। अत एव उक्तम्–

ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिं विना।
सम्प्रज्ञातसमाधिः स्यात् ध्यानाभ्यासप्रकर्षतः॥ इति।

ध्यानसमाध्योः अभेदः न शङ्क्यः। यतः वक्ष्यमाणरीत्या ईष्द्भेदः विद्यते ध्यानं–कर्तृकारणानुसन्धानपुरस्सरं जायमानः प्रत्ययः। समाधिः– कर्तृकरणानुसंन्धानं विना ध्येयमात्रगोचरतया निर्भासमानः प्रत्ययः। संप्रज्ञातप्रभेदाः सम्यक् संशयविपर्ययरहितत्वेन, प्रज्ञायते प्रकर्षेणेतिव्युत्पत्या अयं भावनाविशेषः। भावना हि भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनम्। सम्प्रज्ञातभेदाः चत्वारः एवमुक्ताः सूत्रे पातञ्जले ''वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः'' इति (यो. 1.17)। सूत्रस्यास्य विवरणमेवम् ''सवितर्कः सविचारः सानन्दः सास्मितः इति चत्वारः।

सवितर्कः– यदा महाभूतेन्द्रियाणि स्थूलानि विषयत्वेनादाय पूर्वापरानुसन्धानेन शब्दार्थोल्लेखपुरस्सरं भावना क्रियते तदाऽयं सवितर्कः उच्यते। यदा तु अस्मिन्नेव स्थूलालम्बने पूर्वापरानुसन्धानशब्दोल्लेखशून्यत्वेन भावना प्रवर्तते तदा निर्वितर्कः उच्यते।

सविचारः यदा तन्मात्रान्तःकरणलक्षणं सूक्ष्मविषयमवलम्ब्य देशकालधर्मावच्छेदेन भावना प्रवर्तते तदा सविचारः। यदा तु तस्मिन्नेव सूक्ष्मालम्बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासत्वेन भावना क्रियमाणा निर्विचारः उच्यते। एनयोः सप्रभेदयोः ग्राह्यसमापत्तिः इति नामान्तरम्।

सानन्दः यदा तु रजस्तमोल्लेखावानुविद्धमन्तःकरणं सत्त्वं भाव्यते तदा गुणभावान्वितशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानन्दः समाधिः भवति। अस्य ग्रहणसमापत्तिः इति नामान्तरम्। अत्र बद्धादराः तत्त्वान्तरं प्रधानपुरूषरूपं न पश्यन्ति, ते विगतदेहाहङ्कारत्वात्

विदेहशब्दवाच्याः।

सास्मितः

इतः परं रजस्तमोऽनभिभूतं शुद्धसत्त्वमालंबनीकृत्य या भावना प्रवर्तते तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावात् चितिशक्तेरुद्रेकात् सास्मितः इति उच्यते। अस्य गृहीतसमापतिः इति नामान्तरम्। (अत्रैव) ये कृतपरितोषा परं परमात्मानं पुरुषं न पश्यन्ति तेषां चेतसि स्वकारणे लयमुपागते प्रकृतिलयः इति प्रथा। एवं प्रोक्ताः तिस्रः समापत्तयः (समाधयः) सबीजसमाधिः इत्येवं प्रोच्यन्ते। उक्तं हि ''ता एव सबीजः समाधिः"। अत्र निर्विचारसमाध्यभ्यासेन चित्तस्य वैराग्ये नैर्मलयापरपर्याये सति अध्यात्मप्रसादः आत्मनश्चित्तशक्तेः प्रसादः ख्यातिः भवति। उक्तं हि ''निर्विचारवैशारद्येऽध्यात्मप्रसादः" (यो 1.47) इति।

एवमध्यात्मप्रसादे सति, ऋतं सत्यं बिभर्ति कदाचिदपि न विपर्ययेणाच्छाद्यते या प्रज्ञा सा जायते। अस्याः ऋतंभरा इति तान्त्रिकं नाम। उक्तं हि ''ऋतम्भरा तत्र प्रज्ञा'' इति। अयमेव श्रेष्ठो योगः। तथाच व्यासभाष्यम्–

आगमेनानुमानेन ध्यानाभ्यासरसेन च।
त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम्।। इति

एतादृश ऋतम्भराप्रज्ञाजनितः संस्कारः व्युत्थानसंस्कारान् सर्वानपि बाधते नूनं इति कथ्यते सूत्रेण ''तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी (1. 50) इति।

असंप्रज्ञातसमाधिः

संयमाख्यात् एतस्मात्त्रयात् लब्धा–ऋतम्भरप्रज्ञः, व्युत्थानसंस्कारमा–त्ररहितः अधिकारी, एतादृशसंप्रज्ञातसमाधिरूपस्य असंप्रज्ञातसमाधिबहिरङ्गभूतस्य परवैराग्यबलेन असंप्रज्ञातसमाधिम् आसादयति। ''परवैराग्यस्यैवान्तरङ्गत्वं संयमस्य बहिरङ्गत्वं च सूत्राभ्यामुक्तम् विरामप्रत्ययाभ्यासपूर्वः संस्कारशोषोऽन्यः(1.18) तदपि बहिरङ्गं निर्बीजस्य (3.8) इति।

संयमसाध्येन अनेन निर्विकल्पसमाधिना तत्परिपाकेन च वेदान्तवाक्यात् सम्यग्दर्शनं भवति। तेनाविद्यायां निवृत्तायां तद्धेतुकदृग्दृश्य-संयोगाभावात् पञ्चविधायामपि वृत्तौ निवृत्तायां स्वरूपप्रतिष्ठः पुरुषः शुद्धः केवलो मुक्तः इत्युच्यते। एतत्सर्वं भगवद्गीतायाम्।

युञ्जन्नेवं सदाऽऽत्मानं योगी नितयमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति।। गी. 5.15

इत्यत्र सूचितमिति गूढार्थदीपिकायाम् उपपादितम्।

1. **युञ्जन्नेव** सम्प्रज्ञातसमाधिः।
2. **नियतमानसः** असम्प्रज्ञातसमाधिः।
3. **शान्तिं** प्रशान्तवाहिता।
4. **निर्वाणपरमां** धर्ममेघस्य ज्ञानद्वारा कैवल्यहेतुत्वम्।
5. **मत्संस्थां** औपनिषदं कैवलं च दर्शितम्।।

उपसंहारः

संयमस्य धारणाध्यानसमाध्याख्यस्वरूपप्रभेदाः, तस्य मुख्यं फलं च योगसूत्ररीत्या अत्र विवृतं सर्वं विवेकचूडामणौ व्यतिरेकेण अन्वयेन च संसूचितम्

''समाहिता ये प्रविलाप्य बाह्यं
श्रोत्रादि चेतः स्वम्, अहं चिदात्मनि।
त एव मुक्ता भवबन्धपाशैः (पाशबन्धैः)
नान्ये तु पारोक्ष्यकथाभिधायिनः।। 357
अज्ञानहृदयग्रन्थिनिश्शेषविलयस्तदा।
समाधिना विकल्पेन यदाऽद्वैतात्मदर्शनम्।। इति

तैत्तिरीयभृगुवल्यां च भाष्ये उपसंहृतम्। तस्मात् ब्रह्मविजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणं परमं तपः साधनमनुष्ठेयमिति प्रकरणार्थः इति (तै. उ. 3.6)।।

जैनदर्शने धर्मध्यानस्य वैशिष्ट्यम्

प्रो. वीरसागरो जैनः

भारतीयदार्शनिकानामेवैतद् वैशिष्ट्यं यत् तर्कानुमानागमादिभिः वस्तुतत्त्वं प्रकाशयन्तोऽपि निरूपयन्तोऽपि ते एतद् स्वीकुर्वन्ति यत् तत्त्वबोधः, सत्यबोधः, सत्यस्य साक्षात्कारस्तु ध्यानावस्थायामेव भवति। जैनदर्शनानुसारमपि सर्वलोकालोकज्ञं केवलज्ञानं तत्त्वं तत्त्वं प्रति गत्वा न भवति, अपि तु ध्यानेनैव भवति, ध्यानकाल एव प्रकटितो भवति।

जैनदर्शने ध्यानस्य महत्त्वं विस्तरेण निगदितम्। तत्र नैके ग्रन्थाः विषयमिममवलम्ब्य विरचिताः सन्ति यथा- योगसारः, ज्ञानार्णवः, अमृताशीतिः, इत्यादयः। जैनदर्शनानुसारं मोक्षमार्गस्य प्रारम्भोऽपि आत्मध्यानात् भवति, विकासोऽपि आत्मध्यानात् भवति, पूर्णता चापि आत्मध्यानादेव भवति। आत्मध्यानं विना रागादिविकाराणां विनाशो कथमपि भवितुं नार्हति। सम्यग्दर्शन-ज्ञान-चारित्राणां पारमार्थिकी प्राप्तिः ध्यानावस्थायामेव भवति। आचार्यनेमिचन्द्रमहोदयाः स्पष्टं वदन्ति-

दुविहं पि मोक्खहेउं झाणे पाउणदि जं मुणी णियमा।
तम्हा पयत्तचित्ता जूयं झाणं समब्भसह।।[1]

अर्थात् निश्चयमोक्षमार्गं व्यवहारमोक्षमार्गं चापि मुनयः ध्यानकाले एव प्राप्नुवन्ति तस्मात् भवन्तः सर्वेऽपि ध्यानस्यैवाभ्यासं सम्यक्तया कुर्वन्तु।

जैनदर्शने ध्यानस्य महत्त्वं कियत् स्वीकृतमित्येतेनापि ज्ञातुं शक्यते यत् जैनानां मन्दिरेषु सर्वत्र एव सर्वेषां तीर्थंकराणां भगवतां वा ये केऽपि विग्रहाः विराजन्ते ते सर्वे अपि ध्यानावस्थायामेव प्रतिष्ठिताः भवन्ति, न तु अन्यस्यां कस्यामपि अवस्थायाम्; यद्यपि जैनेतरमन्दिरेषु देवताः विविध

ासु भङ्गिमासु क्रियासु च विराजन्ते। जैनदर्शनानुसारं सर्वेषां कर्मणां क्षयः ध्यानेनैव भवति–

ध्यानाग्निः सर्वकर्माणि भस्मसात् कुरुते क्षणात्।

एवम्प्रकारेण जैनदर्शने ध्यानस्य महत्त्वं सुतरां प्रतिपादितं किन्तु तद्ध्यानं समीचीनमेव भवेत् इत्यादिरूपेण वारं वारं निवेदितम्। जैनाचार्याः स्पष्टरूपेण कथयन्ति–

झाणं झाणाभासं झाणस्स तहेव भावणा भणिदा।
मोत्तुं झाणाभासं वेहिं पिय संजुओ समणो।।[2]

अर्थात् ध्यानमेव कुर्वन्तु भवन्तः। यदि ध्यानं न कर्तुं शक्यते तर्हि ध्यानस्य भावना करणीया। किन्तु ध्यानाभासः कदापि न करणीयः।

जैनदर्शनानुसारं ध्यानं द्विविधं भवति– प्रशस्तमपि अप्रशस्तमपि। प्रायः जनाः जानन्ति यत् ध्यानं तु सदा हितकारकमेव उपादेयभूतमेव भवति, किन्तु नास्ति तत् समीचीनम्। प्रशस्तध्यानमेव हितकारकमुपादेयभूतं मोक्षकारकं च भवति, अप्रशस्तध्यानं तु अत्यन्तमहितकारकं संसारकारणं तस्माच्च हेयभूतं भवति।

किं ध्यानम्? जैनाचार्याः कथयन्ति–"**एकाग्रचिन्तानिरोधो ध्यानम्।**"[3] अर्थात् यदा चित्तस्यैकाग्रता भवति तदा ध्यानं भवति। इदं च चतुर्विधं भवति आर्तरौद्रधर्मशुक्लभेदेन, अथवा द्विविधमपि भवति प्रशस्ताप्रशस्तभेदेन। आर्तरौद्रध्याने अप्रशस्तध्याने स्तः, धर्मशुक्लध्याने च प्रशस्तध्याने स्तः।

आर्तध्यानमिष्टवियोगेनानिष्टसंयोगेन पीड़ाचिन्तनेन निदानेन वा भवति। रौद्रध्यानं हिंसादिपापकार्येषु आनन्दानुभवनरूपं भवति। तस्मात् इमे द्वे ध्याने हेयभूते प्रतिपादिते स्तः।

धर्मध्यानं धर्मसहितं भवति, तत्त्वचिंतनरूपमात्मध्यानरूपं वा भवति। शुक्लध्यानं च मोक्षस्य साक्षात्कारकारणरूपमत्यंतमुज्ज्वलं भवति। तस्मात् इमे द्वे ध्याने उपादेयभूते स्तः।

धर्मध्यानस्य पञ्च हेतवः प्रतिपादिताः–

वैराग्यं तत्त्वविज्ञानं नैर्ग्रन्थ्यं समचित्तता।
परिषहजयश्चेति पञ्चैते ध्यानहेतवः॥

अर्थात् धर्मध्यानार्थमेतेषां पञ्चानां तत्त्वानां प्राप्तिरत्यन्तमावश्यकी– 1. वैराग्यं, 2. तत्त्वज्ञानम्, 3. नैर्ग्रन्थ्यमपरिग्रहत्वं वा, 4. साम्यं 5. परिषहजयश्च। अत एव धर्मध्यानस्य स्वामी सम्यग्दृष्टिजीवः एव भवति। मिथ्यादृष्टिजीवाः धर्मध्यानं कर्तुं नैव शक्नुवन्ति।

जैनदर्शने ध्यानस्य भेद-प्रभेदाः एवम्प्रकारेण वर्णिताः सन्ति–

- ध्यानम्
  - अप्रशस्तध्यानम्
    - आर्तध्यानम्
    - रौद्रध्यानम्
  - प्रशस्तध्यानम्
    - धर्मध्यानम्
    - शुक्लध्यानम्

आर्तध्यानम्	रौद्रध्यानम्	धर्मध्यानम्	शुक्लध्यानम्
↓	↓	↓	↓
1. इष्टवियोगजम्	1. हिंसानन्दरूपम्	1. आज्ञाविचयम्	1. पृथक्त्वविचारः
2. अनिष्टसंयोगजम्	2. मृषानन्दरूपम्	2. अपायविचयम्	2. एकत्वविचारः
3. पीडाचिन्तनम्	3. चौर्यानन्दरूपम्	3. विपाकविचयम्	3. सूक्ष्मक्रिया-प्रतिपाति
4. निदानरूपम्	4. अब्रह्मण्यानन्द-रूपम्	4. संस्थानविचयम्	4. व्युपरतक्रिया-निवृत्तिः

---

1. नेमिचन्द्राचार्यः, द्रव्यसंग्रहे गाथा 47
2. माइल्लधवलः, नयचक्रे, गाथा, 177
3. आचार्योमास्वामी, तत्त्वार्थसूत्रे, 9/27

सांख्ययोगे समाधिस्वरूपम्

प्रो. महेशप्रसादसिलोड़ी

मौलिकशरीरे जीव आऽऽकुलो भवति, दुःखस्य कारणं जगद्वासना वर्तते। यदा जीवः वासनासंस्कारात् असम्पृक्तं तिष्ठति तदा शुद्धबुद्धमुक्त स्वभावेन चैतन्यमिव भासते। ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सितवितथं जानाति देशान्तरे, देहान्तरे, कालान्तरे च। व्यष्टिः चेतना समष्ट्यनन्तरं भवति, समरूपत्वसम्प्रत्यये जीवः चेतनाऽवतिष्ठति, पत्रेऽस्मिन् धारणाध्यानसमाधयः प्रविधिरूपेणाङ्गीकृताः।

समाधिविषये महर्षिणा पतञ्जलिना सूत्रितं यत्–**तदेवार्थमात्र निर्भासं स्वरूपशून्यमिव समाधिः**[1]**।** अर्थात्– ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपशून्यमिव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते। लिखितमस्ति–**तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्, मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते**[2]**॥**

यद्यपि सार्वभौमिकचित्तधर्मः परञ्च वासनया ध्यायमानजैविकचित्ते समाधिरूपस्याङ्गाङ्गिनोः सम्प्रज्ञातभेदो यदत्र चित्तरूपतया विशेषतो ध्येयस्वरूपं न भासते, अङ्गिनि तु सम्प्रज्ञाते साक्षात्कारोदये अपि विषयाः भासन्ते।

ध्यानं द्वादशपर्यन्तं मनो ब्रह्मणि योजयेत्।
तिष्ठेत्तल्लयो युक्तः समाधिः सोऽभिधीयते[3]**॥**

सम्प्रज्ञातसमाधिः– सम्यक् प्रज्ञायतेऽस्मिन्निरोधविशेषयोगे। यस्तु समाधिरेकाग्रे चेतसि विद्यमानं ध्येयं सद्भूतं प्रकर्षेण द्योतयति ततश्च क्लेशानविद्याऽऽदीन् क्षिणोति। कारणोच्छेदाद्धर्माधर्मरूपाणि बन्धनानि नश्यन्ति

---

1. योगसूत्रम् 3.3
2. तत्त्ववैशारदी
3. योगसूत्रभाष्यम् 3.3

एवञ्चासम्प्रज्ञातम् अभिमुखं करोति। सम्प्रज्ञातश्चतुर्विधः– वितर्कानुगतो विचारानुगत आनन्दानुगतोऽस्मितानुगतश्च।

वितर्कानुगतसमाधिः– वितर्कश्चित्तस्यालम्बने स्थूल आभोगः।

योनिजं वा विराजं वा चतुर्भुजादिकं वा स्थूलं षड्विंशतितत्त्व-संघातमाश्रित्य प्रथमभावना प्रवर्तते स आलम्बनम्। यतो हि अदृष्टजातीयेषु चैतन्यपर्यन्तेषु विवेकेन पूर्वं चिन्तनासंभवात्, यदा योगबलेन तानि पश्चात्साक्षात् क्रियन्ते इति न तान्यालम्बनानि। एकस्मिन्नेवालम्बने क्रमेण चतुष्प्रकारकः सम्प्रज्ञातो भवति, तत्रावलम्बने विराट्शरीरादौ प्रथमं यश्चित्तस्य स्थूलाकारत्वात् स्थूल आभोगः परिपूर्णता, स्थूलयोर्भूतेन्द्रिययोरदृष्टाश्रुतामताशेषविशेषसाक्षात्कारः स वितर्कः।

2. **विचारानुगतसमाधिः**– सूक्ष्मो विचारः, प्रकृतिमहदहंकार-पञ्चतन्मात्ररूपा सूक्ष्मा अर्थास्तदाकारत्वात्सूक्ष्माश्चित्तस्याभोगाः स विचारः एते एव सविचारा निर्विचारा च सूक्ष्मविषयाः। भूतसूक्ष्मेषु अभिव्यक्तधर्मेषु देशकालनिमित्तानुभवः स विचारः। लिखितमस्ति–

आगमेनानुमानेन ध्यानाभ्यासरसेन च।
त्रिधाप्रकल्पयन्प्रज्ञां लभते योगमुत्तमम्।।

3. आनन्दानुगतसमाधिः– "आनन्दो ह्लादः" यदा साधकः चित्तस्य सूक्ष्माभोगमपि परित्यज्य सत्त्वप्रकर्षेण विशिष्टानन्दमनुभवति, तेनानुगत-निरोधेन आनन्दानुगतसमाधिर्भवति।

यथा– **सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्।**
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।[1]

4. अस्मितानुगतसमाधिः– वितर्कविचारानन्दरूपादतिरिक्त यदेकात्मिका संविद् तदस्मितानुगत एव। सत्त्वप्रकर्षे "अहमस्मि" इति आत्मसाक्षात्कारो भवति।

---

1. श्रीमद्भगवद्गीता 6.21

"आत्मना आत्मानं परिपश्यन्ति धीराः" अत्र अवस्थाविशेषः वितर्कविचारानन्दरूपाणि उत्तरोत्तरं भूमिमुत्कर्षयन्ति। लिखितञ्चास्ति– **योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत्। स्थूले विनिर्जितं चित्तं ततः सूक्ष्मे शनैर्नयेत्।।** अर्थात् यदा निर्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा योगिनो भवत्यध्यात्मप्रसादः। अशुद्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो भवति।

प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान्।
भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोऽनुपश्यति।।[1]

असम्प्रज्ञातसमाधिः– **आलम्बनं विना चित्तवृत्तयः पुरुषेऽवतिष्ठत।**

युञ्जीत योगी निर्जित्य त्रीन् गुणान् परमात्मनि।
तन्मयश्चात्मना भूत्वा चिद्वृत्तिमपि संत्यजेद्।।[2]

सत्त्वबाहुल्यात् चित्तवृत्तिः अपरिणामी भवति, द्रष्टुः चित्तिशक्तेः पुरुषस्य स्वरूपे निर्विषयचैतन्यमात्रेऽवस्थानं भवति। जन्मान्तरसंस्कारस्य भयं भवति। सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः, भगवता पतञ्जलिना सूत्रितम्–

"विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः।"

स तु उपायप्रत्ययो भवप्रत्ययश्च द्विविधः–

(क) उपायप्रत्ययस्तु योगिनां भवति, श्रद्धा चेतसः प्रसादः, सा हि जननीव कल्याणी योगिनं पाति। श्रद्धधानस्य वीर्यमुपजायते, समुपजात-वीर्यस्य-स्मृतिरूपस्तिष्ठते। स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते। समाहितचित्तस्य प्रज्ञाविवेकमुपजायते, तदभ्यासादसम्प्रज्ञातः समाधिर्भवति, स हि कैवल्यहेतुः।

(ख) भवप्रत्ययः– विदेहानां देवानां भवप्रत्ययः, विदेहः देहात् बहिः अर्थात् ईश्वरोपासनया ये ब्रह्माण्डं सावरणं त्यक्त्वा लिङ्गशरीरेण सह प्रकृत्यावरणे गताः तेऽत्र विदेहा वा प्रकृतिलीनाः यथा जनकादयः तेऽपि चासमाप्तकार्ये चेतसि स्वेच्छयैव प्रकृतिलीने संस्कारशेषे सति

1. पा. स. सू. 47 वार्तिक भा॰
2. योगसूत्रम् 1.18
3. स. पा. सू. 17 वार्तिक भा॰

असम्प्रज्ञातयोगे कैवल्यपदमिव प्राप्नुवन्ति। यावदधिकारविशेषवशात् चित्तं पुनर्व्युत्थितं न भवति तस्यापि भवप्रत्ययः, वायुपुराणेऽपि लिखितमस्ति–

दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः,
भौतिकाश्च शतं पूर्णं सहस्रे त्वाभिमानिकाः॥
बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः,
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः॥[1]

व्युत्थाननिरोधसमाधिप्रभावैः सह कैवल्यभागीयैः संस्कारैश्चित्तं स्वस्य प्रकृतौ प्रविलीयते। संस्कारनिवृत्ते सति पुरुषः स्वरूपमात्रप्रतिष्ठोऽतः शुद्धः केवलो मुक्त इत्युच्यते।

सांख्यसारग्रन्थे समाधिः

योगचिन्तामणिग्रन्थे, उपनिषत्सु, योगवासिष्ठप्रभृतिषु ग्रन्थेषु यत् किञ्चिदपि राजयोगविषये प्रतिपादितमस्ति तत् सर्वम् अन्येषु यौगिकग्रन्थेषु (योगसूत्रम्) असम्प्रज्ञातसमाधिरूपेण प्राप्यते, योगः चतुर्विधः प्रोक्तः, मन्त्रयोगः, लययोगः, हठयोगः, राजयोगश्चेति। योगतत्त्वोपनिषदि लिखितमस्ति–

योगो हि बहुधा ब्रह्मन्, भिद्यते व्यवहारतः।
मन्त्रयोगो लयश्चैव हठोऽसौ राजयोगकः॥[2]

योगचिन्तामणिनामकग्रन्थे राजयोगस्वरूपं प्राप्यते, तत्र लिखितमस्ति न तत्र किञ्चिद् वेद्यं सम्प्रज्ञायत इति असम्प्रज्ञातः समाधिः, अयं निर्बीजो निर्विकल्पो निरालम्ब इति राजयोगः चोच्यते। कथनस्यास्य तात्पर्यमिदमस्ति असम्प्रज्ञातसमाधिरेव निर्बीजसमाधिः, निर्विकल्पकसमाधिः निरालम्बसमाधिः एव राजयोगः कथ्यते।

यदा साधकः तस्मिन् परमात्मनि लीयते तदा चिन्तयति अहमेव ब्रह्मविष्णुमहेश्वरादिस्वरूपात्मकोऽस्मि। **"नान्यत्मत्परं किञ्चिद्"**

---

1. योगसूत्रं तत्त्ववैशादी
2. योगतत्त्वोपनिषद्– 14.321

यदा योगी राजयोगे समाधिस्थो भवति, तदा इत्थमनुभवति यथाऽऽकाशे मेघाः आच्छादिता भवन्ति तदा भगवान् भास्करः नैव दृश्यते, यदा मेघा अपगता भवन्ति तदा भगवान् भास्करः दृग्गोचरो भवति, भगवान् भास्करः नित्यं स्वकीये स्थाने उदितो भवति। तथैव आत्मतत्त्वमपि भवजन्ममृत्युदुःखस्वप्नधारादिभिः नैव बद्धो भवति, स सर्वथा निर्लिप्तोऽस्ति।

अनेन प्रकारेण योगी एकाग्रचित्तेन तं भगवन्तं ध्यात्वा एकाग्र मनसा आत्मतत्त्वं साधयति। यदा योगी तत् ब्रह्मस्वरूपं प्राप्नोति तदा तस्य स्वरूपं वर्णयितुं नैव शक्यते। यतो हि योगी तदाकारो भवति, तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिर्भवतीति।

इत्यनेन प्रकारेण समाधिस्वरूपं प्रतिपादितमस्ति।

ध्यानयोगनिदर्शनम्

डॉ. संगीता खन्ना

यस्मिन्देशे वसेद्योगी ध्यायी योगविचक्षणः।
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः॥[1]

इत्यनेन स्मृतिवचनेन न केवलं योगिनां पवित्रातिशयत्वं किन्तु योगिजनप्रत्यासत्त्या तदीयदेशस्य तदीयबान्धवानाञ्च पावनत्वं समुद्घोषितम्। समस्तदार्शनिकैः धर्माचार्यैस्तान्त्रिकाचार्यैरपि योगस्य सामर्थ्यविशेषः[2] दर्शितप्राय एव।

अनाद्यनेहसः भारतभुवौ योगस्य समृद्धपरम्परा मानवकल्याणप्रदा श्रेयस्करी वर्तते। तासु बद्धपरिकर्म इव संकल्पितं योगदर्शनं महर्षिपतञ्जलिना सूत्ररूपेण विरचय्य तत्फलं लोककल्याणाय समर्पितम्। श्रीमद्भाष्यकारैः टीकाकारैः तादृशफलान्तर्गतो रस आस्वादार्हावस्थां प्रापितः। जनास्तत्रत्य रसास्वादं गृह्णीयुः। अद्यतनीयां परिस्थितिं परिलक्ष्य न केवलं योगप्रचारस्य परन्तु योगाभ्यासस्य नितरामावश्यकता प्रतीयते। तदर्थमावश्यकमस्ति यद्योगमार्गानुसरणपरायणी समीहा जागृयात्।

भौतिकसमृद्धेरुग्रातपसन्तप्तानां नानाविधोपप्लवग्रस्तानां कायिकमानसिकव्याधिग्रस्तानां जनानाङ्कृतेऽधुना योगात्मकं रसायनमेव कषायहरण-दैन्यदलन-व्याधिहरण-चित्तप्रसादन-मोक्षसाधनक्षममस्तीति सार्वजनीनमतिः।

---

1. दक्षस्मृतिः, 7.45 ।

2.(क) प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्विषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ श्रीमद्भगवद्गीता, 6.45-46

(ख) योगात्संजायते ज्ञानं ज्ञानान्मुक्तिः प्रजायते। विष्णुपुराणम् 6.7.2

महर्षिपतञ्जलिप्रणीते योगदर्शने योगपथे प्रथमपदार्पणपराणा-मधिकारिणाङ्कृते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय[3] इत्यष्टावङ्गानि सोपानरूपाणि निर्दिष्टानि सन्ति। तेषु धारणाध्यानसमाधय-श्चान्तरङ्गाणि त्रीणि एकविषयाणि सन्ति 'संयम'[4] इति तान्त्रिकी संज्ञां दधते। संयमजयस्यास्य[5] महत्फलं विभूतिरूपं शास्त्रे प्रतिपादितम्। समाधिलाभे ध्यानस्य वैशिष्ट्यं विमृश्य तत्सम्बद्धं शास्त्रगह्वरे निहितं तत्त्वं प्रकाशयितुं गतिमती जाता मे लेखनी, आपरितोषाद् विदुषां न सार्थवतीति मन्ये।[6]

संयमः धारणाध्यानसमाधिसमुदाय इति तस्यैव फलं योगशास्त्रे वर्णितम्। समाधिसाधकं ध्यानं धारणासाध्यमिति पोष्यपोषकभावेन नियतपौर्वापर्यत्वानुरोधेनैकस्मिन्नेवालम्बने दृढ़ीभूतं सत् साधकं योगीं परपदं प्रापयति।

यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाधारदेशविशेषे बाह्ये वाभ्यन्तरे वा चित्तस्यैकाग्र्यं धारणा इत्युच्यते। बाह्यदेशेषु हरिहरादीश्वरविग्रहविशेषाः सूर्यचन्द्राग्न्यादिदेवताविशेषाश्च सन्ति।[7] आध्यात्मिकदेशविशेषेषु नाभिचक्र-हृदयपुण्डरीक-मूर्धस्थज्योति-नासिका-जिह्वाग्र-ताल्वादयः सन्ति।[8] चित्तस्य वृत्तिमात्रेण बन्धः 'धारणा' कीर्तिता, न तु ध्येयकल्पनया बन्धः धारणेति। तदा तु सा ध्यानादिसंज्ञान्तरमापद्येत। धारणायां स्थानविशेषस्य मौख्यमस्ति। अनाधारा धारणा नोपपद्यते। धारणास्वरूपफलविषयकोल्लेखः

---

3. योगसूत्रम् 2.29
4. देशबन्धश्चित्तस्य धारणा।
   तत्र प्रत्ययैकतानता ध्यानम्।
   तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। योगसूत्रम् 3.1-4
   त्रयमेकत्र संयमः।
5. तज्जयात् प्रज्ञालोकः। योगसूत्रम् 3.5
6. आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
   बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।। अभिज्ञानशाकुन्तलम् 1.2
7. योगसूत्रवृत्तिः, 3.1
8. योगसूत्रम्, व्यासभाष्यम् 3.1

मतमतान्तरेण शास्त्रेषु प्राप्यत एव। तत्र धारणादेशरूपेण षट्चक्राणां वैशिष्ट्यं परिलक्ष्य तेषां निरूपणस्योपक्रमोऽत्र– सुधीजनमनोमोदाय लाभाय च मया चिन्तितः।

शरीरेऽस्मिन् परिकल्पितानि षट्चक्राणि[9]– 1. मूलाधारचक्रम्, 2. स्वाधिष्ठानचक्रम्, 3. मणिपूरकचक्रम्, 4. अनाहतचक्रम्, 5. विशुद्धचक्रम्, 6. आज्ञाचक्रञ्चेति। एतत्सर्वोपरि मूर्ध्नि सहस्रारचक्रमस्ति, तदेव परं विश्रामस्थानमस्ति, तत्संप्राप्य न किञ्चित्प्राप्यान्तरं भवति।

षट्चक्रनिरुपणे सौन्दर्यलहर्यामन्यत्रापि सम्यग्विवृतमेतत्सर्वं ध्यानयोगविभावनम्। हठयोगप्रदीपिका–घेरण्डसंहिता–योगकुण्डलिन्यु–पनिषत्तन्त्रादिषु इदं षट्चक्रभेदनादिकं तत्तसम्प्रदायनुगणं तथा च कुत्रचित्कुण्ड–लिनीशक्तिजागरणनाम्नापि वर्णितम्। अत्र षट्चक्रस्थितिः, तत्र नाडीव्यवस्था, पद्मव्यवस्था, वर्ण–देवादिव्यवस्था ततः ध्यानफलञ्च, योगजिज्ञासूनां कृते एतेषां परिज्ञानमावश्यकमिति धिया निरूप्यन्ते।

प्रथमं चक्रस्थितिः ज्ञेया। शरीरे योनिपीठे 'मूलाधार' नामकं चतुर्दलकमलं चक्रं विद्यते , तत्र गणेशदेवस्वरूपे धारणां समासादयेत्। लिङ्गमूले 'स्वाधिष्ठान' नामकं षट्दलकमलं विद्यते, तत्र ब्रह्मदेवस्वरूपे धारणां विदध्यात्। तदनन्तरमस्ति नाभिप्रदेशे 'मणिपूरक' नामकं दशदलयुतं कमलं, तत्र विष्णुस्वरूपे धारणां कुर्यात्। हृदयप्रदेशे 'अनाहत' नामकं द्वादशदलयुतं कमलं विद्यते, तत्र रुद्रे धारणां समासादयेत्। अनन्तरमस्ति कण्ठप्रदेशे 'विशुद्ध' नामकं षोडशदलयुतं कमलं, तत्र सदाशिवस्वरूपे धारणां निर्वर्तयेत्। तदनु भ्रूमध्यप्रदेशे 'आज्ञाचक्र' नामकं द्विदलं कमलं विद्यते, तत्र विद्याशक्तिसहितपरमहंसगुरुदेवतायां धारणां सम्पादयेत्। एवं षट्चक्रानन्तरं परमविश्रामस्थलरूपं ब्रह्मरन्ध्रप्रदेशे 'सच्चिदानन्द' नामकं सहस्रारं कमलं विराजते तत्र ब्रह्मस्वरूपं धारयेदिति चक्रस्थितिः।

---

9. मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम्।
विशुद्धञ्च तथाज्ञां च षट्चक्राणि विभावयेत्।। तन्त्रसारः

सौदर्यलहर्यां किञ्चिद्व्युत्क्रमेण षट्चक्रवर्णनं पद्मदलाकाशादितत्त्व-शिवशक्तिनिर्देशसहितं कृतमिति विशेषस्तु तत्रैव द्रष्टव्यः।[10]

प्रक्रमेषु नाडीव्यवस्था[11] तु शरीरे पृष्ठभागे मूलाधाराद् ग्रीवान्तः पृष्ठाऽस्थिविशेषो मेरुरिति कथ्यते, तस्य वामभागे 'इडा' नाम्नी नाडी तथा च दक्षिणभागे 'पिङ्गला' नाम्नी नाडी वर्तते, मेरोर्मध्ये वर्तते 'सुषुम्णा' नाडी, सा च मूलाधाराद् ब्रह्मरन्ध्रगा, सहस्रदलकमलं सुषुम्णारहिते शून्यप्रदेशे ब्रह्मरन्ध्रसमवहितं स्थितं भवति। इडापिङ्गले उभे मूलाधारादारभ्याज्ञाचक्रान्तं प्राप्य वेणीबन्धरूपेण सर्वाणि चक्राणि संवेष्ट्य भ्रूमध्यान्नासारन्ध्रमिलिते इति। मेरुमध्यवर्तिसुषुम्णाया अन्तःस्थिता 'वज्रा' नाम्नी नाडी विद्यते, सा च नाडी सुषुम्णायाः ईषद् ह्रस्वास्ति, मेढ्रात् शिरसि परिणता भवति। वज्रायाः मध्ये "चित्रिणी" नाम्नी नाडी भवति, सा सूक्ष्मा लूतातन्तुसदृशी सकलमूलाधारा-दिचक्रविशेषान् संभेद्य तद्ग्रन्थनसंरचनाद्वारा देदीप्यते। चित्रिण्या अन्तःवर्तिनी 'ब्रह्म' नाडी विद्यते, सा मूलाधाराऽऽज्ञाचक्रयोर्मध्ये स्थिता विद्युत्प्रकाशात्मि-काऽतिसूक्ष्मा परब्रह्मद्वारभूता भवतीति। ब्रह्मनाड्याः आस्यमेव सुषुम्णायाः ग्रन्थिस्थानमस्तीति पद्मादिव्यवस्था ज्ञानार्थं चित्तबन्धस्य देशादिज्ञानार्थमपि ज्ञेयम्। यद्यपि पातञ्जलयोगदर्शने भाष्येऽपि चक्रादिकं न वर्णितम्, तथापि नाड्यः ध्यानकारणीभूतायाः धारणायाः देशविशेषरूपेण विभूतिनिरूपणप्रसङ्गे समुपवर्णिताः। यतः ध्यानाऽऽधारदेशं विना तु धारणा चित्तबन्धरूपा न सम्भवा।

अथ पद्मव्यवस्था वर्ण-देव-मण्डल-फलादियुता शास्त्रेषु यथोक्ता तदनुसारेण चक्रक्रमेण इत्थमस्ति-

10. महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे।। सौन्दर्यलहरी, 9

11.(क) गुदात्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः।
चतुरङ्गुलविस्तारं कन्दमूलं (मूलाधारं) खगाण्डवत्।। षट्चक्रनिरूपणम्, 8

(ख) नाड्यस्तस्मात् समुत्पन्ना सहस्राणां द्विससप्ततिरिति। षट्चक्रनिरूपणम्, 9

(ग) नाडी स्वरूपनामस्थित्यादिकंरुद्रयामले द्रष्टव्यम्।
रुद्रयामलम्, 27, 50-53

मूलाधारचक्रं योनिपीठे स्थितमस्ति, तन्मूलाधारसुषुम्णयोः सन्धिस्थले संलग्नं पद्मं लिङ्गमूलादधोऽवधिसन्निवेशम् अपानस्थानारूढं रक्तवर्णं चतुर्दलं व-श-ष-स इति वेदवर्णचतुष्टययुतमधोमुखमस्ति। पद्मस्यास्य कर्णिकायां चतुष्कोणरूपं पृथिवीमण्डलं वर्तते, यच्च पीतवर्णमष्टदिग्व्यापिप्रकाशवदष्ट-सूक्ष्मशिखरैः विलसति। तस्य मध्ये पृथिव्याः स्वबीजं "लं" इत्याकारकं पीतवर्णं द्विबाहु वज्रहस्तं गजेन्द्राधिरूढं समास्ते। तद्बीजस्याङ्के गणपतिदेवः राजते, तत्र कर्णिकायां रक्तपद्मोपरि शुद्धिबुद्धिप्रदा रक्तवर्णा सिद्धिदेवी समराजते।

अथ सुषुम्णायाः मुखाद् द्व्यङ्गुलोर्ध्वं लिङ्गमूलादधो वज्रायाः मुखं भवति, तच्च मूलाधारपद्मकर्णिकायाः मध्ये गह्वरान्तवर्ति भवति। तस्मिन्मुखे "त्रिकोणं" विद्यते, तच्च विद्युत्प्रकाशं मदनाधिष्ठानं कन्दर्पनामवायोः निवासस्थानं कोटिसूर्यप्रकाशं रक्तवर्णमेव भवति। तस्य त्रिकोणस्य मध्ये स्वयम्भूः शिवलिङ्गं विद्यते, तदुपरि बिसतन्तुसदृशी सूक्ष्मा जगन्मोहिनी स्वमुखेन ब्रह्मद्वारमुखमाच्छादयन्ती स्वयमेवामृतं पिबन्ती शङ्खस्य वेष्टनाकारतुल्या नवीनविद्युद्रेखासमप्रकाशात्मिका सुप्तसर्पवत्कुण्डलिताकारा स्वयम्भूशिवस्योपरि सार्धत्रिवृत्ताकृतिर्कर्णप्रियं मधुरं गुञ्जारं कुर्वती "कुण्डलिनी" भवति। तदूर्ध्वं राजते परमा शक्तिर्यस्याः भासेन सकलं ब्रह्माण्डं भासते। सा नित्यज्ञानप्रदास्तीति।

सौन्दर्यलहर्यां मूलाधारे चतुर्दलपद्ममध्ये लास्यपरया समयाख्यया देव्या सह नवरसमहाताण्डवनटेश्वरस्य धारणा भावना वन्दना अभिमता।[12]

एतत्सर्वं ध्यात्वा योगी सर्वविद्याविनोदी, वाचस्पतिः, नरेन्द्रः, नित्यानन्दविशिष्टो भवति।[13]

---

12. तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरसमहाताण्डवनटम्।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया।
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम्।। सौन्दर्यलहरी- 41

13. षट्चक्रनिरूपणम्, 11

स्वाधिष्ठानचक्रं लिङ्गमूलप्रदेशस्थं सिन्दूरवर्णं सुषुम्णान्तर्वर्तिनी-ब्रह्मनाड्यादिमध्यवर्ति विद्युत्प्रभं व-भ-म-य-र-ल-इति षड्वर्णयुक्तषड्दल-पद्ममस्ति। तस्य मध्ये शुक्लवर्णमर्द्धचन्द्रयुक्तं मकराधिरूढं वरुणमण्डलमास्ते, तस्य बीजं 'वं' इत्याकारकमस्ति। बीजस्य मध्ये नवोदितसूर्यसमप्रभः चतुर्बाहुश्चतुर्मुखः सृष्टिकारी दण्डकमण्डल्वक्षसूत्राभयहस्तो ब्रह्मदेवः रक्तवर्णया सावित्र्या सह राराजते।

अस्मिन् चक्रे ध्यानयोगी मोहरहितः सकलरिपुरहितः गद्यपद्यप्रबन्ध-रचनासमर्थो भवति।[14]

मणिपूरकचक्रं स्वाधिष्ठानादूर्ध्वं नाभिमूले भवति, तच्च अर्द्धचन्द्रकृष्णवर्णबिन्दुसहितं ड-ढ-ण-त-थ-द-ध-न-प-फ-इति दशवर्णयुक्तदशपद्ममस्ति। तस्य कर्णिकायां त्रिकोणाकारं वह्निमण्डलं रक्तवर्णं त्रिकोणावच्छिन्नस्वस्तिकायुक्तं भवति। तन्मध्ये 'रं' इत्याकारकं वह्निबीजं रक्तवर्णं मेषाधिरूढं चतुर्भुजं वज्रशक्तिवराभयधरं विद्यते। बीजमध्ये गरुडवाहनः शंखचक्रगदापद्मधारी नीलप्रकाशमनोज्ञकान्तिः पीतवस्त्रः वनमालादिधरश्चतुर्भुजो विष्णुः लक्ष्म्या सहितो विराजते।

अस्मिन् चक्रे ध्यानाद् योगिनः जिह्वोपरि सरस्वती वसति। वाक्चातुर्यं रक्षाकरणसामर्थ्यमपि सिद्ध्यति।

अनाहतचक्रं हृदि बन्धुककान्त्युज्ज्वलं सिन्दूराभं सबिन्दु-क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ-इतिद्वादशवर्णयुक्तद्वादशदलं कल्पवृक्षतुल्य-वाञ्छितप्रदं वर्तते, तत्कर्णिकायां धूमाभं षट्कोणाकारवायुमण्डलं वर्तते, तदुपरि सूर्यमण्डलमस्ति, तन्मध्ये विद्युत्कोटिनिभं त्रिकोणं वर्तते, तन्मध्ये 'यं' इति वायुबीजं कृष्णसाराधिरूढं धूमधूम्राभं चतुर्भुजं वर्तते अत्र कर्णिकायां रूद्रो वृषारूढो रक्तवर्णः सृष्टिसंहर्ता विराजते, तत्र च नीलवर्णा त्रिवक्रा

---

14. स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो
मनुष्यस्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानुतुल्यप्रकाशो
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोहलक्ष्मीः।। षट्चक्रनिरूपणम्- 18

त्रिनेत्रा चतुर्भुजा रुद्राणी शक्तिर्विराजते, एतत्कर्णिकाया अधो रक्तवर्णोर्ध्वमुखाष्टदलपद्ममस्ति तत्र कल्पवृक्षरत्नवेदीचन्द्रातपपताकाद्यलंकृतं मानसपूजास्थानमस्तीति।

अनाहतचक्रं ध्यात्वा योगीशो ज्ञानीशो जितेन्द्रियः काव्याम्बुधारावह श्चेत्यादिर्भवतीति।।

विशुद्धचक्रं कण्ठमूले षोडशदलं धूमधूम्ररूपम् आरक्तकेशरं रक्तवर्णसबिन्दुकं षोडशस्वरयुक्तं वर्तते, तत्कर्णिकायां नभोमण्डलं वृत्तरूपं शुक्लवर्णं वर्तते, तन्मध्ये त्रिकोणमस्ति, तत्र चन्द्रमण्डलं राजते, तदुपरि 'हं' इति नभोबीजं शुक्लवर्णं शुक्लाम्बरपरिधानं शुक्लगजारूढं चतुर्भुजं पाशाङ्कुशवराऽभयधरं वर्तते, तन्मध्ये वृषभोपरि स्थितमहासिंहासने सदाशिवोऽर्धनारीश्वरत्वादर्धाङ्गसुवर्णाभाऽर्धाङ्गशुक्लाभः पञ्चवक्त्रस्त्रिनेत्रो दशभुजः व्याघ्रचर्माम्बरो भस्मलिप्तसर्वाङ्गो नागहारशोभितः सुधास्राव्यधोमुखार्ध-चन्द्रशेखरो विराजते। एतत्कर्णिकायां चन्द्रमण्डलमध्ये सिंहोपरिस्थिता 'पार्वतीशक्तिः' सात्त्विकी देवी शुक्लवर्णा चतुर्भुजा पीताम्बरा पञ्चवक्त्रा त्रिनेत्रेति विराजते, तदेतत्कमलं निर्वाणमुक्तिद्वारमिति गीयते योगिभिः, अत्र च 'बुद्धिशक्तिः' चतुर्भुजा श्वेतवर्णा वेदहस्ता विराजते, तत्र च तदधः स्थिरदीपज्योत्याकारहंसरूपी जीवात्मा विराजते।

अस्मिन् चक्रे चित्तधारणात् त्रिकालदर्शी चिराञ्जीव्यादिर्भवति।।

आज्ञाचक्रं भ्रकुटिप्रदेशे शुभ्रं कर्बुरवर्ण-ह-क्षे-त्यक्षरद्वययुक्तद्विपत्रं वर्तते, तत्कर्णिकायां चक्राधिष्ठात्री विद्याशक्तिः शुक्लवर्णा श्वेतषड्वक्त्रा त्रिनेत्रा षड्भुजा वराऽभयाऽक्षमालावेदाङ्गविद्यापुस्तकधरा शुक्लपद्मोपरि-स्थिताऽस्ति। एतत्पद्मस्य त्रिकोणे प्रणवाऽऽकृतिरन्तरात्मा प्रदीपाऽऽभज्योतिर्वर्तते, तस्य चतुर्दिक्ष्वन्तरिक्षे ज्योतिःस्फुलिङ्गबिम्बैर्वेष्टितो ज्वलद्दीपसदृशेन स्वतेजसा मूलाधारादिब्रह्मरन्ध्रान्तप्रकाशकोऽस्ति, तदूर्ध्वं चन्द्रमण्डले हंसक्रोडे परमहंसगुरुदेवताख्यं गुणातीतानन्दं मूलाक्षरं ब्रह्म सशक्तिकं राजते।।

आज्ञाचक्रे धारणाद् योगी अभीष्टसिद्धिमान् जन्मस्थितिलयकर्तेत्यादि-र्भवतीति। एतच्चन्द्रमण्डले चन्द्रार्धस्तदुपरि मकारस्तदुपरि प्रणवस्तदुपरि

नाद इति। इह मण्डले चित्ते लीने सति परमगुरुसेवालभ्यां निरालम्बां मुद्रां बद्ध्वा योगी प्राणजीवबुद्धीनां कलाः पश्यतीति।[15]

सहस्त्रारचक्रे योगी षट्चक्रभेदानन्तरमेव प्रविशिति। सहस्त्रदलकमलम् उक्तमहानादादूर्ध्वं महाशंखिन्याश्च शिखरसमदेशे शून्यनिरालम्बे विसर्गस्याऽधः प्रकाशरूपं पूर्णचन्द्रशुभ्रमधोमुखं केवलानन्दरूपम् अकारादिपञ्चाशद्वर्णै-र्विंशतिप्रकारेण परिलसितदलं तत् समास्ते।।[16]

सहस्त्रदलकमलमध्ये शशरहितः सम्पूर्णश्चन्द्रः स्फुरत्ज्योत्स्नाजालः समास्ते। चन्द्रमध्ये विद्युत्प्रभं त्रिकोणं विद्यते त्रिकोणमध्ये सकलसुरगणैः सेवितं गुह्यं 'शून्याकारं' वर्तते। तद्ब्रह्मात्मकशून्याकारात् परमममृतं क्षरति, तदिह स्थाने परं ब्रह्म निवसति, स भगवान् निर्मलमतये योगिने स्वात्मज्ञानं दिशति, च स परमात्मा बहुनाम्ना प्रसिद्धः।[17]

अत्र सहस्त्रदलचक्रे चन्द्रस्य प्रसिद्धा 'अमा' नाम्नी षोडशी कला विद्यते, सा च शुद्धाऽतिसूक्ष्मा क्षयोदयरहिताऽधोमुखी विद्युत्प्रकाशा पीयूषधाराधराऽस्तीति, तस्या मध्यभागे 'निर्वाण'नाम्नी कला सूक्ष्मतरा भूतानामधिदेवतारूपा नित्यबोधोदया द्वादशादित्यप्रभा चन्द्रलेखेव भङ्गुरा समास्ते। निर्वाणकलाया मध्ये 'निर्वाण'नाम्नी शक्तिरास्ते सा च परब्रह्मशक्तिरूपा कोटिसूर्यप्रकाशा त्रिभुवनजननी सूक्ष्मतमा प्रेममयी मुनिमनःसु तत्त्वज्ञानं वहन्ती विद्यते, तस्या मध्ये परब्रह्मपदं नित्यानन्दं शाश्वतं सकलसुखमयमास्ते।

---

15. इह स्थाने विष्णोरतुलपरमामोदमधुरे समारोप्य प्राणं प्रमुदितमनाः प्राणनिधने। परं नित्यं देवं पुरुषमजमाद्यं त्रिजगतां पुराणं योगीन्द्रः प्रविशति च वेदान्तविदितम्।। षट्चक्रनिरुपणम्, 38

16. "इन्दुर्ललाटदेशे च तद्वद्ध्र्वेबोधिनी स्वयं। तद्द्ध्र्वे भाति नादोऽसावर्धचन्द्राकृतिः परः।। तदूद्ध्र्वे च महानादो लाङ्गलाकृतिरुज्वलः। तदूद्ध्र्वे च कला प्रोक्ता 'आञ्जी'ति योगिवल्लभा।। जन्मनी तु तदूद्ध्र्वे च यद्गत्वा न निवर्तते।।" षट्चक्रनिरूपणम्, 40

17. इदं ब्रह्मरन्ध्रस्थं सहस्त्रदलकमलं केचित्–
शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा वदन्तीति प्रायो हरिहरपदं केचिदपरे।
परं देव्या देवीचरणयुगलाम्भोजरसिका मुनीन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम्।।
षट्चक्रनिरूपणम्, 45

केचित् तच्छिवपदमिति, अन्ये विष्णुपदमिति, अन्ये मोक्षप्रदं हंसपदमिति वदन्ति।

तदेतादृशचक्रेषु तद्देवतासु कर्णिकासु त्रिकोणाधिदेवेषु शक्तिषु वा यत्र क्वापि ध्यानं कुर्यात्। एवं नासिकाऽग्रे गन्धसंविदं धारयेत्, जिह्वाग्रे रससंविदं धारयेत्, ताल्वग्रे रूपसंविदं धारयेत्। जिह्वामध्ये स्पर्शसंविदं धारयेत्, जिह्वामूले शब्दसंविदं धारयेत्, इत्येवं शरीरान्तप्रदेशे यत्र कुत्राऽपि धारणां विदध्यादिति, उक्तं च विष्णुपुराणे–

प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम्।
वशीकृत्य ततः कुर्यात् चित्तस्थानं शुभाश्रये।। इति।[18]

बाह्यप्रदेशेऽपि धारणा कर्तव्या भवति यथा विष्णुपुराणे सविशेषं सर्वं स्पष्टमुक्तमेव–

मूर्तं भगवतो रूपं सर्वोपाश्रयनिस्पृहम्।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते।।

तच्च मूर्तं हरेः रूपं यद्विचिन्त्यं नराधिप!
तच्छ्रूयतामनाधारा धारणा नोपपद्यते।।

प्रसन्नवदनं चारुपद्मपत्रनिभेक्षणम्।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ।।

समकर्णान्तविन्यस्तचारुकुण्डलभूषणम्।।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ।।

वलीत्रिभङ्गिना भग्ननाभिना चोदरेण च।
प्रलम्बाष्टभुजं विष्णुमथवाऽपि चतुर्भुजम्।।

समस्थितोरुजङ्घं च स्वस्तिकाङ्घ्रिबरांबुजम्।
चिन्तये तद् ब्रह्मभूतं तं पीतनिर्मलवाससम्।।

18. विष्णुपुराणम् 6.7.45

किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गचक्रगदाखड्गशंखाऽक्षबलयान्वितम्।।

चिन्तयेत् तन्मयो योगी समाधायात्ममानसम्।
तावद्यावद् दृढीभूता तत्रैव नृप! धारणा।।[19]

आभ्यान्तरे बाह्ये वा विषये यत्र-यत्र धारणा कृता भवेत् तत्र तत्र देशे चित्तवृत्तेरेकाग्रता ध्यानमुच्यते[20] अर्थात् धारणायाः देशविशेषे स्थानविशेषे वा ध्येयालम्बनस्य प्रत्ययस्य यः प्रत्ययान्तरापरामृष्टः सदृशः प्रवाहो भवति, स एव ध्यानमिति।[21] ध्येयस्तु तत्र स्थूलसूक्ष्मादिजीवेश्वरविषयो भवति, परन्तु कालावच्छिन्नता तत्र बलवती सती ध्यानं द्रढयति। तदिदं ध्यानं बाह्याभ्यन्तरभेदाद् द्विविधमुक्तम्। उपनिषदि सगुणनिर्गुणभेदाद् द्वैविध्यं प्रतिपादितम्।[22] तदेतद्ध्यानयोगमारुढः सन्निरन्तराभ्यसन्साधकः परमात्मना युज्यते योगीति संज्ञां धत्ते।

ध्यानमेव यदा ध्येयविषयाकारेणैव साक्षिणि निर्भासते, न तु प्रत्ययाकारेण, तदा चित्तस्य ध्येयस्वरूपावेशेन 'अहमिदं चिन्तयामी' त्येवंप्रत्ययाकारवृत्त्यन्तरानुदयाद् वृत्त्यन्तररहितं स्वरूपस्य शून्यमिव भवति अर्थात् ध्येयस्वरूपाकारमात्रं भवतीति, तदा समाधिरित्युच्यते।[23] ध्यानसमाधयोर्विभागोऽत्र संक्षेपेणायमस्ति[24] यद्ध्यातृध्येयध्यानानीतिस्वरूप-

19. विष्णुपुराणम् 6.7.77-85
20. तत्र प्रत्ययैकतानता ध्यानम्। योगसूत्रम् 3.2
21.(क) तद्रूपप्रत्ययैकाग्र्यं संततिश्चान्यनिस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप।। वायुपुराणम् 2.2.80
(ख) देशावस्थितिमालक्ष्य बुद्धेर्या वृत्तिसंततिः।
वृत्त्यन्तरैरसंस्पृष्टा तद्ध्यानं सूरयो विदुः।। ईश्वरगीता, 9
22.(क) अथ ध्यानम्। तद्विविधं सगुणं निर्गुणञ्चेति। सगुणं मूर्तिध्यानं
निर्गुणमात्मयाथात्म्यम्। शाडिल्योपनिषद्, 1.10.1
(ख) सगुणध्यानमेवं स्यादणिमादिगुणप्रदाम्।
निर्गुणं खमिव ध्यात्वा मोक्षमार्गं प्रपद्यते।। दत्तात्रेययोगशास्त्रम्, 246
23. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। योगसूत्रम्, 3.3
24. तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते।। विष्णुपुराणम्, 6.7.10

त्रयनिर्भासकं ध्यानम्, ध्यातृध्येयध्यानानीतिस्वरूपत्रयरहितः समाधिरिति। अष्टमाङ्गरूपस्यास्य समाधेः अङ्गिसम्प्रज्ञातयोगादयं भेदो वर्तते यदत्र चिन्तारूपतया निःशेषतो ध्येयस्य स्वरूपं न भासते। अङ्गिनि तु सम्प्रज्ञाते समाध्यविषया अपि विषया भासन्ते। साक्षात्कारोदये सत्यैकाग्र्यकाले सम्प्रज्ञातयोगो भवति, अन्यदा तु समाधिमात्रं तत्पूर्वन्तु ध्यानमेव। असम्प्रज्ञातयोगे न किञ्चित्प्रज्ञायते, संस्कारशेषं चित्तं स्वकारणे प्रलीयते। चित्ते प्रलीने सति शरीरवियोगस्तु सुतरामेव। नित्यशुद्धबुद्धमुक्तस्वभावः पुरुषः स्वात्मदर्शनपरः भगवत्परायणो वा महामुक्तो भवतीति योगसरणिः।

योगसरणिरियं व्यावहारिकी वैज्ञानिकी च। अस्यान्निष्णातः योगी पिण्डज्ञानेन ब्रह्माण्डज्ञानपारीणः तद्रहस्योद्घाटनक्षमो भवति। अद्यतनसमये आध्यात्मिकामुष्मिकपरिष्काराय योगशरणमेवाङ्गीकरणीयम्।

ऋते ध्यानान्न मुक्तिः

डॉ. अनेकान्तकुमारो जैनः

जैनसिद्धान्तस्य प्रवर्तकाः परमयोगिनः प्रथमतीर्थंकराः ऋषभदेवाः सन्ति। जैनमतानुसारमीश्वरः जगतः कर्त्ता, स्रष्टा, शास्ता वा नास्ति, अपि तु सः सर्वज्ञ आनन्दमयश्च वर्तते। सः शुद्धः, सिद्धः, पञ्चभौतिकशरीरेण विरहित, एकोऽविनाशी, अपरिवर्तनीयश्च वर्तते। अर्थात्तस्य नाशः (जन्ममृत्युर्वा) न कदापि भवितुमर्हति। नापि सः च्युतो भूत्वा भ्रष्टः भवितुमर्हति। प्रत्येकस्य विशिष्टात्मनोऽन्तिमं प्रयोजनं पवित्रशुद्धरूपेण परमेश्वररूपेण स्थितिरेव। यस्मिन् परमात्मत्नः सर्वे गुणास्सन्ति। परन्त्वेषु गुणेषूत्पादकत्वशासकत्वादिरूपाः गुणाः जैनदार्शनिकैः नानुमताः।

आत्मनः त्रिविधत्वम्

जैनदर्शने बहिरात्मान्तरात्मपरमात्मभेदेन त्रिविधात्मा भवति। मूढो मिथ्यात्वरागादिपरिणतो बहिरात्मा, विचक्षणो वीतरागनिर्विकल्पस्वसंवेदनज्ञान परिणतोऽन्तरात्मा, ब्रह्मा शुद्धबुद्धैकस्वभावः परमात्मा। शुद्धो रागादिरहितो बद्धोऽनन्तज्ञानादिचतुष्टयसहित इति शुद्धबुद्धस्वभावलक्षणम्। एवमात्मा त्रिविधो भवति।

ध्यानं किमर्थम्

प्रत्येकमात्मा स्वभावेनानन्तदर्शन-ज्ञान-वीर्य-सुखादीनाम् अनन्तगुण-शक्तीनाञ्च अखण्डपिण्डस्वरूपमस्ति। वैभाविकपरिणतिषु लिप्तताकारणात् शारीरिकमानसिकाध्यात्मिकदुःखपीडितो भवति। वैभाविकपरिणतिकारणादेव जीवनस्यानन्तशक्तयस्तस्माद् दूरे सन्ति। ता एवं शक्तीः पुनः प्राप्तुं परोपयोगात् अपाकृतस्य चित्तस्य निरोधो ध्यानमुच्यते।

---

* स. आचार्यः–जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रिदिराष्ट्रिय संस्कृत विद्यापीठम् नवदेहली–110016

ध्यानं व्यापकार्थयुतं पदमस्ति। जैनसाधनापद्धतौ इदं सर्वाधिकं महत्त्वपूर्णं गण्यते। संयमस्य चरित्रस्य च वृद्धये मोक्षस्य प्राप्तये च इदं सर्वोत्तमं साधनमस्ति। अस्य महत्त्वमैतिहासिकता च एतेनैव सिद्ध्यति यत् प्राचीनातिप्राचीना अपि जैनप्रतिमाः खड्गासनयुक्ता वा पद्मासनयुक्ता वा सर्वाः अपि ध्यानमुद्रास्थिता एव प्राप्यन्ते। ध्यानमेवात्र चरमोत्कर्षत्वेन स्वीकृतमस्ति।

ध्यानस्वरूपम्–

एकाग्रतैव ध्यानम्।[1] उत्तमसंहननवतः एकस्मिन्नेव विषये चित्तवृत्तेः निरोधो ध्यानमस्ति।[2] अस्यायं भावो यत् व्यक्तिः यदा यमेव भावं चिन्तयति तस्मिन्नेव तन्मयो भवति समभावधारणेन कर्मणां नाशयितृ ध्यानं भवति।[3] इदं मोक्षप्राप्तेः प्रधानं कारणमस्ति, यतः पापमहावनदहने अग्निसमं वर्तते।[4] ध्यानं साम्यभावमिति प्रतिपादयता कथितं यत् ध्यानयुक्तस्य योगिनः द्वैतभावो नश्यति, सः सांसारिकप्रपञ्चादुर्ध्वस्थः सन् चित्स्वरूपस्य आत्मनः ध्याने लीनो भवति।[5] अतः इदं संवरस्य निर्जरायाश्च कारणमपि कथितम्।[6] वस्तु इदं चित्तं ध्याने अन्तर्मुहूर्तादधिकं न तिष्ठति अतः ध्यानस्य कालः अन्तर्मुहूर्तमेवेति कथितमस्ति।[7]

ध्यानभेदाः–

ध्यानं प्रशस्ताप्रशस्तभेदेन द्विविधमस्ति। इदं हि सर्वेषां जीवानामिष्टा–

---

1. (क) एकाग्रचिन्ता निरोधो यस्तद्ध्यानं भावना परा।
   अनुप्रेक्षार्थचिन्ता वा तज्ज्ञैरभ्युपगम्यते।। –ज्ञानार्णवः, 25/16
   (ख) चित्तसेगग्गया हवई झाणं–ध्यानशतकम्, आवश्यकनिर्युक्तिः 1459;
2. तत्त्वार्थसूत्रम्, 9/27; चारित्रसारः, 166/6; तत्त्वानुशासनम्, 56
3. यदैव संयमी साक्षात्समत्वमवलम्बते।
   स्यात्तदैव परं ध्यानं तस्य कर्मौघघातम्।।4।।
4. ध्यानमेवापवर्गस्य मुख्यमेकं निबन्धनम्।
   तदेव दुरितात्रतगुरुकक्षहुतासनम्।। –ज्ञानार्णवः 25/7
5. सर्गः 22, साम्यवैभवम्, ज्ञानार्णवः
6. तद्ध्यानं निर्जराहेतुः संवरस्य च कारणम्। –तत्त्वानुशासनम्, 56
7. तत्त्वार्थसूत्रम्, 9/27; योगशास्त्रम्, 4/116

निष्टफलप्राप्तिकारणमस्ति। येन ध्यानेन रागविरहितभावेन वस्तुस्वरूपचिन्तनं क्रियते तत् प्रशस्तध्यानमस्ति। वस्तुस्वरूपस्य यथार्थमजानतः रागद्वेषमोहयुक्ता-प्रवृत्तिः अप्रशस्तध्यानं कथ्यते। जैनागमे ध्यानस्य मुख्यतया चत्वारो भेदाः वर्णिताः सन्ति। ते यथा–आर्त्तरौद्रधर्मशुक्लाश्चेति।[8]

आर्त्तध्यानस्वरूपम्–

ऋतं दुखं, संकलेशस्तत्रभवमार्त्तम्।। आर्त्तञ्च यद्ध्यानं तदार्त्तध्यानम्। एतच्चतुर्विधं भवति। तथा हि अप्रियवस्तुनः सम्बन्धे सति तन्निवृत्यर्थं रात्रिन्दिवं यच्चिन्तनं, तदात्मकं ध्यानमाद्यम्। येन केन वा रोगेण व्याकुलिते सति तन्निराकरणार्थं रात्रिन्दिवं तद्विषयकं चिन्तनं द्वितीयं ध्यानम्। अभीष्टवस्तुनो विप्रयोगे सति, पुनस्तत्प्राप्त्यर्थं यच्चिन्तनं रात्रिन्दिवं, तत्तृतीयम्। तथा च चक्रवर्त्यादीनां विभवदर्शनात्, ममाप्यस्य तपसः फलं परलोके एवंविधमेव स्यादित्यात्मकं चिन्तनं चतुर्थमार्त्तध्यानमिति।

रौद्रध्यानस्वरूपम्

रौद्रं यद्ध्यानं तद्रौद्रध्यानमिति। क्रूरो–नृशंसो वा रुद्रस्तस्येदं रौद्रम्। एतदपि चतुर्विधम्–अत्र 'येन केन प्रकारेण यंत्रिविशेषेणोपायविशेषण वा, प्राणिनो व्यापाद्याः' इत्यात्मकं चिन्तनं हिंसासुबन्ध्याख्यं प्रथमं रौद्रध्यानम्। यैश्च कूटसाक्षिदानादिविभिन्नोपयैः परो वञ्च्यते, तेषामुपायानां चिन्तनं द्वितीयमनृतानुबन्धिरौद्रध्यानम्। तथा च यैर्यैरुपायैः घुर्घुरूक–कर्तरिका छेदक खात्रादिभिः परधनमादीयते, तेषां चिन्तनं स्तेयानुबन्धी तृतीयं रौद्रध्यानम्। धनधाान्यादिपरिग्रहसंरक्षणार्थं राात्रिन्दिवं तदुपायानां चिन्तनं चतुर्थं विषयानन्दी रौद्रध्यानम्।

धर्मध्यानस्वरूपम्

धर्मेण युक्तं धर्म्यं भवति। अतः धर्मेण युक्तं ध्यानमेव धर्म्यध्यानमस्ति। रागद्वेषमूलकान् समस्तान् पदार्थान् परित्यज्य श्रेयोमार्गस्थितः साधकः साम्यतायाः अभ्यसनाय यदेव ध्यायते तद् धर्म्यध्यानमस्ति। अस्य चत्वारि चरणानि सन्ति–आज्ञाविचयः अपायविचयः विपाकविचयः संस्थानविचयश्चेति।

---

8. तत्त्वार्थसूत्रम्, 9/28

संस्थानविचयधर्म्यध्यानस्यापि चत्वारो भेदाः सन्ति–पिण्डस्थं, पदस्थं रूपस्थं, रूपातीतञ्चेति। मन्त्रवाक्येषु स्थितिः पदस्थं, निजात्मनः चिन्तनं पिण्डस्थं, सर्वचिद्रूपस्य चिन्तनं रूपस्थं, निरञ्जनस्य ध्यानं रूपातीतध्यानञ्च वर्तन्ते।

शुक्लध्यानस्वरूम्

ध्यानस्य चरमावस्था शुक्लध्यानमस्ति। अस्मिन्नेव पूर्णतः ध्यानसिद्धिर्भवति। एकाग्रता निरोधश्चात्र पूर्णतामापद्येते। एतामेव दशां सम्प्राप्य ध्यानिनः लक्ष्यसिद्धिर्भवति। ग्रन्थकारोऽस्य लक्षणम् एवं वदति–

निष्क्रियं करणातीतं ध्यानधारणवर्जितम्।
अन्तर्मुखं च यच्चित्तं तच्छुक्लमिति पठ्यते॥4॥[9]

अभिप्रायोऽयमत्र यत् निष्क्रिया इन्द्रियातीता ध्यानधारणाविहीना अन्तर्मुखिनी मनोवृत्तिः शुक्लध्यानं कथ्यते। इयमात्मनो विशुद्धाऽवस्था वर्तते। सर्वार्थसिद्धिकारोऽपि वदति यत् शुचिगुणयुक्तं यत् तदेव शुक्लध्यानमस्ति। तथा मलिनतायां निर्गतायां वस्त्रं शुचि सत् शुक्लं कथ्यते तथा सर्वमलविवर्जिता निर्मलगुणयुक्ता आत्मपरिणतिश्चापि शुक्ला वर्तते।[10] इत्यमेवात्मपरिणतिः शुक्लध्यानं कथ्यते।

इदं शुक्लध्यानं कषायमलस्य क्षयेनोपशमेन वा लभ्यते।[11] धर्मध्यानस्य प्रक्रियायाः अनन्तरमेव शुक्लध्यानं प्रारभते।[12] अस्यां प्रक्रियायां सम्प्राप्य बाह्यध्येयेन प्रयोजनं न भवति। साधकेन आत्मातिरिक्तं न किमपि दृश्यते।

शुक्लध्यानस्य भेदाः

शुक्लध्यानस्य चत्वारो भेदाः सन्ति।[13] ते यथा–

---

9. ज्ञानार्णवः 42/4
10. (क) सर्वार्थसिद्धिः 9/28/446/11
    (ख) राजवार्तिकम् 9/28/627/31
11. ज्ञानार्णवः, 42/6
12. ज्ञानार्णवः 42/3
13. ज्ञानार्णवः 42/9-11, तत्त्वार्थसूत्रम् 9/39, द्रव्यसंग्रहटीका 48/199

(क) पृथक्त्ववितर्कसवीचारः

(ख) एकत्ववितर्कावीचारः

(ग) सूक्ष्मक्रियाऽप्रतिपाती

(घ) व्युपरतक्रियानिवृत्तिः (समुच्छिन्नक्रिया)

शुक्लध्यानस्यैते चत्वारो भेदा एव अधिकतरैराचार्यैः स्वीकृताः सन्ति। किन्तु हरिवंशपुराणे शुक्लपरमशुक्लौ इति द्वौ भेदौ उक्तौ। पृथक्त्ववितर्कवीचारः एकत्ववितर्कावीचारश्च शुक्लस्य, सूक्ष्मक्रियाऽप्रतिपाती व्युपरतक्रिया निवृत्तिश्चेति परमशुक्लध्यानस्य भेदत्वेन प्रोक्ताः सन्ति।[14] चारित्रसारेऽपि ईदृशमेव वर्णनं कृतमस्ति।[15]

(क) पृथक्त्ववितर्कवीचारशुक्लध्यानस्वरूपम्

पृथक्त्वं तत्र नानात्वं वितर्कः श्रुतमुच्यते।
अर्थव्यञ्जनयोगानां वीचारः सङ्क्रमः स्मृतः॥15॥[16]

नानात्वं वा भिन्नत्वं वा नाम पृथक्त्वम्, श्रुतज्ञानं नाम वितर्कः अर्थव्यञ्जनयोगानाञ्च सङ्क्रमणं वीचारश्चेति कथ्यन्ते। यस्मिन् ध्याने पृथक्-पृथक्तया श्रुतस्य विचारः सङ्क्रमणं वा भवति, तत् पृथक्त्ववितर्का वीचारशुक्लध्यानं कथ्यते।।[17] इदं ध्यानं पृथक्त्व-वीचार वितर्कः समेतं भवति, अतः इदं पृथक्त्ववितर्कवीचारध्यानं कथ्यते।[18] इदं शुक्लध्यानस्य प्रथमं चरणं वर्तते। एतत् त्रयाणां योगयुक्तानां (मनोवाक्कायानां) मुनीनां भवति।[19] यतः अत्र योगः परिवर्तते।

अर्थादर्थान्तरापत्तिरर्थसङ्क्रान्तिरिष्यते।
ज्ञेया व्यञ्जनसङ्क्रान्तिर्व्यञ्जनाद्व्यञ्जने स्थितिः॥

---

14. शुक्लं परमशुक्लञ्च। -हरिवंशपुराणम्, 56/53-54
15. चारित्रसारः 203/4
16. ज्ञानार्णवः 42/15
17. पृथक्त्वेन वितर्कस्य वीचारो यत्र विद्यते।
    सवितर्कं सवीचारं सपृथक्त्वं तदिष्यते।। -ज्ञानार्णवः 42/13
18. सवितर्कं सवीचारं सपृथक्त्वं च कीर्तितम्।।13।। -ज्ञानार्णवः 42/9
19. तत्र त्रियोगिनामद्यं। -ज्ञानार्णवः, 42/12

स्यादियं योगसङ्क्रान्तिर्योगाद्योगान्तरे गतिः।
विशुद्धध्यानसामर्थ्यात् क्षीणमोहस्य योगिनः।।[20]

अर्थादर्थान्तरप्राप्तिः अर्थसङ्क्रान्तिरस्ति व्यञ्जनाद् व्यञ्जनान्तरं प्राप्या स्थिरता व्यञ्जनसङक्रान्तिरस्ति, योगाद्योगान्तरगमनं योगसङ्क्रान्तिरस्ति। विशुद्धध्यानस्य सामर्थ्यात् यस्य मोहग्रस्तकर्मक्षीणमभूत्, तादृशस्य साधकस्य एताः सङ्कान्तयो भवन्ति।

यः ध्यानी अर्थव्यञ्जनयोगेषु यावत् त्वरया सङ्क्रमते सः स्वयमेव पुनः तथैव प्रत्यावर्तते।[21] अनेन ध्यानेन योगी स्वमोहकर्मणः क्षयमुपशमं वा शीघ्रं करोति।[22] एवंविधेन पृथक्त्वध्यानेन जितात्मा शान्तकषायः दग्धकर्माग्निरिव साधक एव एकत्वध्यानयोग्यो भवति।[23]

(ख) एकत्ववितर्कावीचारशुक्लध्यानस्वरूपम्

शुक्लध्यानस्येदं द्वितीयं चरणमस्ति। इदं पृथक्त्ववितर्कवीचार-विपर्यस्तमस्ति।[24] इदं वितर्कसहितं किन्तु वीचारवर्जितम् एकपदसहितञ्चा-स्ति। अतः इदमेकत्ववितर्कावीचारध्यानं कथ्यते।[25] इदं केनापि एकेनैव योगेन भवति[26], यतः अस्मिन् योगो न पर्यावर्तते। योगी यस्मिन्नेव योगे विलीनो भवति स एव योगः प्रवर्तते। अस्मिन् योगी खेदहीनः सन् एकमेव द्रव्यमणुं पर्यायं वा एकेनैव योगेन ध्यायति, अतः इदमेकत्वध्यानं कथ्यते।[27] नष्टमोहस्य पूर्वज्ञस्य अपरिमितदीप्तेः अत्यन्तनिश्चलस्य मुनेरिदं ध्यानं भवति। इदं ध्यानम् अत्यन्तं निर्मलं भवति।[28]

प्रथमं शुक्लध्यानं तु सङ्क्रमणयुक्तमस्ति, किन्तु अस्मिन् ध्याने सङ्क्रमणमविरुद्धं भवति, अपि च अवशिष्टघातिकर्माणि विनाश्य साधकः स्वात्मानं लभते, अत्यन्तोत्कृष्टशुद्धताञ्च प्राप्तं केवलज्ञानं केवलदर्शनञ्च लभते।[29] अस्मिन् ज्ञाने जीवः त्रैकालिकसमग्रद्रव्याणां समस्तपर्यायान् युगपदेव जानाति।

---

20. ज्ञानार्णवः, 42/16-17
21. अर्थादिषु यथा ध्यानी सङ्क्रामत्यविलम्बितम्।
    पुनर्व्यावर्तते तेन प्रकारेण स हि स्वयम्।। -ज्ञानार्णवः 42/18
22. ज्ञानार्णवः 42/20

(ग) सूक्ष्मक्रियाऽप्रतिपाति-शुक्लध्यानस्वरूपम्[30]

केवलज्ञानसूर्येण पदार्थान् प्रकाशयतः सर्वज्ञस्य यदा अन्तर्मुहूर्तप्रमाणमायुः शिष्यते तदा तृतीयं सूक्ष्मक्रियाऽप्रतिपाति-शुक्ल-ध्यानं भवति।[31]

अस्य ध्यानस्यार्थोऽस्ति-काययोगस्य सूक्ष्मीकरणम्, अप्रतिपातौ ध्याने वा प्रविश्य पुनर्न आवर्तनमिति। अतः इदं सूक्ष्मक्रियाऽप्रतिशुक्लध्यानं कथ्यते।

यदा अरिहन्तस्यायुः कर्म अन्तर्मुहूर्तपरिमितिम् अवशिष्यते अपरेषाञ्च त्रयाणां कर्मणां स्थितिः अधिका भवति तदा स्वत एव समुद्घातविधिः प्रारभते। असौ केवली क्रमशः दण्ड-कपाट-प्रतरेति क्रियात्रयं त्रिषु कालेषु कृत्वा चतुर्थे काले समस्तलोकं पूरयति। वेदनीयं नाम गोत्रस्थितिं च आयुः कर्मसमं विधाय चतुर्षु कालेषु क्रमशः लोकपूरण-प्रतर-कपाट-दण्ड-रूपो भूत्वा आत्मप्रदेशान् शरीरवत् करोति। तदनु काययोगे स्थिरतां प्राप्य बादरवचनयोगं बादरमनोयोगञ्च सूक्ष्मीकरोति, ततश्च सूक्ष्मक्रियायोगे स्थैर्यमधिगम्य बादरकर्मयोगं सूक्ष्मं करोति, ततश्च

---

23. एवं शान्तकषायात्मा कर्मकक्षाशुशुक्षणिः।
एकत्वध्यानयोग्यः स्यात्पृथक्त्वेन जिताशयः।। -ज्ञानार्णवः 42/23
24. ज्ञानार्णवः 42/9
25. सवितर्कविचारमेकत्वपदलाञ्छितम्।
कीर्तितं मुनिभिः शुक्लं द्वितीयमतिनिर्मलम्।। -ज्ञानार्णवः 42/10
26. द्वितीयं त्वेकयोगिनाम्। -ज्ञानार्णवः 42/12
27. द्रव्यं चैकमणुं चैकं पर्यायं चैकमश्रमः।
चिन्तयत्येकयोगेन यत्रैकत्वं तदुच्यते।। -ज्ञानार्णवः 42/27
28. ज्ञेयं प्रक्षीणमोहस्य पूर्वं न्यस्यामितद्युते।
सवितर्कमिदं ध्यानमेकत्वमतिनिश्चलम्।। -ज्ञानार्णवः 42/25
29. आत्मलाभमथासाद्य शुद्धिं चात्यन्तिकीं पराम्।
प्राप्नोति केवलज्ञानं तथा केवलदर्शनम्।। -ज्ञानार्णवः, 42/30
30. ज्ञानार्णवः 42/41-51
31. सर्वज्ञः क्षीणकर्मासौ केवलज्ञानभास्करः।
अन्तर्मुहूर्तशेषायुस्तृतीयं ध्यानमर्हति।। ज्ञानार्णवः 42/41

सूक्ष्मकाययोगे स्थैर्यं सम्पाद्य क्षणमात्रेणैव तत्क्षण एव वचनयोग-मनोयोगयोः निग्रहणं करोति। तदाऽसौ जीवः एतद्ध्यानं कर्तुं योग्यो भवति। अत्रासौ सूक्ष्मैककाययोगे स्थितः सन् तस्य ध्यानं करोति।

अस्मिन् ध्याने तेषां जीवानामवश्यं समुद्घातो भवति ये षण्मासपरिमिते उत्कृष्टायुषि अवशिष्टे केवलिनो भवन्ति। अवशिष्टानां केवलिनां समुद्घातो वैकल्पिकोऽस्ति। ते समुद्घातं विनैव योगनिरोधं कृत्वा एतद्ध्यानं कर्तुमर्हन्ति।[32]

(घ) (समुच्छिन्नक्रिया) व्युपरतक्रियानिवृत्तिशुक्लध्यानस्वरूपम्–

सूक्ष्मक्रियाऽप्रतिपातिध्यानानन्तरं केवलिनः समुच्छिन्न क्रियानिवृत्तिध्यानं प्रारभन्ते। अत्र सर्वविधैरपि योगैः उत्पद्यमानानाम् आत्मप्रदेशानां परिस्पन्दक्रियाणाम् उच्छेदेन इदं समुच्छिन्नक्रियानिवृत्ति-शुक्लध्यानं कथ्यते। इदं ध्यानं चतुर्दशे गुणस्थाने भवति। अस्य ध्यानस्य प्रारम्भे केवलिनः द्वासप्ततिः प्रकृतीः अन्ते च त्रयोदश प्रकृतीः नाशयन्ति। उक्तञ्च–

द्वासप्ततिर्विलीयन्ते कर्मप्रकृतयो द्रुतम्।
उपान्त्ये देवदेवस्य मुक्तिश्रीप्रतिबन्धकाः॥

तस्मिन्नेव क्षणे साक्षादाविर्भवति निर्मलम्।
समुच्छिन्नक्रियं ध्यानमयोगिपरमेष्ठिनः॥

विलयं वीतरागस्य पुनर्यान्ति त्रयोदश।
चरमे समये सद्यः पर्यन्ते या व्यवस्थिता॥[33]

अस्मिन् अयोगकेवलिगुणस्थाने केवलिनः निर्मलाः निष्कलङ्काः निरामयाः जन्ममरणरूपेभ्यः सांसारिकानेकदुर्निवारबन्धकष्टेभ्यो वर्जिताः भवन्ति। चारित्रपूर्णाः अनन्तवीर्यवन्तश्च भवन्ति। आत्मानं पश्यन्

---

32. षण्मासायुषि शेषे संवृत्ता जिनाः प्रकर्षेण।
ते यान्ति समुद्घातं शेषां भाज्याः समुद्घाते॥ ज्ञानार्णवः, 42/42

33. ज्ञानार्णवः 42/52-54

ज्ञानगुणोत्कृष्टतासम्पन्नाः भवन्ति अस्य गुणस्थानस्य कालस्तावन्मात्रोऽस्ति यावत् **'अ इ उ ऋ लृ'** इति पञ्चलघ्वक्षराणामुच्चारणकालो भवति। अनन्तरं कर्मबन्धहीनोऽयं शुद्धात्मा स्वभावेन ऊर्ध्वं गत्वा लोकाग्रे स्थितो भवति।[34]

वज्रवृषभनाराचसंहननसम्पन्नस्य द्वादशाङ्गचतुर्दशपूर्वज्ञस्यैव शुक्लध्याने योग्यता वर्तते।[35] आदिमे द्वे ध्याने छद्मस्थानां वर्तते, एते श्रुतधारकाः भवन्ति। एतेषु श्रुतज्ञानपूर्वकं पदार्थानामालम्बनं भवति। अन्ते च द्वे शुक्लध्याने केवलिनो भवतः, एते सर्वविधालम्बनवर्जिताः भवन्ति।[36] स्त्रीणां शुक्लध्यानं न भवति। यतः तासां चित्तं शुद्धं न भवति स्वभावेन च शिथिलपरिणामास्ताः सन्ति। प्रतिमासं रक्तस्रावचिन्तया शङ्काकुलाः तिष्ठन्ति।[37] अतः स्त्रियः पञ्चमगुणस्थानादूर्ध्वं गन्तुं नार्हन्ति। प्रथमशुक्लध्यानस्य फलत्वेन संवर-निर्जरयोः अमरसुखस्य च प्राप्तिर्भवति किन्तु मुक्तिर्न लभ्यते। द्वितीयध्यानस्य फलत्वेन त्रिघातिककर्मणां नाशो भवति। तृतीयशुक्लध्याने मनोवाक्काययोगान् निरुध्य तेषां नाशः क्रियते चतुर्थध्याने च शैलेषी- अवस्थायाः काले क्षीणे सति सर्वकर्मशून्योऽयं जीवः एकस्मिन्नेव काले सिद्धावस्थां लभते।

शुक्लध्यानं ध्यानस्य सर्वोच्चकोटिर्वर्तते। अनेन साधकः स्वलक्ष्यभूतं मोक्षं प्राप्य आत्मसुखे लीनो भवति। शुक्लध्यानं प्राप्य सिद्धावस्थायां लीनता एव साधकस्यान्तिमलक्ष्यं वर्तते।

सिद्धाः (परमात्मा) खलु त्रिष्वपि लोकेष्वूर्ध्वं तिष्ठन्ति। प्रत्येकमात्मा ध्यानेन परमात्मा भवितुं शक्यते। इदमस्ति जैनानां दृढ़विश्वासः। स शाश्वतज्ञान सुखसमृद्धः, पुण्य-पापादिभिरप्यनिर्लिप्तः निर्मलध्यानादेव प्राप्यः।

---

34. ज्ञानार्णवः 42/55-59
35. आदिसंहननोपेतः प्रशान्तः पुण्यचेष्टितः।
    चतुर्विधमपि ध्यानं स शुक्लध्यातुमर्हति।। ज्ञानार्णवः 42/5
36. श्रुतज्ञानार्थसम्बन्धाच्छ्रुतालम्बनपूर्वके।
    पूर्वे परे जिनेन्द्रस्य निःशेषालम्बनच्युते।। ज्ञानार्णवः 42/8
37. चित्ता सोहिण तेसिं ढिल्लं भावं तह्य सहावेण।
    विज्जदि मासा तेसिं इत्थीसु ण संकया झाणा।-सूत्र पाहुड, 26

विश्वञ्च तस्य ज्ञाने विद्यते, सर्वस्यापि ज्ञायकत्वात्। त एतेऽनेके परमात्मानः परस्परमभिन्नाः नत्विन्द्रियगम्याः, नापि केवलेन शास्त्राभ्यासेनैव ज्ञातुं शक्यः अपितु केवलं ध्यानगम्याः, एते ब्रह्म-परब्रह्म शिवशान्तेत्याद्यपरनामकाः सन्ति।

सांख्यनये प्रत्यक्षप्रमाणविमर्शः

डॉ. रविशंकरशुक्लः

भारतीयषडास्तिकदर्शनशास्त्रेषु सांख्ययोगदर्शनस्य विशिष्टं स्थानं वर्तते। सर्वाणि दर्शनशास्त्राणि प्रमाणस्य निरूपणं कुर्वन्ति। शास्त्रस्य अतः तत्तद् दर्शनेषु प्रमाणविचारो भवति। प्रमाणं विना कस्यापि वस्तुनः सिद्धिः न भवतीति तत्त्वदर्शीभिराचार्यैः उच्यते, अतः प्रमाणविचारो सर्वैरेव दृर्शनशास्त्रैः क्रियते। किं किं विषयमवलम्ब्य शास्त्राणि निरूपितानि सन्तीतिप्रसङ्गे एषा पङ्क्तिः स्मर्यते। 'पदवाक्यप्रमाणपारावारीणाः' भावार्थञ्च द्योतयति पदविद्या व्याकरणम्, वाक्याविद्या वेदान्तमीमांसा-सांख्ययोग-शास्त्राणि च प्रमाणविद्या न्यायशास्त्रम्। तत्र प्रमाणप्रसङ्गे सांख्ययोगदर्शनानुसारेण प्रमाणस्वरूपं विविच्यते–

तच्च 'दृष्टमनुमानमाप्तवचनं' चेति 'दृष्टम् प्रत्यक्षम्, अनुमानं परामर्शः आप्तवचनं शब्दप्रमाणमिति। इमानि च लौकिकप्रमाणानीति। आर्षं तु योगिनामूर्ध्वरेतसां विज्ञानं सदपि लोकव्युत्पादनाय नाऽलं भवतीति नाभिहितम्। अधिकानां प्रमाणानां सर्वप्रमाणसिद्धत्वात् त्रिविधप्रमाणेष्वेवाऽन्तर्भावात् त्रिविधमेवेष्टमिति। यतः प्रमेयसिद्धिः प्रमाणाद्धि तथा च प्रमेयमुत्पादनाय प्रवृत्तस्य शास्त्रस्य सामान्यतो विशेषतश्च प्रमाणनिरूपणेऽपि नाऽसङ्गतिरिति।

अभिहितं प्रमाणसामान्यस्वरूपं सम्प्रति तद् विशेषरूपेण विवेचनीयं तत्र च सर्वप्रमाणेषु ज्येष्ठत्वात्तदुपजीवकत्वाच्चाऽनुमानादीनां, यावतां वादिनामविप्रतिपत्तेश्च प्रथमं प्रत्यक्षमेव लक्षयन्ननुमानं शब्दञ्च लक्षयति।

प्रतिविषयाऽध्यवसायो दृष्टं, त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकम्, आप्तश्रुतिराप्तवचनन्तु॥

1. सांख्यकारिका।

दृष्टं प्रत्यक्षं तस्य लक्षणं प्रतिविषयाध्यवसायत्वमिति, विसिन्वन्ति विषयिणं ज्ञानमनुबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः, त्रिगुणानां साम्यावस्थात्मकप्रकृतिभिन्नाश्चेतनबुद्ध्यादयः सूक्ष्माः, पृथिव्यादयश्च स्थूला यावन्तो विषया भवन्ति, तत्र स्थूलास्त्वस्मदादीनां विषयाः, सूक्ष्माश्च योगिनामूर्ध्वस्त्रोतसाञ्च विषया इति। विषयं विषयं प्रति वर्तते तत्प्रतिविषयम् इन्द्रियम्, वर्तते इति पदघटकवृतुधात्वर्थरूपा वृत्तिः सन्निकर्ष एव, तथा चाऽर्थसन्निकृष्टमिन्द्रियमित्यर्थः। तस्मिन्नध्यवसायस्तदाश्रितः, अध्यवसायो नाम–तमसः पराभवे सति बुद्धौ सत्त्वस्वभावान्निर्मला ज्ञानरूपा बुद्धिवृत्तिर्जायते, सा प्रमाणरूपा। तथा च विषयसन्निकृष्टेन्द्रियजन्यबुद्धिवृत्तिः प्रत्यक्षं प्रमाणमिति फलितम्।

जैनदर्शने ध्यानस्य स्वरूपं वैशिष्ट्यञ्च

डॉ. कुलदीपकुमारः

भारतीयसंस्कृतौ ध्यानस्य महत्त्वं वर्तते। सर्वेषु भारतीयदर्शनेषु ध्यानस्य वैशिष्ट्यं दरीदृश्यते। प्रकृतप्रपत्रे जैनदर्शनानुसारं ध्यानस्य वैशिष्ट्यं निरूप्यते। जैनदर्शने इतरभारतीयदर्शनवन्मोक्ष एव परमलक्ष्यमिति स्वीकृतम्। मोक्षप्राप्त्युपायत्वेन ध्यानस्य विस्तृतं विवेचनं जैनसाहित्ये कृतं वर्तते।

प्राकृतसाहित्ये ध्यानशब्दस्य 'झान' अथवा 'झाण' इति प्रयोगः उपलभ्यते। आवश्यकनिर्युक्तिग्रन्थे ध्यानस्य स्वरूपं निरूपितं यत् **'अंतोमुहुत्तकालं चित्तस्सेकग्गया हवइ झाणं[1] इत्युक्तम्।''** अस्यार्थः कस्मिंश्चित् एकस्मिन् लक्ष्ये मुहूर्तं यावत् चित्तस्यैकाग्रता। तत्त्वार्थसूत्रेऽपि **'एकाग्रतया चिन्तनस्य निरोधः ध्यानमिति निरूपितम्।'**[2] सर्वार्थसिद्धौ पूज्यपादाचार्यैः **'निश्चलाग्निशिखावत् अवभासमानं ज्ञानमेव ध्यानमिति'** निरूपितम्। ध्यानशतके **'स्थिराध्यवसायः ध्यानमित्युक्तम्।'**[3] अतः चित्तस्यैकाग्रता एव ध्यानमिति वक्तुं शक्यते।

अस्य ध्यानस्य चत्वारि अङ्गानि प्रथितानि सन्ति। यथा–**'ध्याता ध्येयं, ध्यानं, ध्यानफलञ्चेति।'**[4] तत्र ध्यानस्य कर्ता ध्याता भवति। ज्ञानार्णवे ध्यातुः अष्टौ आवश्यकगुणाः प्रोक्ताः। यन्मुमुक्षुत्वं, संसारविरक्तत्वं, क्षोभरहितत्वं, शान्तचित्तत्वं, वशित्वं, स्थिरत्वं, जितेन्द्रियत्वं, संवृत्तत्वञ्चेति।

---

1. आवश्यकनिर्युक्तिः, गाथा 1463
2. 'एकाग्रचित्तनिरोधो ध्यानम्', तत्त्वार्थसूत्रम् 9/27
3. 'जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं। ध्यानशतकम्, गाथा 61
4. ''ध्याता ध्यानं तथा ध्येयं फलं चेति चतुष्टयम्।
   इति सूत्रसमासेन सविकल्पं निगद्यते।। ज्ञानार्णवः, 415

ध्येयं नाम अवलम्बनं यस्य ध्यानं क्रियते तत् ध्येयमित्युच्यते। स्थूलतः प्रशस्ताप्रशस्तभेदेन ध्यानं द्विविधं भवति। तत्र विरक्तभावेन वस्तुस्वरूपचिन्तनं यत्र भवति तत् प्रशस्तध्यानं इत्युच्यते। यत्र तु रागद्वेषमोहयुक्ताप्रवृत्तिस्तदप्रशस्तध्यानं कथ्यते। पुनश्च अप्रशस्तध्यानम् आर्त्तध्यानरौद्रध्यानरूपेण द्विविधं भवति। प्रशस्तध्यानस्य तु धर्मशुक्लभेदेन भेदद्वयम्। अप्रशस्तध्यानस्य हेयत्वात् तद्भेदौ न विचार्येते। प्रशस्तध्यानभेदयोर्मध्ये धर्मध्यानं चतुर्विधं भवति–आज्ञाविचयः, अपायविचयः, विपाकविचयः, संस्थानविचयश्चेति। धर्मध्यानस्य चतस्रः अनुप्रेक्षाः सन्ति–एकत्वानुप्रेक्षा, अनित्यानुप्रेक्षा, अशरणानुप्रेक्षा, संसारानुप्रेक्षा। तत्र एकत्वानुप्रेक्षायामेकान्ततायाः चिन्तनं करणीयं येन अहङ्कारो नश्यति अनित्यानुप्रेक्षायां पदार्थानाम् अनित्यतायाः चिन्तनं करणीयं येन ममत्वस्य नाशो भवति। अशरणानुप्रेक्षायां सर्वेषां पदार्थाणामशरणत्वं चिन्तनीयं यदि शरणं किञ्चिदस्ति तर्हि तदेकमात्रं जिनेन्द्रवचनमेव। संसारानुप्रेक्षायां तु संसारस्य मिथ्यात्वादितीव्रोदयात् दुखितस्य परिभ्रमणं चिन्तनीयम्। इदं धर्मध्यानं जीवेभ्यः अत्यन्तं निर्वेदं संसारभोगादिभ्योऽत्यन्तं वैराग्यं वा विवेकोत्पन्नं स्वात्मनि अनुभाव्यम् इन्द्रियातीतं सुखञ्च अधिगमयति। स्वर्गादिषु ग्रैवेयकानुदिशसर्वार्थसिद्ध्यादीनां प्राप्तिर्भवति। तदनु च उत्तममनुष्यस्य सुखं भुक्त्वा पुनरपि भेदज्ञानमवलम्ब्य संसारस्य परिभ्रमणाद् विरक्तो भूत्वा सम्यग्दर्शनज्ञानचारित्ररूपरत्नत्रयं सन्धार्य दुःसाध्यं तपः तप्त्वा यथाशक्तिधर्मध्यानं शुक्लध्यानं सन्धार्य अविनाशिमोक्षपदं लभते। अतः धर्मध्यानं परम्परया मोक्षहेतुः वर्तते।

चित्तस्य उपाधिरहितस्वाभाविकीपरिणतिः यत्र भवति तत् शुक्लध्यानमित्युच्यते। इदं ध्यानस्य चरमावस्था भवति एकाग्रतानिरोधश्चात्र पूर्णतामापद्येते निष्क्रियः इन्द्रियातीतः ध्यान-धारणा-विधिना-अन्तर्मुखिनिमनोवृत्तिः अस्यामवस्थायां भवति यथोक्तम्–

निष्क्रियं करणातीतं ध्यानधारणवर्जितम्।
अन्तर्मुखं च यच्चित्तं तच्छुक्लमिति पठ्यते॥[5]

5. चारित्रसारः, 169/1

अस्यापि चत्वारो भेदाः भवन्ति। ते यथा-पृथक्त्ववितर्कवीचारः, एकत्ववितर्कवीचारः सूक्ष्मक्रियाऽप्रतिपाती, व्युपरतक्रियानिवृत्तिश्चेति।

पृथक्त्ववितर्कसवीचारशुक्लध्यानं शुक्लध्यानस्य प्रथमं चरणं वर्तते। अत्र पृथक्-पृथक्तया श्रुतस्य विचारः संक्रमणं वा भवति। अनेन ध्यानेन योगी स्वमोहकर्मणः क्षयमुपशमं शीघ्रं करोति। ततश्च एकत्वध्यानयोग्यो भवति।

एकत्ववितर्कवीचारध्यानं शुक्लध्यानस्य द्वितीयचरणं भवति। अस्मिन् योगी खेदहीनः सन् एकमेव द्रव्यमणुं पर्यायं वा एकेनैव ध्यायति। इदमत्यन्तं निर्मलं भवति। अत्र संक्रमणमवरुद्धं भवति। अनेन योगेन साधकोऽवशिष्टघातिकर्माणि विनाश्य उत्कृष्टशुद्धतां प्राप्य केवलज्ञानं केवलदर्शनञ्च लभते। यथा–

आत्मलाभमथासाद्य शुद्धिं चात्यन्तिकीं पराम्।
प्राप्नोति केवलज्ञानं तथा केवलदर्शनम्॥[6]

सूक्ष्मक्रियाऽप्रतिपातीध्यानं शुक्लध्यानस्य तृतीयं चरणं भवति। अस्यामवस्थायां कामयोगस्य सूक्ष्मीकरणं भवति। यदा अरिहन्तस्यायुः कर्म अन्तर्मुहूर्तपरिमितम् अवशिष्यते अपरेषाञ्च त्रयाणां कर्मणां स्थितिः अधिका भवति तदा स्वत एव समुद्घातविधिः प्रारभते। असौ केवली क्रमशः दण्डकपाटप्रतरेति क्रियात्रयं त्रिषु कालेषु कृत्वा चतुर्थे काले समस्तलोकं पूरयति। वेदनीयं नाम गोत्रस्थितिं च आयुःकर्मसमं विघातं चतुर्षु कालेषु क्रमशः लोकपूरणप्रतरकपाटदण्डरूपो भूत्वा आत्मप्रदेशान् शरीरवत् करोति। तदनु काययोगे स्थिरतां प्राप्य बादरवचनयोगं बादरमनोयोगञ्च सूक्ष्मीकरोति, ततश्च सूक्ष्मक्रियायोगे स्थैर्यमधिगम्य बादरकर्मयोगं सूक्ष्मं करोति, ततश्च सूक्ष्मकाययोगे स्थैर्यं सम्पाद्य क्षणमात्रेणैव तत्क्षण एव वचनयोगमनोयोगयोः निग्रहणं करोति। तदाऽसौ जीवः एतद्ध्यानं कर्तुं योग्यो भवति। अत्रासौ सूक्ष्मैककाययोगे स्थितः सन् तस्य ध्यानं कथ्यते।

---

6. ज्ञानार्णवः, 39/26, आचार्यशुभचन्द्रः, जैनसंस्कृतिसंरक्षकसंघः, सोलापुरम् (महाराष्ट्रः)

शुक्लध्यानेनान्तिमं चरणं भवति व्युपरतक्रियानिवृत्तिरिति अत्र सर्वविधैरपि योगैः उत्पद्यमानानामात्मप्रदेशानां परिस्पन्दक्रियाणामुच्छेदो भवति। इदञ्च ध्यानं चतुर्दशे गुणस्थाने भवति। एतदारम्भे केवलिनः द्वासप्ततिः अन्ते च त्रयोदशप्रकृतीः नाशयन्ति। अपि च ते निर्मला निष्कलङ्काः, निरामयाः, जन्ममरणादिसांसारिकबन्धकष्टेभ्यः वर्जिताः भवन्ति। अत्र जीवः सिद्धावस्थां लभते। शुक्लध्यानं प्राप्य सिद्धावस्थायां लीनता एव साधकस्य अन्तिमलक्ष्यं वर्तते। ततश्च साधकः स्वलक्ष्यभूतं मोक्षं प्राप्य आत्मसुखे लीनो भवति। एवं जैनपरम्परायां ध्यानस्य स्वरूपं वैशिष्ट्येन निरूपितम्।

सांख्ययोगयोः धारणास्वरूपम्

डॉ. मारकण्डेयनाथतिवारी

पातञ्जलयोगदर्शनस्य साधनपादेऽष्टाङ्गयोगानां वर्णनं विद्यते। एतेषां योगाङ्गानामभ्यासेन विवेकख्यातिर्जायते। तेष्वङ्गेषु धारणा-ध्यान-समाधिरूपाणि विवेकख्यातौ साक्षात्सहायकत्वादान्तरिकसाधनान्युच्यन्ते। यम-नियमौ योगप्रतिबन्धकान् हिंसावितर्कादीन् समूलं निरस्य समाधिं साधयतः। अन्यानि च त्रीण्यङ्गान्युत्तरोतरं सहायकानि भवन्ति। एतेषां योगाङ्गानामभ्यासेनान्तः-करणं निर्मलं सत् स्वरूपबोधसमर्थं जायते। एतेषां योगाङ्गानां सिद्धयेऽभ्यासवैराग्ये परमावश्यके। अभीष्टे वस्तुनि चित्तस्य स्थिरीकरणमेव धारणापदेनोच्यते योगदर्शने। बाह्ये वस्तुनि सूर्य-चन्द्र-दीप-शरीरप्रभृतिषु चित्तस्य स्थिरीकरणानन्तरमान्तरविषयेष्वप्यभासो विधीयते। तन्मात्रेन्द्रियमनस्तु धारणवतो जनस्य समाधिलाभः सुनिश्चितः।

यमनियमासनप्राणायामैर्बहिर्जगद् विजित्यान्तरे जगति विचरणेच्छावता प्रत्याहारपूर्वकं धारणा साधनीयेति योगशास्त्राभिमतं मतम्। किं च 'यमनियमादिबीजरूपतः प्रादुर्भूतः क्रियायोगस्वरूपो महान् कल्पवृक्षः। आसन-प्राणायामास्तदङ्कुराः। प्रत्याहारादयश्च कुसुमानि। धारणाध्यानप्रभृतीनि तत्फलानीति' दृष्ट्या धारणा योगवृक्षस्य फलमित्यपि साध्यते। समाधि प्रवेशे प्रथमं द्वारं च धारणा। एवमियं धारणा देशेऽन्तर्जगति स्थानविशेषे चित्तस्य स्थापनाद् धारणाद् धारणेत्युच्यते।[1] मनसश्चाञ्चल्यनिरोधाय समाधेः प्रथमा क्रिया प्रत्याहारेण साध्यते ततः परं मनः प्रत्याहारकारणादितस्ततः पलायते निश्चितं विषयं परिहाय विभिन्नानामन्येषां विषयाणां चिन्तनं करोति।

---

1. देशबन्धश्चितस्य धारणा, 3/1 (पातञ्जलयोगसूत्रे)

तदा साधकस्येदं कर्तव्यं भवति यत् तन्मनः पुनराकृष्य निश्चिते वस्तुनि स्थापयेत्। भूयोभूय एवं करणात् मनो विषये एकस्मिन् ध्याने तिष्ठति किं वा प्रदत्तं विषयं गृहीतुं शिक्षते तदा धारणासिद्धिर्भवति।

धारणया अन्योऽर्थो विकसिता मानसिकी शक्तिरित्यस्ति। धारणापदेन संयमार्थोऽपि गृह्यते। अतश्चेतस एकाग्रतोपायो धारणेत्यपि गम्यते। इयं धारणा प्रथमाधिकारहितसाधनार्थं बहिर्वस्तुषु अभ्यस्यमाना बाह्यधारणा। अन्तर्जगद्वस्तुषु अभ्यस्यमाना चान्तरधारणेत्युच्यते। योगशास्त्रोक्ताद् ईश्वरप्रणिधानाद् वा तस्य वाचकः प्रणवः तज्जपस्तर्थभावनमित्यादि सूत्राणि विमृश्य-विमृश्यैव तन्त्रशास्त्रेषु बाह्यान्तर्धारणयोः साधनाविधानं बहुधा प्रतिपादितम्।

चित्तस्यैकाग्रतासाधनभूतानि च-'आसन-नादानुसन्धान-शून्य-दृष्टि-प्राणायाम-अन्तर्मौन-अजपाजप-बिन्दुधारणा-पञ्चतत्त्वधारणा-स्वप्न-निद्रा प्रभृतिभिर्मन्यन्ते। एतेषामेव वास्तविकी प्रक्रिया तन्त्राणि निर्दिशन्ति। तस्यां प्रक्रियायां बाह्यधारणार्थं यन्त्रप्रतिमादयः सन्ति। तेषां पूजनार्थं व्यवह्रियमाणानि पूजोपकरणानि नानाविधा उपचाराश्च धारणामाध्यमेनैव सिद्धिमार्गं परिष्कुर्वन्ति। बाह्यधारणार्थं यावन्ति साधनानि तन्त्रेषु प्रदर्शितानि सन्ति तावन्त्यन्यत्र कुत्र भविष्यन्ति? उपकरणानामनेकधात्वं प्रत्येकमुपकरणस्य फलविशेषत्वं प्रदर्शयन्ति तन्त्रशास्त्राणि पारेजलधिं नयन्ति। आसनानां मालानां च वैविध्यं धारणामेवावलम्बते। परः सहस्रं यन्त्राकृतयः, परः सहस्रं प्रतिमाः, परःसहस्रं मन्त्राश्च धारणारूपैणेव साध्यभावान् व्रजन्ति।

आन्तरधारणायास्तु ततोऽप्यधिको विस्तारः। भावनाबलेन शरीरेऽन्तश्चक्रभावनां प्रतिपादयन्त्या भावनोपनिषदा नवरन्ध्ररूपात्मकस्य देहस्य नवचक्ररूपात्मकता या साधिता विद्यते सा धारणैव। श्रीमता भास्कररायेण तासामेव भावनानां प्रयोगविधिरप्युक्तः। तत्र मांस-त्वग्-शुक्रास्थि-ओजो-रोम-रूधिरमज्जामेदसां द्वीपात्मकत्वं, पुनस्तेषामधिदेवतारूपत्वं प्रत्येकमिन्द्रियाणामनु-सन्धानविषयश्च परमविस्तरेण निर्दिष्टः। सोऽयं महायागक्रमो यौगिक्या धारणाया एव विषयः। संयमः तस्य साधनायां तु अन्तर्यागात्मिकैव पूजा सम्मता। यस्यां हृत्कमलमेव सर्वं यावदनुष्ठेयं विद्यते। अस्या उपासनाया

लक्ष्यं मूलाधारप्रसुप्तायाः कुण्डलिन्या योगविधिना प्रबोधनं कृत्वा सहस्रारस्थितेन शिवेन सह सामरस्यमेतत्सम्भाव्यते।

सहस्रारमध्ये चतुष्कोणात्मकं चन्द्रमण्डलमेव समयिनां बिन्दुस्थानं तत्रैवान्तरपूजा विधीयते। तदेव सर्वानन्दमयं चक्रम्। 1. सकल2. सकल-निष्कल 3. निष्कलरूपेण चक्रभावनं कृत्वैव कुण्डलिनी योगप्रक्रियया प्रबोधने मूलाधारादिषण्णां चक्राणां तद्गतानां तन्मात्राणां वेधनमारोहक्रमेणावरोहक्रमेण वा यद् विधीयते तत्र प्रत्येकं तद्गतानां तन्मात्राणां वेधनमारोहक्रमेणावरोहक्रमेण वा यद् विधीयते तत्र प्रत्येकं क्रमे बीजानां मन्त्राणां जपस्य परम्परा तन्त्रशास्त्राधारेणैव भवति।

दर्शनेषु प्रत्यक्षप्रमाणविमर्शः

प्रो. एस्.एन्. रमामणिः

प्रमाणमेवासाधारणं करणं भवति वस्तुतः प्रमितेरुत्पत्तौ। अत एव सांख्याचार्यैरीश्वरकृष्णेनोक्तं सांख्यकारिकायाम्– प्रमेयसिद्धिः प्रमाणाद्धि।[1] वैशेषिकदर्शने प्रत्यक्षानुमानभेदेन द्विविधमेव प्रमाणं प्रामुख्येन स्वीकृतं विद्यते। उपस्कारग्रन्थे प्रशस्तपादभाष्ये चोक्तम्– प्रमाणं द्विविधं–प्रत्यक्षं लैङ्गिकञ्च।[2] तत्र नैयायिकाद्यभिमतशब्दोपमानयोः अनुमानेऽन्तर्भावो भवति।[3] प्रशस्तपादाचार्योऽपि प्राह– शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात्।[4]

महर्षिगौतममते चत्वारि प्रमाणानि–"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति[5] सूत्रम्। तेषां मते बुद्धिर्द्विविधा, अनुभूतिस्मृतिभेदात्।[6] अनुभूतिरपि चतुर्विधा। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्।[7] विश्वनाथः कारिकावल्यां निगदति–

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥[8]

प्रत्यक्षलक्षणं विदधता महर्षिगौतमेन प्रोक्तम्–"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति।[9] अस्यामाशयः इन्द्रियार्थसन्निकर्षेण जायमानं भ्रमभिन्नं पदवाच्यत्वाविषयकं व्यवसायात्मकं

---

1. सांख्यकारिका - का. सं. -4
2. शब्दोपमानयोर्नैवपृथक् प्रामाण्यमीष्यते-कारिकावली-40
3. प्रशस्तपादभाष्यम् प्रमाणप्रकरणम्।
4. प्रशस्तपादभाष्यम्।
5. न्यायसूत्रम् - 1.1.3
6. प्रशस्तपादभाष्यम् - पृ. 94
7. प्रत्यक्षानुमित्युपमितिशाब्दानुभूतिरिति।
8. कारिकावली- का. सं. - 51
9. न्यायसूत्रम् - 1.1.4

विशिष्टज्ञानात्मकं प्रत्यक्षं भवति। इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वमिति प्रत्यक्षस्य लक्षणम्। अथ चाव्यपदेश्यं नाम जात्यादियोजनारहितम्। एवं व्यवसायात्मकं विशिष्टज्ञानमिति प्रत्यक्षभेदः प्रदर्शितः। त्वङ्मनःसंयोगः ज्ञानसामान्ये करणम्, अतः सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा न किमपि ज्ञानं जन्यते। त्वङ्मनःसंयोगस्य तदानीमभावात् सुषुप्त्यवस्थायां ज्ञानसामान्यजनकसामग्र्या अभावाद् विशेषज्ञानजनने च तत्तदिन्द्रियमनःसंयोगः कारणम्।

जाग्रति स्वप्ने च विषयेन्द्रियेण सह त्वङ्मनःसंयोगस्य सर्वदा विद्यमानत्वेऽपि विषयेन्द्रियेण सह त्वङ्मनःसंयोगस्याभावान्न प्रत्यक्षम्। तथा च आत्मा मनसा युज्यते, मनः इन्द्रियेण इन्द्रियञ्च विषयेण साकं सम्बद्ध्यते, तदैव प्रत्यक्षं भवति नान्यथा। सर्वत्र बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपं कारणम्। यतोऽहि त्रयाणामेव स्पर्शवतां पृथिव्यप्तेजसां प्रत्यक्षस्य स्वीकारात्। सर्वत्र बहिरिन्द्रिय- प्रत्यक्षे रूपमेव कारणम्, एतन्मते वायोः परिज्ञानं स्पर्श-शब्द-धृति- कम्पनादिलिङ्गैरनुमानैरेव जायते। न तु वायुः प्रत्यक्षः। चिन्तामणिकारस्तु बहिरिन्द्रियजन्यप्रत्यक्षे न रूपं न वा स्पर्शः कारणम्। किन्तु चाक्षुषप्रत्यक्षे रूपं कारणम्। रूपसत्त्वे एव चाक्षुषप्रत्यक्षस्य जायमानत्वात्। एवं त्वाचप्रत्यक्षे स्पर्शः कारणम्। इत्येवं पृथक् पृथगन्वयव्यतिरेकबलात् कार्यकारणभावः स्वीकर्तव्यः। अत्रेदं बहिरिन्द्रयजन्यद्रव्यप्रत्यक्षे अनुगतं किं कारणम्? तत्र नव्याः एवं प्रतिपादयन्ति यत्—बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे नास्ति किमपि कारणम्। अपितु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति आत्मावृत्ति-शब्दभिन्नविशेषगुणवत्त्वमेव प्रयोजकम्[10]। यत्र आत्मावृत्तिशब्दभिन्नविशेष-गुणवत्त्वं न तिष्ठति तस्य बहिरिन्द्रियेण प्रत्यक्षमपि न जायते। अत्र आत्मावृत्तिपृथिव्यादिचतुष्टवृत्तिविशेषगुणाः रूपादयः तद्वत्त्वस्य पृथिव्यादिचतुष्टये विद्यमानतया भवति तेषां प्रत्यक्षत्वम्। अथ च घ्राणजादिषड्विधप्रत्यक्षे महत्परिमाणं क्वचित्समवायसम्बन्धेन क्वचिच्च परम्परया कारणं भवति[11]।

10. तर्कसंग्रहसर्वस्वम्।

11. घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।

लौकिकविषयतासम्बन्धेन जन्यप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य कारणता अभ्युपगता विद्यते। चाक्षुषप्रत्यक्षत्वावच्छिन्नं प्रति आलोकसंयोगः उद्भूतरूपञ्च कारणम्। तयोर्द्रव्यप्रत्यक्षे समवायसम्बन्धेन कारणता। द्रव्यसमवेतसमवेत-रूपत्वादिप्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणता। अत्रेयमाशङ्का जायते यत् द्रव्यप्रत्यक्षे आलोकसंयोग-उद्भूतरूपयोः कारणतायां किं प्रमाणम्? अत्रोच्यते– यदि आलोकसंयोगो द्रव्यप्रत्यक्षे कारणं न स्यात् तदा अन्धकारे-ऽपि घटादीनां चाक्षुषप्रत्यक्षं स्यात्। एवमेव यदि उद्भूतरूपं द्रव्यप्रत्यक्षे कारणं न स्यात् तदा पिशाचादीनामपि प्रत्यक्षं स्यात्। एवं त्वाचप्रत्यक्षे उद्भुतरूपस्य कारणत्वेन यत्किमपि वस्तु चक्षुषा गृह्यते तेषां प्रत्यक्षं त्वचापि जायते, किन्तु चक्षुर्ग्राह्या ये रूपरूपत्वरूपाभावरूपत्वाभावाः ते न त्वचो ग्राह्याः। अपितु एतद्भिन्नाः ये चक्षुरिन्द्रियग्राह्याः पदार्थाः सन्ति तेषां ग्रहणं त्वगिन्द्रियेणाऽपि जायते।

इन्द्रियेण प्रत्यक्षे जननीये संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवाय-समवायसमवेतसमवायविशेषणविशेष्यभावभेदेन षड्विधः सन्निकर्षोऽपेक्षितः। तत्र द्रव्यप्रत्यक्षे चक्षुरादीन्द्रियसंयोगकारणम्। एवं द्रव्यसमवेतगुणजात्यादि-प्रत्यक्षे संयुक्तसमवायः, द्रव्यसमवेतसमवेतजात्यादिप्रत्यक्षे, संयुक्तसमवेत-समवायसन्निकर्षः। एवं शब्दप्रत्यक्षं श्रोत्रसमवायेन, शब्दवृत्तिशब्दत्वादीनाञ्च प्रत्यक्षं श्रोत्रसमवेतसमवायेन। एवं समवायाभावयोः प्रत्यक्षे स्वरूपसम्बन्धः तथा च घटाभाववद्भूतलमित्यत्र घटाभावस्य प्रत्यक्षता स्वसंयुक्तविशेषणता-सम्बन्धेन भवति। भूतले घटाभाव इत्यत्र स्वसंयुक्तविशेष्यतासम्बन्धेन घटाभावस्य प्रत्यक्षता जायते। घटाभाववद्रूपमित्यत्र घटाभावस्य प्रत्यक्षता स्वसंयुक्तसमवेतविशेषणतासम्बन्धेन भवति घटाभावस्य विशेषणत्वात्। रूपे घटाभाव इत्यत्र घटाभावस्य प्रत्यक्षता स्वसंयुक्तसमवेतविशेष्यतासम्बन्धेन भवति, घटाभावस्य विशेष्यत्वात्। घटाभाववद्रूपत्वमित्यत्र घटाभावस्य प्रत्यक्षता स्वसंयुक्तसमवेतसमवेतविशेषणतासम्बन्धेन जायते। रूपत्वे घटाभाव इत्यत्र घटाभावस्य प्रत्यक्षता स्वसंयुक्तसमवेतसमवेतविशेष्यतासम्बन्धेन भवति। शब्दस्य प्रत्यक्षता समवायसम्बन्धेन भवति एवञ्च शब्दत्वस्य प्रत्यक्षता समवेतसमवायसम्बन्धेन जायते। घटाभाववच्छब्दः इत्यत्र घटाभावस्य प्रत्यक्षता समवेतविशेषणतासम्बन्धेन भवति तथा च शब्दे घटाभावः इत्यत्र स्वसमवेत-

विशेष्यतासम्बन्धेन घटाभावस्य प्रत्यक्षता जायते। घटाभाववच्छब्दत्वमित्यत्र घटाभावस्य प्रत्यक्षता स्वसमवेतसमवेतविशेषणतासम्बन्धेन जायते।

अद्वैतवेदान्ते प्रत्यक्षं द्विविधं भवति, ज्ञानगतप्रत्यक्षं विषयगतप्रत्यक्षञ्च। ज्ञानगतप्रत्यक्षस्य प्रयोजकं प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्यस्याभेदः इति। विषयस्य प्रत्यक्षत्वन्तु प्रमात्रभिन्नत्वम्। प्रत्यक्षस्य विषयस्य प्रत्यक्षज्ञानं चैतन्यमेव, तच्चानादीति। संयोगादिसन्निकर्षाणां विनियोगः इति जिज्ञासाया-मुच्यते–

अयः घटः इत्यत्र घटावच्छिन्नचैतन्याभिव्यञ्जकवृत्त्युत्पादने संयोग सन्निकर्षो भवति। घटगतरूपावच्छिन्नचैतन्याभिव्यञ्जकवृत्त्युत्पादने संयुक्त-तादात्म्यसन्निकर्षस्योपयोगो जायते। घटगतरूपत्वावच्छिन्नचैतन्याभिव्यञ्जक-वृत्त्युत्पादने संयुक्ताभिन्नतादात्म्यसन्निकर्षो भवति। शब्दावच्छिन्नचैतन्याभि-व्यञ्जकवृत्युत्पादने तादाम्यसम्बन्धो भवति। शब्दत्वावच्छिन्नचैतन्याभि-व्यञ्जकवृत्युपादने तादाम्यतादात्म्यसम्बन्धः स्वीक्रियते।

विशेषणतासम्बन्धेन क्वचित् विशेष्यतासम्बन्धेन च अभावस्य प्रत्यक्षं जायते तत्रापि विशेषणतातः पूर्वमिन्द्रियसंयुक्तत्वम् इन्द्रियसमवेतत्वं वा योजनीयम्। यथा घटाभाववद् भूतलमित्यत्र चक्षुः संयुक्ते भूतले घटाभावस्य विशेषणत्वात् चक्षुः संयुक्तविशेषणतासम्बन्धेन भूतलवृत्तिघटाभावस्य प्रत्यक्षं जायते। एवं भूतले घटाभावः इत्यत्र चक्षुःसंयुक्तं भूतलं तत्र विशेष्यो घटाभावस्तत्रस्थघटाभावस्य चक्षुःसंयुक्तविशेष्यतासम्बन्धेन प्रत्यक्षं भवति। क्वचिच्च विशेषणतायाः पूर्वमिन्द्रियसमवेतत्वं विशेषणीयं यथा कादौ स्वत्वाभावस्य श्रोत्रसमवेतविशेष्यतया प्रत्यक्षं भवति। तत्र श्रोत्र-समवेतः कादिः तत्र खत्वाभावस्य विशेष्यत्वात्। इत्थं प्रकारेण यद्यपि विशेष्यता नानाविधा तथा च सन्किर्षस्य षोढात्वं व्याहन्येत तथाऽपि विशेष्यतात्वेन रूपेण विशेष्यतायाः ऐक्यस्वीकारात् न हि षोढात्वव्याघातः शङ्कनीयः।

मीमांसकमते विधिरेव धर्मे प्रमाणं न तु विध्यतिरिक्तस्य प्रत्यक्षस्य

---

12. जैमिनिसूत्रम् 1/1/4

धर्मे प्रमाणत्वं सम्भवति। अत एवोक्तं "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्"[12] इति सूत्रेण इन्द्रियाणां विद्यमानेन पदार्थेन सह सन्निकर्षे सति पुरुषस्य यद् घटपटादिविषयकं ज्ञानं जायते तत् प्रत्यक्षम्। अत्र एतादृशलक्षणलक्ष्यं प्रत्यक्षम् इन्द्रियार्थसन्निकर्षेण विद्यमानस्यैव अर्थस्य ग्राहकं भवति। न तु अनागते धर्मे तत् प्रत्यक्षं प्रमाणं भवितुमर्हति। इत्येवं प्रत्यक्षलक्षणं मीमांसादर्शने दृश्यते। अत्र इन्द्रियार्थ-सन्निकर्षजन्यत्वरूपं लक्षणं सुखादिप्रत्यक्षेऽव्याप्तम्। यतस्तत्र सुखादिना साकं चक्षुरादीन्द्रियाणां सन्निकर्षाभावात्, इत्येवं वक्तुं न शक्यते। तत्राऽपि मनःसंयुक्तात्मसमवेतत्वरूपसन्निकर्षस्य कारणत्वात्। अत्रेयमाशङ्का जायते यन्मनसः सद्भावे प्रमाणाभावात् कथं मनःसन्निकर्षजन्यं सुखादिप्रत्यक्षं भवितुमर्हति। अत्रेत्थं प्रकारेण समाधानं कर्तुं शक्यते यत् सुखादिज्ञानमेव मनसः सद्भावे प्रमाणतयाऽभ्युपेयम्। यद्यत् प्रत्यक्षात्मकं ज्ञानं भवति तत्तदिन्द्रियजन्यमेव भवति। यथा– रूपप्रत्यक्षम्। एवमेव सुखादिविषयकमपि प्रत्यक्षात्मकं ज्ञानं केनचित् इन्द्रियेण जन्यमेव स्यात् अपरोक्षज्ञानत्वात्। तथा चानुमानप्रयोगः सुखादिसाक्षात्कारः करणजन्यः साक्षात्कारत्वात्। घटसाक्षात्कारवत् इत्यनुमानेन सुखादिसाक्षात्कारे चक्षुरादेः करणत्वस्य बाधितत्वात्।[13] न तत्र सुखादिसाक्षात्कारे चक्षुरादीनां करणत्वं सम्भवति। अतः सुखादिप्रत्यक्षकरणत्वेन मनसः इन्द्रियत्वं सिद्ध्यति। प्राभाकरास्तु एवं प्रतिपादयन्ति यत् नित्यद्रव्येषु विद्यमानानां विशेषगुणानामुत्पत्तिर्द्रव्यान्तर-संयोगादेव जायते। यथा पार्थिवपरमाणुगतरूपादिविशेषगुणानामात्म-भिन्नाग्निसंयोगादेवोत्पत्तिस्तथैव आत्मगतज्ञानसुखादिविशेषगुणानामुत्पत्तिरपि द्रव्यान्तरसंयोगजन्यैव भविष्यति। मतमिदं न समीचीनम्, शरीरस्य भोगाय-तनत्वात्, भोगस्तावत् सुखदुःखसाक्षात्कारस्तस्यायतनम्।[14] अर्थादात्मनि शरीरावच्छेदेनैव सुखदुःखादिकमुत्पद्यते। एवञ्च शरीरसंयोगादेवात्मनि सुखदुःखोत्पत्तिर्जायते। यतोऽहि शरीरातिरिक्तस्य कस्यापि भोगायतनत्वाभावात्। शरीरस्यैवान्नपानाद्याधारत्वम्, तस्मात् सुखादयः न शरीराद् बहिरुत्पद्यन्ते।

13. न्यायसिद्धान्तमुक्तावली– किरणावली टीका।
14. यद् भोगायतनं तदेव शरीरमिति। न्यायबोधिनी।

अतः शरीरसंयोगाद्येव सुखाद्युत्पत्तिसम्भवे न हि द्रव्यान्तरस्य मनसः अनुमानम् सम्भवति। अथैवमपि पार्थिवगुणानामेव स्वोत्पत्तौ द्रव्यान्तरसंयोगापेक्षा दृश्यते न तु द्रव्यमात्रगुणानामुत्पत्तौ तस्य कारणत्वं दृश्यते। तेजःसंयोगस्यैव विशेषगुणोत्पत्तौ कारणत्वं दृश्यते न तु द्रव्यमात्रसंयोगस्य कारणत्वं दृश्यते। तस्मान्न द्रव्ये विशेषगुणोत्पत्तये मनसोऽपेक्षाऽपितु सुखाद्यपरोक्षज्ञानमेव मनसो लिङ्गमिति दिक्।

काव्यशास्त्रे वर्णितं प्रत्यक्षप्रमाणं, बौद्धमतखण्डनञ्च

डॉ. सुमनकुमारझा

न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान्कवेः॥[1]
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥[2]

वस्तुतः सर्वाणि शास्त्राणि, सर्वाः विद्याः कलाश्च सर्वे शब्दा अर्थाश्च काव्याङ्गतया निरूप्यन्ते कविभिः। काव्येषु एतेषां प्रचुरप्रयोगोऽपि दृश्यते। अत एतेषां तत्त्वानामवबोधाय साधुप्रयोगाय च तत्तच्छाशास्त्राणां ज्ञानमपेक्षितमस्ति, कविभ्यः, काव्यसमीक्षकेभ्यः, सहृदयसामाजिकेभ्यश्च।

प्रमीयते वस्तु साध्यतेऽनेनेति प्रमाणम्। 'प्र' उपसर्गपूर्वक 'मा' धातोः करणे ल्युट् प्रत्ययः। प्रमाकरणं प्रमाणमित्यर्थः प्रत्यक्षमेव प्रमाणमिति चार्वाकाः। प्रत्यक्षमनुमानञ्चेति बौद्धाः वैशेषिकाश्च। शब्दोऽपीति नैयायिकाः। अथापत्तिरपीति भाट्टाः। अनुपलब्धिरपीति बह्माद्वैतवादिनः। एवमेतेऽन्येऽपि ऐतिह्यादयः प्रमाणभेदाः सन्ति। ते च सर्वे दर्शनान्तरेषु संख्यालक्षणगोचर-फलविषयतया विप्रतिपत्त्या निरूपिताः सन्ति।

अप्पयदीक्षितेन कुवलयानन्द इति ग्रन्थे प्रत्यक्षानुमानोपमानशब्दश्रुति-सामान्यार्थापत्यनुपलब्धिसंभवैतिह्यादयः प्रमाणालङ्काररूपेण निरूपितास्सन्ति। यथा हि प्रत्यक्षादिलक्षणे विवादः तथा प्रत्यक्षसंख्यानां तद्विषये तत्फलेऽपि विवादो दृश्यते। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। कल्पनापोढमभ्रान्तं

---

1. काव्यालङ्कारः-(भामहप्रणीतः)- 5/4
2. नाट्यशास्त्रम्-1/116

प्रत्यक्षम्। प्रत्यक्षप्रमाकरणं प्रत्यक्षमित्यादिलक्षणस्वरूपाणि विभिन्नानि दृश्यन्ते। इन्द्रियजं ज्ञानं प्रत्यक्षमिति मनसोऽपीन्द्रियत्वस्वीकारात् न्यायमते षड्विधं प्रत्यक्षम्। मनसो नास्तीन्द्रियत्वमिति वेदान्तपरिभाषाकारमते पञ्चविधमेव प्रत्यक्षम्। प्रत्यक्षं चतुर्विधमिति इन्द्रियज्ञानं मनोविज्ञानमात्मसंवेदनं योगिज्ञानञ्चेतीन्द्रियाश्रितं यज्ज्ञानं तत्प्रत्यक्षम्। स्वविषयान्तरविषयसहकारिणा इन्द्रियविज्ञानेन समनन्तरप्रत्ययेन जनितं यत् तन्मनो विज्ञानम्। सर्वचित्तचैतानामात्मसंवेदनं प्रत्यक्षम्। एवं प्रत्यक्षप्रमाणविषयेऽपि विसंवादः।

साहित्यशास्त्रे विशेषतः दोषनिरूपणक्रमे अलङ्कारनिरूपणे च प्रमाणमुद्धृतमस्ति। तत्रापि सर्वप्रथममाचार्यभामहः काव्यालङ्कारे प्रतिपादयति–

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च॥
देशकालकलालोकन्यायागमविरोधि च।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते॥[1]

तत्र न्यायविरोधिनः यथा–

न्यायः शास्त्रं त्रिवर्गोक्तिर्दण्डनीतिञ्च तां विदुः।
अतो न्यायविरोधीष्टमपेतं यत्तथा यथा।[2]

यत्र एतेषां शास्त्राणां विरोधो दृश्यते तत्र न्यायविरोधिदोषाः भवन्ति। तत्र उदयन-वासवदत्तयोरुपाख्यानेन न्यायविरोधस्य नैकानि उदाहरणानि प्रदर्शितानि भामहाचार्येण।[3] तत्र भामहाचार्यः शास्त्रलोकयोर्महत्वमित्थं निगदति–

नमोऽस्तु तेभ्यो विद्वद्भ्यो येऽभिप्रायं कवेरिमम्।
शास्त्रलोकावपास्यैवं नयन्ति नयवेदिनः॥[4]

---

1. काव्यालङ्कारः- 4-1, 2
2. तत्रैव- 4/39
3. तत्रैव- 4- 40, 41, 42, 43, 44
4. तत्रैव- 4- 46

वस्तुतः प्रतिज्ञाहीनं हेतुहीनं दृष्टान्तहीनञ्चेति यत् दोषत्रयं निरूपितम् आचार्येण तत्रैव प्रमाणस्यापि उल्लेखः प्राप्यते। यथा च

अथ प्रतिज्ञाहेत्वादिहीनं दुष्टञ्च वर्ण्यते।
समासेन यथान्यायं तन्मात्रार्थप्रतीयते।।

प्रायेण दुर्बोधतया शास्त्राद्विभ्यत्यमेधसः।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः।।[1]

यदा कविः काव्यनिर्माणे प्रवृतो भवति तदा स प्रजापतिः यथा–

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।''

तथापि प्रसङ्गानुकूलं यदि कुत्रापि प्रमाणस्योल्लेखः जायते चेत् तज्ज्ञानमावश्यकं नो चेत् कथं तस्यावबोधः अपि च स विषयः तत्र सदोषो निर्दोषो वा इत्यस्यापि निर्णयः कथं स्यात् तज्ज्ञानं विना। यतो हि कान्तासम्मिततयोपदेशसमन्वितकाव्येषु, शास्त्रमप्युपयुञ्जते।

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते।
प्रथमालीढमधवः पिबन्ति कटुभेषजम्।।

काव्यं लोकाश्रितं शास्त्राश्रितञ्चं भवति। तत्र शास्त्रकाव्यस्य कृते शास्त्रीयतत्त्वानां ज्ञानमपेक्ष्यते। ''कलाशास्त्राश्रयञ्येति चतुर्धा भिद्यते पुनः।''[2]

आचार्य राजशेखरोऽपि निगदति काव्यमीमांसायाम् **'सकलविद्यास्थानै-कायतनं पञ्चदशं काव्यं विद्यास्थानम्'** इति यायावरीयः। गद्यपद्ययत्वात् कविधर्मत्वात् हितोपदेशकत्वाच्च तद्धि शास्त्राण्यनुधावति। आन्वीक्षिकीत्रयीवार्ता दण्डनीतयश्चतस्त्रः विद्याः इति कौटिल्यः। पञ्चमीसाहित्यविद्या'' इति यायावरीयः सा हि चतसृणामपि विद्यानां निष्यन्दः।।[3]

---

1. काव्यालङ्कारः– 5– 1, 2
2. तत्रैव– 1–17
3. काव्यमीमांसा– द्वितीयोऽध्यायः।

अनेन ज्ञायते यत् काव्येषु शास्त्रीयतत्वानां सन्निवेशो जायते एव। तत्र कविः त्रिधा इति कथयति राजशेखरः–"शास्त्रकविः काव्यकविरुभयकविश्च। यच्छाशास्त्रकविः काव्ये रससम्पदं विच्छिनत्ति। यत्काव्यकविः शास्त्रे तर्ककर्कशमप्यर्थमुक्तिवैचित्र्येण श्लथयति। उपकार्योपकारकभावं तु मिथः शास्त्रकाव्यकव्योरनुमन्यामहे तत्र त्रिधा शास्त्रकविः। यः शास्त्रं विधते यश्च शास्त्रे काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते।[1] अतः काव्येन सह शास्त्रस्य विलक्षणः सम्बन्धः इति निश्चप्रचम्। अतः प्रमाणज्ञानमपि अपेक्षितमेव। यथा चकथयति भामहाचार्यः–

सत्त्वादयः प्रमाणाभ्यां प्रत्यक्षमनुमा च ते।
असाधारणसामान्य- विषयत्वं तयोः किल॥[2]

सौगताः द्विविधं प्रमाणमङ्गीकुर्वन्ति, प्रत्यक्षमनुमानञ्च प्रत्यक्षस्य विषयोऽस्ति व्यक्तिः, अनुमानस्य च जातिः। अर्थात् प्रत्यक्षेण व्यक्तिः ज्ञायते, अनुमानेन च जातिः। सामान्यमुच्यते जातिः। जातिर्जातञ्च सामान्यम् इति अमरकोशः 1-4-3। सामान्यस्यापि तदेवार्थः यः साधारणस्य। अतः सामान्यं साधारणं जातिरिति पर्यायरूपः।

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं लिङ्गपरामर्शजन्यं ज्ञानमनुमानम्। प्रकारान्तरेण यद् वस्तु पुरतः दृश्यते तज्ज्ञानं प्रत्यक्षप्रमाणेन जायते, यत्परोक्षमस्ति तज्ज्ञानमनुमानेन एव। इति नियमेनैव बौद्धाः व्यक्ति प्रत्यक्षप्रमाणविषयः जातिः च अनुमानविषयः इति स्वीकुर्वन्ति। तत्र प्रत्यक्षलक्षणमस्ति–

प्रत्यक्षं कल्पनापोढं ततोऽर्थादिति केचन।
कल्पनां नामजात्यादियोजनां प्रतिजानते॥[3]

---

1. काव्यमीमांसा- पञ्चमोऽध्यायः।
2. काव्यालङ्कारः- 5/5
3. तत्रैव- 5/6

कल्पना बौद्धदर्शनस्य पारिभाषिकशब्दोऽस्ति यस्यार्थः नाम जाति-गुण-क्रिया द्रव्याणां पञ्चोपधीनां व्यक्तौ आरोपः। यथा चोक्तं धर्मकीर्तिना– **"कल्पनापोढमभ्रान्तं"**[1] प्रत्यक्षम् कल्पनारहितं भ्रान्तिहीनञ्च ज्ञानं प्रत्यक्षमिति। भामहाचार्येण अस्मिन् प्रत्यक्षलक्षणे विप्रतिपत्तयः प्रदर्शिताः- तत्र प्रथमा विप्रतिपतिः यथा

समारोपः किलैतावान्सदर्थालम्बनञ्च तत्।
जात्याद्यपोहे वृत्तिः क्व क्व विशेषः कुतश्च सः।[2]

जातिगुणक्रियादीनां सत्ता एव नास्ति, अत एतेषां प्रत्यक्षं कथमिति बौद्धानां मतम्। अत्र भामहः कथयति यथार्थवस्तुनः ज्ञानमेव प्रत्यक्षं जातिगुण क्रियादीनां न शक्यते प्रत्यक्षीकर्तुमिति बौद्धानां य आशयः तन्न साधु। जात्यादीनां निषेधे सति कस्यापि वस्तुनः ज्ञानं कथं संभवम्, उपाधीनाम् निषेधे सति द्वयोः वस्तुनोः पार्थक्यज्ञानं कथं स्यात्। प्रत्यक्षं द्विविधं निविर्कल्पकं सविकल्पकञ्चेति। विकल्पशब्दोऽत्र भेदवाचकः। यत्र विकल्पः तत् सविकल्पकं यत्र विकल्पाभावः तत् निर्विकल्पकम्। किमपि वस्तु अस्ति इति बोधः निर्विकल्पकज्ञानम्, परं किमस्ति इत्यस्य बोधः सविकल्पकज्ञानम्। अत्र द्वयोर्मध्ये पार्थक्यं ज्ञायते उपाधिचतुष्टयबलात्। जातिगुणक्रियायदृच्छेति उपाधिचतुष्टयम् वस्तुतः वस्तुनः प्रत्यक्षंज्ञानं उपाधिभिरेव क्रियते। यदि जात्यादयः न स्वीक्रियन्ते चेत् ज्ञानस्य विषयः कः अर्थात् कस्य ज्ञानम् पुनरपरेण वस्तुना साकं किं पार्थक्यम्, अपि च पार्थक्यस्याधारः कः इत्यत्र बौद्धानां मतं समुचितं नास्ति इति। द्वितीया विप्रतिपत्तिः बौद्धमतखण्डनाय द्वितीया युक्तिरूपस्थाप्यते भामहाचार्येण तदपोहेषु च तथा सिद्धा सा बुद्धिगोचरा। अवस्तुकं चेद्वितथं प्रत्यक्षं तत्त्ववृत्ति हि।। यदि जात्यादीनामपोहे सत्यपि तेषां बुद्धिगोचरत्वम्, अपि च प्रत्यक्षं निर्विषयकमिति स्वीकृत्य कल्पनारूपमिति कथयन्ति चेत् तदपि न साधु, यतो हि ते यथार्थबोधकाः सन्ति। पुनराचार्येण तृतीया युक्तिउपस्थापिता यथा-

3. न्यायबिन्दु- पृ.-8
4. काव्यालङ्कारः- 5/7

''ग्राह्यग्राहकभेदेन विज्ञानांशो मतो यदि।
विज्ञानमात्रसादृश्याद्विशेषोऽस्य विकल्पना।।[1]

तुरीया युक्तिः उपस्थापिता भामहेन बौद्धमतखण्डनाय, यथा-

"अर्थादेवेति रूपादेस्तत एवेति न्यायतः।
अन्यथा घटविज्ञानमन्यन्न व्यपदिश्यते।।"[2]

सिद्धान्तोऽयं यत् कस्यापि वस्तुनः ज्ञानं तेन वस्तुना एव जायते। यथा घटपदार्थस्य ज्ञानं घटेन एव, पटापदार्थेन घटज्ञानं न जायते। अतः रूप-आकार-जाति-गुण-क्रिया-नामादीनामुत्पत्तिरपि तेन एव पदार्थेण स्वीकर्त्तव्या नो चेत् घटनाज्ञनमन्येन वस्तुना व्यपदिश्यते। अर्थात् पुष्पज्ञानं फलेन न जायते। अन्यथा गजं दृष्ट्वा उष्ट्रस्य बोधो भविष्यति। गोषु अश्वबोधः वृक्षं दृष्ट्वा कश्चिद् कथयेत् यत् घटमहं पश्यामि। अतः एभिः तर्केः सिद्धं यत् उपाधिविशिष्टव्यक्तिरेव प्रत्यक्षस्य विषयः, उपाधिरहितव्यक्तिः यथा बौद्धाः स्वीकुर्वन्ति।

निरूपितस्य न्यायसिद्धान्तस्य काव्येषु उपयोगप्रदर्शनाय कथयति आचार्यभामहः- **'अपरं वक्ष्यते न्यायलक्षणं काव्यसंश्रयम्। इदन्तु शास्त्रगर्भेषु काव्येष्वभिहितं यथा।**[3] आचार्यदण्डिनापि सन्दर्भेस्मिन् उक्तमस्ति-

'देशकालकलालोकन्यायागमविरोधि च। इति दोषाः वर्ज्याः काव्येषु सूरिभिः[4]

साहित्यशास्त्रे अलङ्कारारूपेणापि प्रमाणं विवेचितमस्ति यथा रूद्रटः अनुमानालङ्कारः।

भोजराजेन अर्थालङ्कारेषु प्रत्यक्ष-अनुमान-आगम-उपमान-अर्थापत्यलङ्काराः सरस्वतीकण्ठाभरणम् इतिग्रन्थे प्रतिपादिताः। मम्मटः-

1. काव्यालङ्कारः- 5/9
2. तत्रैव- 5/10
3. दण्डिणाडपि उक्तम्-
4. काव्यालङ्कारः- 5/30

अनुमानालङ्कारः काव्यप्रकाशः रूय्यकः अर्थापत्त्यमानालङ्कारौ अलङ्कारसर्वस्वग्रन्थे। विश्वनाथाचार्येण अनुमान-हेतु-अर्थापत्ति-विकल्प-समुच्चयादयो अलङ्काराः साहित्यदर्पणमिति ग्रन्थे निरूपिताः।

अप्पयदीक्षितेन प्रत्यक्ष-अनुमान-उपमान-शब्द-श्रुति-सामान्य अर्थापत्ति-अनुपलब्ध्यादयः अलङ्कारा स्वीकृताः कुवलयानन्द इति ग्रन्थे। अनुमान-अर्थापत्तिसामान्य-विकल्पसमुच्चयादयः अलङ्काराः निरूपिताः सन्ति। एतेषां सर्वेषां विवेचनं विस्तरभयात् न क्रियते अत्र। परम् अष्टादशशताब्द्याम् आन्ध्रदेशीयबुक्कपट्टणवेङ्कटाचार्येण विरचितः अलङ्कारकौस्तुभः इति ग्रन्थे निरूपितेषु अलङ्कारेषु प्रमाणालङ्कारोऽपि एक अलङ्कारः यथा-

'प्रत्यक्षादिप्रमाणानां यद्यन्यतममुच्यते।
तदा प्रमाणालङ्कारः बहुधा च स इष्यते।।'[1]

तत्र प्रत्यक्षं यथा-

अयं यक्षसूनुर्जयन्तो वसन्तो झषाङ्को मृगाङ्कोऽयवेति प्रतर्क्यः।
महानीलनील त्विषा गोपबालं विनिश्चित्य दृग्भ्यां वधूसञ्जहर्ष।।

इत्थमिदं निर्णीतं यत् कवीनां कृते विविधशास्त्रेषु प्रतिपादितानां तत्त्वानां ज्ञानमपेक्ष्यते। यतोऽहि काव्येषु सर्वासां विद्यानां सहभावः दृश्यते।

---

1. काव्यादर्शः- 3/126
2. अलङ्कारकौस्तुभः- 2/109
3. तत्रैव- 2/270

Consciousness and its States: Exploring Dharmarāja's Concept of Vṛtti and Its Implications

Prof. Godabarisha Mishra

pratyakṣaṁ tu atra caitanyam eva

(All perceptual knowledge refer to this reality-conscious only.)

Introduction

In Advaita, consciousness, "cit", is the process and the goal of philosophical disciplinie. In perceptual process, alkong with its forms waht is revealed is "Being" that is common to every entity and without whih the form cannot be real and cannot have objective status. In the perception of "That is a table" and "That is a tree" alonog with the forms of the table and the tree, "Being" is revealed through the expression "is" whether or not we express our cognition in words. Even though Advaitins accept the Bhāṭṭa theory of cognition, both differ in their analysis of it. For Advaitin, perception is a function (vṛti) of the inner sense (autaīīsḥkaraṇa which is an instrument). The modification that the internala organ (antaḥkaraṇa) undergoes in keeping with the object perceived is technically called as "vṛtti". there are several types of cognitions (veridical and non-veridical) in keeping with the functioning of the mind (vṛtti). All cognitions according to Advaita stem from consciousness and it is not necessary that all perception requires the involvement of the sense organ. The cognition of table, chair etc is said to be verifical since it is gained in the normal manner - thirough the modification of the mind (*antaḥkaraa-vṛtti)* and that is why it is not sublated. But in

the case of rope-snake, the initial cognition is sublated by a subsequent cognition, even though the functioning of the sense (*indriya-vyāpāra*) is common to both. Even while perceiving the snake, rope along exists there; but it is cognized as a snake. For this snake, the cognitum is not a snake but a rope. There is awareness of cognition and awareness of ignorance of the object in the person who is involved in the process of cognitioon. Awareness is different from cognition, with is also a cognitive act. An appropriate mental functioon (*vṛtti*) is required to dispel ignorance. Awareness does not dispel ignorance, because we are aware of both knowledge and ignorance. One point that also needs to be mentioned heree is that in any case of cognition, there is the dispelling of the ignorance that prevents the realization or experience of the being and its cognition. In the cognition of an object outside (*aj-āta-satta*), there is the destruction of both the covers created by Ignorance, the Existence-Cover (asatva-āpadaka-āvaraṇa) and the Appearance-Cover (*abhāna-āpadaka-āvaraṇa),* whereas in case of indirect forms of cognition, there is only the destruction of the Existence-Cover associateed with the object i.e. fire. In case of states of mind like happiness (*ukha*) and the like, and also iin the case of illusion, there is no cover or obstruction and hence the question of destruction of the cover does not arise. They are cognized by the awareness (*sākṣin*) alone.

Modification or *vṛtti* happens to Mind (*antaḥḥkaraṇa*) and Ignorance. Let us call Miind and Ignorance together ècognitiver elementé. Miodification is nothing but èmodificationé of this cognitive element that comprehends an object and presents it to the witness. The Witness èhas toé witness any change or modification of the cognitive element. Now according to Madhusūdana Sarasvatī and Dharmāja, cognition is the mofification of the internal organ only. The modification of ignorance is according to them èpseudo cognitioné (*j-āna-ābhāsa*). Coignition or a pseudo cognition is nothing but a

modification. And by definition the Witness has to (witness) it indifferently I call this (witnessing) of the Witness (awareness). The Witness is aware of Ignorance also. That is how after waking up one says I did not know anythingé. What it means is she (witnessed) or was aware of her own Ignorance. The Advaitin rejects the grammarian view that the name is necessarily involved in al cognition and that when I perceive a horse, the word horse also is an object of cognition.

This essay intends to explore the concept of consciousness in Advaita Vedānta and the states it undergos in different types of cognition. The whole task is to see the importance of vṛtti and the way it operates in Advaita. When Dharmarāja gives the definition of pramā, the definition is meant to include the empirical world of reality into the fold of pramā. That is novelty, (*anadhigatava*) does not exclude the *vyāvadhārika*. But in Advaita it has been taken toi be the means to exclude the empirical world. That might be the reason why Madhusudana takes to a different procedure of defining illusoriness of the wor3ld and not the knowledge. One more problem, I would like to discuss here is that abādhita, (not sublated) given as a criterion of knowledge also needs toi be understood in different manner to tighten the definition of knwledge given by Dharmarāja.

Vṛtti and its Operation

Consciousness has been a very significant concept discuss and debated among the Indian system builders to arrive at their philosophical realities. In the elucidation of the philosophy of the Upaniṣads, Śaṡkara holds the view that it is consciousness, which is the basis of world appearance. Knowledge in ordinary sense pre-supposes the distinction between the knower and known. This is because nescience (*avidyā*) disguises the truth by the nescience of plurality. *Avidyā* covers the all-pervading consciousness-self just as a finger placed in front of oneés eyes covers the visibility of the sun. Consciousness is unrelated to anything,

for the reason that there is nothing apart from it to be related to, all the distinction of knowinig and knower and known, subject and object are mistakenly attributed to the self and the world of empirical activity is generated. The moment this super-imposition drops away, there is no knower-ship and no operation oif means of knwledge. Because of the lack of false identification of the senses as the self, sense like perception etc. Also ceases, for sense activities is possible only for a knower. Hence, it is nescience that conjures up all cognitive functions. As it has transformed itself into the world of variety, so it has evolved itself into that cognitive instrument called internal organ or the *antahkaraṇ*. *Antaḥkaraṇa* modifies itself and takes the forms of an object and this is known as *vṛtti*.[1] That aspect of intellignece which is definied by cognitive process (that connects the ego with the object) is the knower. That aspect of intelligence that is defined by cognitive process is the means of cognation (*Pramāṇa*). Aspect of intelligence defined by the element of fitness for manifestation present in the object (which pervdades the object) assumes the form of the object and invests it with the character of objectness, is the cognition or *pramiti*.

The conscious conditioned by the nescience in the form of the object like pot is the conotent consciousness, *viṣaya-caitanya,* conitioned by the modification of the internal organ is the cognitive consciousness, *pramāṇa-caitanya;* and conditioned by the internal organ is the cogniser-consiousness (*pramatṛ*). Madhusūdana Sarasvatī, however, speaks of four aspects and the fourth is the Brahma-caitanya residing in the object.[2] It is the function of *vṛtti* to manifest objects. The *vṛtti* forges a connection between the self-conditioned by the object and the knowing self and takes out the veil coverin the self-conditioned by the object. In the *Vivaraṇa* and *Sankṣepa-śārīraka*, the function of the *vṛtti* is to establish contact and lift the obscuring veil of nescience in that object thereby making the object-consciousness and the subject-consciousness non-

different.[3] According to the authors of the *Vedānta-kaumudī* and *prakaṭartha*, when there is sense object contact, the mind transforms itself, being activated by the moral destiny or some unknown factor,[4] into the form of long ray reaching toi the object. Rāmādvaya, the author of *Vedānta-kaumudī* holds the view that pure-consciousness underlying the mind that lay dormant is stirred by the transformation of the mind into the modification or *vṛtti* and thus sets aside the veil that has drawn over it. The *vrtt* is the transparent transmitter of the conscious to the object. Thus the subjective and objective elements get united (saṅslesa-pratyaya) and then results the cognition "I know the object". Madhusūdana is of the view that the *vṛtti* manifests the adhiśhanacaitanya which is present and un-manifest. In the case of mediate knowledge, (say inferential) there is no contract with the object and so it is merely mental. In the case of immediatee knowledge, the manifestation is of the object. Vācapati says that the *vṛtti* has the function removing the veil of nescience, that conceals the consciousness and is the material cause of the universe.

Now it may be asked as to what is the requirement of a *vṛtti* at all, if it were intelligence itself? The reason is that the consciousness has the ominpresent nescience for its adjunct and it cannot be directly one with the objects, since it is not the material cause of the objects.[5] Similarly, intelligence is associated with the internal organ, though not with the objects.[6] So the instrumentality of an internal organ is necessary for the contact of intelligence with the external objects. It is the vṛtti again that manifests the non-difference of the intelligence self from the intelligence defined by the object. Or3 we may say that it is through the association with a *vṛtti* in respect of a particular object that the obscuring nescience is lifted. So the function of *vṛtti* is for the sake of contact of the object with intelligence, and also for3 the manifestation of non-difference of the intelligence self from the object-defined intelligence. In

other words it is required for the removal of the obscuring nescience with regard to the particular object.[7]

Bhārttīrtha and Madhusūdana are of the opinion that theree is no destruction of obscuration (*āvaraṇa*) by the *vṛtti*; as otherwise, even the cognition of a pot will bring about release. It only overpowers and does not destry the obscuration (*āvaraṇa*)[8] Prakāsātman, the author of *Pa-capādikā-vivaraṇa* holds that aj-āna is only one which has several effects, while the auhor of *Iṣta-siddhi*, though agrees with him, points out that there are many āvaraṇas with regard to an object. When knowledge arises, only one nescience gets destroyed and others continue.[9] It cannot be objected that if one nescience remained, there will be other nescience actin as objects to the manifestation of the objects; for the very removal of one nescience is a guarantee against removal of that and if nesciences continue to be there, the manifestation of the object also continues to be there. Or is the refernece here is to the Bhāmatī, which accepts many nesciences as there are individual souls, even then, so far one individual is concerned, there should be liberation of ignorance to oone object is lifted, ignorance with regard to other objects may persist and so there is not question of instantaneous liberation when an object is known. One more question may be asked: even Brahmaj-āna may not distroy the aj-āna and will have t o be supposed only to over power it? The answer is that the intuition arising out of Mahāvākya, *tattvamasi* is the truth and is not contradictable unlike the knowledge arising through perception, etc., which are strictly not pramā.

Hence according to Advaita, it is only consciousness that is manifested by the internal organ is the cause of the experience of objects. Only through the internal organ can there be any association and without any such association, no congition is possible. It has to be kept in mind that mere existence of internal organ is not enough to reveal objects. The vṛtti should reach and take on the form of the objects. In the case of nonoperation of the internal organ, when

theree is cognition as in case of happiness, it is the internal organ that has transformed itself into a *vṛtti* and is manifeseted by the witness consciousness, because the *vṛtti* and consciousness conditioned by pleasure and pain are located in the same place.

There may be a doubt whether there can be the knowledge of merit and dererit through vṛtti. Advaitins say that the consciousness is not in harmony with those particular objects.[10] When consciousness is pure but concealed, the knowing-self (pramātā) is connected with it by a *vṛtti* and *antaḥkaraṇa* that gives rise to cognition. Where the object is not-concealed but impure like the illusory silver appeariing in the shell, the connectiion is to be established by the vṛtti of nescience (avidyā-vtti)_. But in the case of pleasure, pain etc., which are un-obscured and pure, there is no necessity of a vṛtti of the internal organ to connect. The vṛtti, which causes the manifestation of object in figuratively called "knowledge".[11]

Criterion of Vaidity of Cognition

Direct perception or pratyakṣa is distinctive cause of perceptual knowledge.[12] The prime characteristic of perception is its immediacy and directness. This immediacy follows from the fact tht perceptual cognition, the non-difference of the cognitie consciousness from the content-defined-consciousness is brought about through the vṛtti. *Perceptual cognition is itself consciousness which is immeiatee.* So the immediacy of the perceptual knowledge is derived from the metaphysical nature of reality; that is consciousness, which is always direct. It is this reality consciousness, which is called perception (*pratyakṣa*) when through the modification of the mind and the sense contact; a relevation of the object is brought about. All perceptual knowledge refers to this reality-consciousness only which though really has no beginning and end, seems to be so by the association of he attributes of vṛtti which has a beginning and end and hence appears and disappears.[13] Cognition is valid when it has for its content an object that

is *not already known* (*anadhigata*) or (novelty) and is not sublated (*abādhita*). Novelty is proposed to do away with the cognitions arisin out of recollection. Rāmādvaya differs frm Dharmarāja is accepting novelty as a criterion. The difficulty of continuous perception of the same object (dhārāvāhika-j-āna) and the fact of recognition go contrary to such a definition.[14] Now taking the other criterion into consideration, abādhita (which is not sublated) we find there are problems. It is because 1. a wrong cognition may not be contradicted by another cognition. 2. One wrong cognition may be sublated by an other wrong cognition, 3. a right cognition may be contradicted by an eroneous cognition. If it is given that the sublation is toi be done only by a right, faultless cognition, then there will be problem as to how do we decide which is the right cognition. It would be arguing in a circle because we cannot say which one is right cognition without referring to the contradiction. Citsuka reflects on this point saying that it is impossible to assert whether any piece of knowledge wil continue to remain un-contradicted for all time.

Anadhigatava (novelty)

Prasastapāda says memory is an independent pramana. Recollection is true only in so far as it is not sublated. Dhartanaraja says that recollection may be vdalid but it is not necessary to prove that it is a means of knowledge. Memory does not reval anything that is not revealed already.[15] It is *adhigata* though it may not be *abādhita*. Taking minute details of recollection into consideration, Dharmaraja says that anadhigata (not known so far) has to be a characteristic of prama and it would include empirical knowledge into its fold. The whole exercise of Dharmaraja is to give an epistemic foundation to the philosophy of Advaita and in that direction, the world which does play a role has to be accounted for and all pramanas have to be worked out. Hence he quoted a pre-Shankara Advaitin to say till the knwledge of Brahman

arises the world is to be taken as real (ā-ātma-niscayat). In that case even as long as the rope-snake cognition continues, rope-snake also appears to be real. Hence we cannot take this to be final a definition of prama. It becomes provisional. I would like to bring Sankara to substantiate what I would like to put forth before you, he says "all usages relating to pramāṇa and prameya opereate in the world of duality."[16] When Śankara says "A thing that is kown through some means of knowledge to have a certain characteristic retains that characteristic evn in a different place, time or condition; or else all functioning of the means of knowledge would stop"[17] he means only the so called pramāṇas relating to wor3ld ofe empirical reality not the reality per se. Hence anadhigata need not be taken to be the criterion for prama. Dharmaraja does it because of his over enthusiasm to do away with the pramā theoiry of Nyaya school.

Abadhita (un-sublated)

Now I go back to the other dimension of the definition and about which I have alredy mentioned the difficulties. There are a few problems. 1. If a person sees a rope as a snake for life-long and worships by giving milk as it sone in some part of our country, then it is not a cognition which is sublated, and it is now knwledge at the same time. 2. Secondly, if a rope-snake, instead of bring known as rope as a garland and the continues to have such a knowledge, it is also unsublated, but not a case of knowledge. Thirdly, suppose at a distance, there is water and because of his earlier illusions, he sees it as mirage, (mrgatrsna) the knowledge remains to be unsublted though not right. Hence abadhita cannot be given as a criterion of knowledge.

How do we address this problem? Now in all these cases, this is private cognition, not public. There can be public illusions also. But these are the cases which are only seen by a person at a particular time. Definition has to have a wider scope and applicability. Secondly, these are the

cases which are not sublated, but there is possibility. Secondly, these are the cases which aree not sublated, but there is possibility of their being sbulated. So I would prefer "abadhya" for abadhita. In that case rope-snake or in any such object of illusory cognition, there is possibility of beiing sublated, though it is not sublated due to some reason.

There are a few thigns to mention by way of my concluion. Dharmakirtiés definition, "Kalpana apodham, abhrantam pratyaksam", which means that a cognition, which is not vitiated by imagination and not illusory is perception must have had its influenced on later Indian epistemologists to design their epistemology in differnet ways as has been shown above in the case study ofe Dharmaraja. Secondly, this perhaps is the reason why Madhusudana does not gtry to give a definition of knowledge in this way and tries to define illusoriness, or mithyātva. There is a still other way of validating the world, in the way Saccidananda Sarasvati puts it through his vision of world as Brahman. It is again on the basis of the statement, *brahmasvabhāvo hi prapa-caḥ na prapa-ca-svabhāvam brahma*. The world is of the nature of Brahman and but the Brahman is of the nature of the world.[18] In that case, the first exercise that any perception is of the nature of consciousness and it is only consciousness which becomes subject and object in accordance with the states of its existence. That is the reason why it is stated that "pratyakṣam tu atra caitanayam eva", the perception is only consciousness.

---

1. Just as the water of the tank, going out through a hole and enterning fields through channels comes o have a quadrangular3 or other figure, similarly, the internal organ too which is of the nature of light, going out through the sense of sight eetc. and reaching the locality of contents like pot is mo;dified in the form of content like pot. *Vedanta paribhāsa. Madhusūdana in his* Advaida Siddhi replies that taking the form of the object only gives the capacity to the modification to remove veil of ignorance.

2. Caitanya (tasya ca abivyaktasya caitanyasya ekatve' py abhivyanjakantakharana-bhagabhedat tridha vyapadeso bha vati, Siddanta-bindu, p. 33).
3. Pratibimba-vadins
4. (adrstadi-ksubdham)
5. It is like the "cow-ness" though omnipresent is not associated with horse, etc., through it is associated with a particular, possessing a dewlap.
6. SLS by SSSS p. 166
7. *Siddhāntaleśa-sangraha*- p. 187. These are respectively known as a. ciduparāgā, b. abhedaabhivyakti, and āvarana.
8. Vivranaprameya-sanragraha, p 72
9. The author of *vedanta-kaumudi* says that when there is thunderbold (vajrapatha) falling on the crowd only one of them may be killed while others may only dispense; in the similar way when one ajnana is dispelled, other ajnanas may persist.
10. Caitanayasya tattadakaratvabhavat. Vivaranaprameya samgraha, p. 35
11. vrttau janatva upacarat). Prakasatman echoes the same idea, "because of the figurative designation of "knowledge" in respect of the vritti of the internal organ (antarkarna-vrttan upacarat). In Samkhya, pure consciousness is the knower, the vṛtti is the pramana, prama is the reflection of the modification in the form of objects in the consciousness.
12. Pratyaksa-prama-kaanam pramanam.
13. In Brahadranyaka we come across he statements like lilayati iva, showing that the conosciousness, thought is non-relational becomes as though relational.
14. aj- āta-j- apakaṁ pramānaṁ iti asāram - Rāmādvya
15. As Yogasutra puts i "anubhuta-visaya-sampramosah smrtih."
16. Sarve pramana-prameya-vyavahrah laukikah vaidikasca pravrttah, sarvani ca sastrani vidhinisedha moksa parani. Adhyasabhasya of Sankara.
17. Brhadaranaya upanisad, 2.1. 20
18. Refer Two Myths in Advaita by Srinivasa rao.

वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदः

धर्मराजाध्वरीन्द्र

यदविद्याविलासेन भूतभौतिकसृष्टयः।।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्।।1।।

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः।।
तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम्।।2।।

श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः।।
जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्त्तकान्।।3।।

येन चिन्तामणौ टीका दशटीकाविभञ्जिनी।।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा।।4।।

तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी।।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते।।5।।

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः 'न स पुनरावर्तते' (छ. 8-15-1) इति श्रुत्या तस्य नित्यत्वावगमात्। इतरेषां त्रयाणां तु प्रत्यक्षेण, 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छ. 8-1-6); इत्यादिश्रुत्या चानित्यत्वावगमात्। स च ब्रह्मज्ञानात् इति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते।।

तत्र प्रमाकरणं प्रमाणम्। तत्र स्मृतिव्यावृत्तं प्रमात्वम्, अनधिगताबाधितविषयज्ञानत्वम्। स्मृतिसाधारणं त्वबाधितविषयज्ञानत्वम्। नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञाना-विषयतत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः।।

किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु

यावद्धटस्फुरणं तावत् घटाकारान्तःकरणवृत्तिरेकैव, न तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्। तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्काऽपि।।

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानं कथं प्रमाणम्? उच्यते–ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. 4-5-15) इति श्रुतेः, न तु संसारदशायां बाधः, 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ. 4-5-15) इति श्रुतेः। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः। तदुक्तम्–

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्।।1।। इति

आ आत्मनिश्चयाद् ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। लौकिकमिति घटादिज्ञानमित्यर्थः।।

तानि च प्रमाणानि षट्, प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्। तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमा चात्र चैतन्यमेव 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. 3-4-1) इति श्रुतेः। अपरोक्षादित्यस्यापरोक्षमित्यर्थः। ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति? उच्यते–चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। तदुक्तं विवरणे–'अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति।।

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम्? इत्थम्–न तावपदन्तःकरणं निरवयवं, सादिद्रव्यत्वेन सावयवत्त्वात्। सादित्वं च 'तन्मनोऽसृजत' इत्यादिश्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्मत्वे च 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ. 1-5-3) इति श्रुतिर्मानम्। धीशब्देन वृत्तिरूपज्ञानाभिधानात्। अत एव कामादेरपि मनोधर्मत्वम्।।

ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहं जानाम्यहं

बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते? उच्यते- अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः।।

नन्वन्तःकरणस्येन्द्रियतयाऽतीन्द्रियत्वात् कथमहमिति प्रत्यक्षविषयतेति? उच्यते-न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। 'मनः षष्ठानीन्द्रियाणि' इति भगवद्गीतावचनं प्रमाणमिति चेत्? न, अनिन्द्रियेणाऽपि मनसा षट्त्वसङ्ख्यापूरणाविरोधात्। न हीन्द्रियगतसङ्ख्यापूरणमिन्द्रियेणैवेति नियमः, 'यजमानपञ्चमा इडां भक्षयन्ति' इत्यत्र ऋत्विग्गतपञ्चत्वसङ्ख्याया अनृत्विजाऽपि यजमानेन पूरणदर्शनात् 'वेदानध्यापयामास महाभारतपञ्चमान्' इत्यत्र वेदगतपञ्चत्वसङ्ख्याया अवेदेनापि महाभारतेन पूरणदर्शनात्। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' (क. 1-3-10) इत्यादिश्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च। न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिन्द्रियाजन्यत्वादिति वाच्यम्, न हीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च।।

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमित चेत्? किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य? आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथा हि-त्रिविधं चैतन्यं प्रमातृचैतन्यं, प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्।

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं वह्न्यादे श्चक्षुराद्यसन्निकर्षात्। तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव,

विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते। तथा चायं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्। सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् नियमेनाहं सुखीत्यादिज्ञानस्य प्रत्यक्षत्वम्। नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेन्न। तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालीनतया तत्तदवच्छिन्नचैतन्ययोर्भेदात्। उपाध्योरेकदेशस्थत्वे सत्येककालीनत्वस्यैवोपधेयाभेदप्रयोजकत्वात्।

यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा अहं पूर्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयत्। नन्वेवमपि स्वकीयधर्माधर्मौ वर्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः, तत्र धर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादिति चेन्न, योग्यत्वस्यापि विषयविशेषणत्वात्। अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिदयोग्यं किञ्चिद्योग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्, अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषात् सुखादिवद्धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा॥

न चैवमपि सुखस्य वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम्, इष्टत्वात्। 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम्। पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्। वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनासम्भवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात्। तथा चानुभवः 'पर्वतं पश्यामि वह्निमनुमिनोमीति'॥

न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असन्निकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम्। सुरभिचन्दनमित्यादिज्ञानमपि चन्दनखण्डांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभ्यस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात्॥

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यम्, इष्टत्वात्। जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतया अप्रामाणिकत्वात्। घटोऽयमित्यादि प्रत्यक्षं हि घटत्वादिसद्भावे मानं न तु तस्य जातित्वेऽपि।।

जातित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशात्। समवाया-सिद्ध्या ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटित-जातित्वस्य घटत्वादावसिद्धेश्च। एवमेवोपाधित्वमपि निरसनीयम्।।

पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये वृत्तौ न विरोधः। तथा च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्य-वच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्।

घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम्। ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः? अहमिमं पश्यामि इति भेदानुभव-विरोधादिति चेत्, उच्यते-प्रमात्रभेदो नाम न तदैक्यम्, किन्तु प्रमातृसत्ता-ऽतिरिक्तसत्ताकत्वाभावः। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्।।

अनुमित्यादिस्थले त्वन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः।

नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः, धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेत्? न, योग्यत्वस्यापि विषयविशेषणत्वात्।।

नन्वेवमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः, रूपावच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य चैकतया

रूपावच्छिन्न्चैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणादिसत्तायाः प्रमातृसत्ताऽतिरिक्तत्वाभावादिति चेत्? न, तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात्। रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्या-भिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात्।।

नन्वेवं वृत्तावव्याप्तिः, अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेत्? न, अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृ-चैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात्। एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्वान्नव्याप्तिः।।

न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षि-विषयत्वाभ्युपगमविरोध इति वाच्यम्, न हि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वम्। अत एवाहंकारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता, अत एव च प्रातिभासिकरजतस्थले रजताकाराविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता। तथा चान्तःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः।।

तदयं निर्गलितोऽर्थः, स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः।

सा च वृत्तिश्चतुर्विधा संशयो, निश्चयो, गर्वः, स्मरणमिति। एवं विधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति, बुद्धिरिति, अहङ्कार इति, चित्तमिति व्याख्यायते। तदुक्तम्-

मनोबुद्धिरहङ्कारश्चितं करणमान्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे॥1॥

तच्च प्रत्यक्षं द्विविधं सविकल्पकनिर्विकल्पकभेदात्। तत्र

सविकल्पकं वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादिज्ञानम्। निर्विकल्पकं तु संसर्गानवगाहिज्ञानम्। यथा–सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम्।।

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादिति चेत्? न, न हि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं, दूषितत्वात्, किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम्। तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्। एवं तत्त्वमसि इत्यादिवाक्यजन्यज्ञानस्यापि, तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्? उच्यते–वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्, अनभिमत–संसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः, किन्तु तात्पर्यविषयत्वम्।।

प्रकृते च 'सदेव सोम्येदमग्र आसीत्' (छा.–5–2–1) इत्युपक्रम्य 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छा.–6–8–7) इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयसंसर्गमव–बोधयेत्। इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्, यत्संसर्गानवगाहियथार्थ–ज्ञानजनकत्वमिति।। तदुक्तम्–

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता।।1।।

प्रातिपदिकार्थमात्रपरत्वं वाऽखण्डार्थत्वमिति चतुर्थपादार्थः।।

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षि ईश्वरसाक्षि चेति। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम्। तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम्। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः। विशेषणं च कार्यान्वयि व्यावर्तकम्। उपाधिश्च कार्य्यानन्वयी व्यावर्तको वर्तमानश्च। रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते।।

प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासक–चैतन्योपाधित्वम्। अयं च जीवसाक्षी प्रत्यात्मं नाना। एकत्वे मैत्रावगते

चैत्रस्याप्यनुसन्धानप्रसङ्गः। ईश्वरसाक्षि तु मायोपहितं चैतन्यम्। तच्चैकम्, तदुपाधिभूतमायाया एकत्वात्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागत-सत्त्वरजस्तमोरूपगुणाभिप्रायतया वोपपत्तेः॥

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'। (श्वे. 4/10) 'आजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' (श्वे. 4/5) 'तरत्यविद्यां विततं हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः॥1॥' इत्यादिश्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते। ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि, तच्चानादि तदुपाधेर्मायाया अनादित्वात्।

मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्चरतत्साक्षिणोः॥

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते।

नन्वीश्वरसाक्षिणोऽनादित्वे 'तदैक्षत बहु स्यां प्रजायेय' (छा. 6/2/1) इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते? उच्यते-यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषा इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते। तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितं चैतन्यमपि सादीत्युच्यते। एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम्। प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं चेति निरूपितम्॥

तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव। पर्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्। तत्तद्विषयांशप्रत्यक्षत्वं तु पूर्वोक्तमेव। तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात्। यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्वोक्तलक्षणेऽबाधितत्वं

विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषय-प्रातिभासिकरजतादिविषयकत्वेनोक्तलक्षणाभावान्नातिव्याप्तिः।।

ननु विसंवादिप्रवृत्त्या भ्रान्तिज्ञानसिद्धावपि तस्य प्रातिभासिक-तत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणम्, देशान्तरीयरजतस्य क्लप्तस्यैव तद्विषयत्वसम्भवादिति चेत्? न, तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् न च ज्ञानं तत्र प्रत्यासत्तिः, ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः।।

ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत्? उच्यते-न हि लोकसिद्धसामग्री प्रातिभासि-करजतोत्पादिका, किन्तु विलक्षणैव। तथा हि काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोष-समवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।

परिणामो नाम उपादानसमसत्ताककार्यापत्तिः। विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः। प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः, चैतन्यापेक्षया विवर्त इति चोच्यते। अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादाना-विद्याधिष्ठानाश्रितत्वनियमात्।

ननु चैतन्यनिष्ठस्य रजतस्य कथमिदं रजतमिति पुरोवर्तितादात्म्यम्? उच्यते-यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलम्भः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्, तथा चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते।

तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते।

ननु हि साक्षिण्यध्यस्तत्वेऽहं रजतमिति प्रत्ययः स्यात्, अहं सुखीतिवदिति चेत्। उच्यते-न हि सुखादीनामन्तःकरणावच्छिन्न-चैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तम् अहं सुखीति ज्ञानम्। सुखादीनां घटादिवच्छुद्धचैतन्य एवाध्यासात्, किन्तु यस्य यदाकारानुभवाहित-संस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगतं नियामकम्।

तथा च इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वात् घटादेरिदमाकारानुभवविषयत्वम्। अहमाकारानुभवाहितसंस्कारसहिता-विद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्। शरीरेन्द्रियादेरुभय-विधानुभवसंस्कारसहिताविद्याकार्यत्वादुभयविधानुभवविषयत्वम्। तथा चोभयविधोऽनुभवः इदं शरीरमहं देहोऽहं मनुष्योऽहं ब्राह्मण इदं चक्षुरहं काण इदं श्रोतमहं बधिर इति।।

प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमंशावच्छिन्न-चैतन्यनिष्ठाविद्याकार्यत्वेऽपि इदं रजतमिति सत्यस्थलीयेदमंशाकारा-नुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता, न त्वहं रजतमित्य-हमाकारानुभवविषयतेत्यनुसन्धेयम्।।

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसम्भवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थः? इति चेत्। न, स्वगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्ष्यरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात्।।

नन्विदंवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवत् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञानसिद्धिरिति चेत्? न, वृत्तिद्वयप्रतिबिम्बित-चैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्य स्वीकारात्। अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमाद् अप्रामाण्योक्तिः

साम्प्रदायिकानाम्।।

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यमध्यस्तं चेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमिति चेत्? न त्वन्मते सत्यत्वाविशेषेऽपि केषाञ्चित्क्षणिकत्वं केषाञ्चित्स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि। यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः, शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपि। तथा चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम्। अत एव स्वप्नोपलब्धरथादीनामागन्तु-कनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम्।।

ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेत्? न, रथादेः स्मरणमात्राभ्युपगमे रथं पश्यामि, स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः, 'अथ रथान् रथयोगान् पथः सृजते।' (बृ. 4/3/10) इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च। तस्माच्छुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठन्ते।।

ननु स्वप्नरथाद्याधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदाऽसन्नि-कृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः, तथा च रथाध्यासः कुत्रेति चेत्? न, चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात्प्रतीयमानं रथाद्यस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम्। देशविशेषोऽपि चिदध्यस्तः प्रतिभासिकः। रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकम्, तदा सर्वेन्द्रियाणामुपरमात्। 'अहं गजः' इत्यादिप्रतीत्यापादनन्तु पूर्ववन्निरसनीयम्।। स्वप्नगजादयः साक्षान्मायापरिणामा इति केचित्। अन्तःकरणद्वारा तत्परिणामा इत्यन्ये।

ननु गजादेः शुद्धचैतन्याध्यस्तत्वे इदानीमधिष्ठानसाक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धगजादयोऽनुवर्तेरन्। उच्यते, कार्यविनाशो हि द्विविधः-कश्चिदुपादानेन सह, कश्चिद्विद्यमान एवोपादाने आद्यो बाधः। द्वितीयस्तु निवृत्तिः। आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः, तेन विनोपादानभूताया अविद्याया अनिवृतेः, द्वितीये विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च।

तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो माबाधि। मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः।। एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठ-तूलाविद्याकार्यत्वपक्षे शुक्तिरिति ज्ञानेन तदज्ञानेन सह रजतस्य बाधः। मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मतत्त्वसाक्षात्कारमात्रनिवर्त्यतया शुक्तित्वज्ञानेनानिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रम्, मुसलप्रहारेण घटस्येव। ननु शुक्तौ रजतस्य प्रतिभाससमये प्रातिभासिकसत्त्वाभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात्, किन्त्विदानीमिदं न रजतमिति, इदानीं घटः श्यामो नेतिवदिति चेत्। न, न हि तत्र रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः, किन्तु लौकिक-पारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः, व्याधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावाभ्युपगमात्।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतम्। न वा? अनवगमे प्रतियोगितावच्छेदकावच्छिन्नरजततत्त्वज्ञानाभावादभावप्रत्यक्षानुपपत्तिः अवगमेऽपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वाद् रजते पारमार्थिकत्वमप्यनिर्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तस्मिन् कथं वर्तते? इति चेत्? न, पारमार्थिकत्वस्या-धिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युप-गमात्। यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात्।

अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवाद् न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः। नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकलौहित्यं स्वीक्रियतामिति चेत्, न, इष्टत्वात्। एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्षसामान्यलक्षणाऽनुगमो यथार्थप्रत्यक्षलक्षणासद्भावश्च दर्शनीयः।

उक्तं प्रत्यक्षं प्रकारान्तरेण द्विविधम्, इन्द्रियजन्यं तदजन्यं चेति। तत्रेन्द्रियाजन्यं सुखादिप्रत्यक्षम्, मनस इन्द्रियत्वनिराकरणात्। इन्द्रियाणि पञ्च घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि। सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति। तत्र घ्राणरसनत्वगिन्द्रियाणि

स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भाञ्जनयन्ति। चक्षुः श्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः। श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतया भेर्यादिदेशगमनसम्भवात्। अत एवानुभवो भेरीशब्दो मया श्रुत इति। वीचीतरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनागौरवम्, भेरीशब्दो मया श्रुत प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात्। तदेवं व्याख्यातं प्रत्यक्षम्।।

इति प्रत्यक्षपरिच्छेदः।।